पाध्यभावस्तर्हि तदतिरिक्तः परोक्षः कथं साक्षात्कारे न्यायादत आह. नचेति. प्रध्वंसपरैरन्योन्याभा राम
वो न भवति घट इति व्यपदिश्यमानो विघटत्वं दृष्टोऽन्योन्याभावव्यतिरिक्तो नाभाव कृपेमते. नचघटतदन्यो २०
न्याभावयोरैकता. एवमस्माकं निरुपाधिकं ब्रह्मलक्षणं च सोपाध्यभावस्ततोऽन्य इत्यर्थः। ननु चैतन्यादभि

न्याक्षेपानंतादमस्त हृद्वविघादशायांविभागेरन्तुपाधिरूपाज्ञेचैतन्येप्रतिरोधस्तत्लक्षणदभे
दादिति [illegible] शंकामुपसंहरन्नाहजेनपरिहरति तस्मादिति॰ मध्यम इत्यादिनागांधर्वशास्त्राभ्या
सात्मागतिस्फुरं तस्य रूपेणानुल्लिखितान श्रोत्रेंद्रियेण मध्यमं तेनमध्यमं तंतुशास्त्रवासितेनतेनए
ववेदांतवाक्यजन्मनिष्ठात्मैकताकारज्ञानवासितांतःकरणेन तज्ज्ञानाभिमत्तिर्नप्राप्तिरिति।नि
षादर्षभगांधारषड्जमध्यमधैवतपंचमाः स्वराः एषांसमुदायोग्रामः मूर्छनात तेषामारोहावरोहौ।समुद्धरप
सोपिदानीं निराकरोतीति नेति॰ तत्र किमिति स्वाजन्मांतरेचानुष्ठितकर्मसंस्कारद्वारा ज्ञानोत्पत्त्यनुपयुक्तत्वेऽ
हेवावगते श्रौतलिंगि कृतकर्मणांभावनयासमुच्चयइति॰ द्वितीयेकिंभावनाफलसाक्षात्कारेकर्मोपयोगउत
भावनास्वरूपइतिनतावत्प्रथमइत्याह॰ तस्माद्इत्यादिना।तदुच्छेदकस्यकर्मणइतिसमानाधिकरणेषष्ठी॥
सजातीयेति।सजातीयमात्मवत्तेस्वमंचपरेवत्तेचाविरोधिनस्तयोर्ज्ञानाश्रवणेतत्त्वेविपर्यासदर्शनेनकर्मा
नुष्ठानसंभ वात्समुच्चयइतिप्रसक्तस्यानंद्रूषयति॰ अत्रोच्यतइति।विदुषइतिक्रियाकर्त्रादिर्वास्तवइति
निष्क्रमवतइत्यर्थः।ननुविदुषश्चेदधिकारःक्रियाकर्त्रादेर्वास्तवत्वमितिसाधकाह॰ क्रियाकर्त्रादीति॥
विद्वस्यमानः अविद्यानेव विद्वान्भवन्ति द्वाभासइत्यर्थः लोहितादिडाड्भ्यः क्यषइतिक्य

वे॰भा॰११

वंतस्यस्वरूपं॰ अत एवाविद्यावत्कर्मकांडेऽधिकार्यभिमत इत्यविद्वद्विषयत्वं वर्णयांबभूवेति प्राक्के तादृशाभावे
ऽत्यर्थः॥ यदि प्रतीयमानाधिकारित्वनिमित्तस्याऽऽलस्यादेः शास्त्रनिमित्तमिथ्यात्वप्रसंगादत्र इच्छानोविधा
नाधिकारीति इतिप्रसंगाद् इति शंकते स्यादेतदिति। मिथ्यात्वेऽपि शास्त्रे निषिद्धं कर्म येन स तथा तस्य
भावस्तत्ता, ति क्रान्तनिषेधतेत्यर्थः। अवगतमिथ्याभावस्याप्यधिकारित्वनिमित्तस्य प्रतीयमानत्वान्निषेधाधि
२१ कारहेतुता॰ न च अत्र इच्छाननेतेऽप्यधिकारहेतुः अतत्त्वविदो पि नास्तिकत्वेनात्र इच्छतो निषेधाधिकाराद्वितर
थानिषेधफलं चिनस्तस्य प्रसवाभावापातात् किंचिद्धितु अत्राप्यधिकारहेतुरिति ब्रह्मविदोनाधिकार इत्या
मेवमित्यादिना। यद्यपि स्वविधया करोतीति अत्रोपपत्तिः यदात देववीर्यवत्तरं भवतीति अत्राहेति भ
स्मपो कर्मवीर्यवदितिस्याप्येतेशास्तीति तस्माद्विलासत्र इच्छाभक्तिरूपा इयं तु प्रमाणद्वारा विश्वासात्तिके वत्तस्या
वेनधिकार एवेति। न अत्र इच्छान इति नकारोयं प्रतिषेधवाची। मतएवाकात्तब्रह्मभावो विधिधुत्वाधिकार्यत
एवं ज्ञानानंतरं कर्मानुष्ठानात्संभवान्नोपासनोऽसंतोऽकर्मापेक्षेति द्वितीयपक्षानवकाश इत्याह॰ अत राम
एवेति॰ स्तद्धिभजते॰ निर्विचिकित्सेति॰ पितृमनुष्यदेवलोकाप्तिहेतुभिः कर्मप्रजाधनसाध्यव्यापारविधा
भिर्नाप्तत्वमापन्नवंतः किंतु स्याग साधहानेनेत्यर्थः तथाहि अनंतरं पुत्रेणैवायं लोको जय्यो विद्यया देवलो २१

ताः कर्मणा पितृलोक इति। इत्थंभवान्तरे वानुष्ठितं कर्म सत्त्वशुद्धिद्वारेण ज्ञानोत्पत्तिहेतुरिति
प तामंगीकृत्य शंकते। तत्किमिति॥ आरात् दूरे इमर्थं तमुपपादयति। नयाहीति। पूर्वोक्तेन प्र
त्यवायेन कृपाप्नोति पाप्त भावनामाः कार्मस्यास्तस्मात्समन्वमादिति। अनेनकर्मणा इत्यमं
गं मंतः करणं संस्क्रियते क्षीणपापं क्रियते पुरुषेण चोपधीयते उपचीयते इति यो विविदिषा च रति कर्मस्य
आत्मशुद्ध्यर्थं यजेत्लात्मयाजी सर्वदेवयाजिनः काम्यकर्तुः श्रेयानिति शातपथश्रुत्यर्थः। समन्देवयजेत
सत्त्वप्रकृतं मतान्तिविश्रांसेतरस्मा इ। निवेति। नित्यानां संस्कारद्वारा ज्ञानोत्पादकत्वेऽपि दानीयमुक्तं समुच्च
यवाधिना सर्वेषां कर्मणां ज्ञानकार्यमोक्षे समुच्चय इति तत्राह। नचैवेति। नित्यानां फलं पापक्षय
स्तु न मोक्षं ददातेन स्वर्गादि। तत्रापवाद्य कृतो लूकलोकारणमंगीनामितिदेशेनतत्प्रकृतोपकारमातिरि
त्तोपकारकल्पनमेवं ज्ञाने विनियुक्तमतादीनां लूनां नित्यफलपापक्षयमातिरेकेण नित्यकाम्यकर्मस
धारणोपयोगोपयोग्युपकारः कल्प्यः पापक्षयस्य ज्ञानोत्पत्तिद्वारत्वेन तत्र तन्नित्यादिशास्त्रसिद्धं न च
वाच्यं नित्येभ्यः पापक्षयस्य तस्मात्तस्माच्छ्रद्धा ज्ञानोत्पत्तेरन्यतः सिद्धेः किं यज्ञेनेत्यादिनेति। नित्यानां ज्ञानो
त्प[illegible]त्तिप्रतिबंधकदुरितनिवर्तकत्वस्य विशेषतः शास्त्रांतरादसिद्धेः। अस्मिन्पक्षे विनियोगे सक्तिता

कः कर्मणा पितृलोक इति। इह भवांतरे वानुष्ठितं कर्म सत्वशुद्धिद्वारेण ज्ञानोत्पत्तिहेतुरिति
प दामंगीकर्तुं शंकते। तर्हि किमिति॥ आरादुपकारकं इमं पक्षमुपपादयति। नयाहीति। प्रवाहेनप्र
ल मार्थेनेछ्या मोक्षो पात्त भावनामाः कार्मस्य सत्फलमात्समल्पमादिति। अनेन कर्मणा इदमं
गं ततः करणं संस्क्रियते क्षीणपापं क्रियते पुराणेन चोपधीयते उपधीयते इति यो विदित्वा चरति कर्म स
आत्मसु अर्थ्यमज न्नात्मयाजी स्वदेवयाजिनः काम्यकर्तुः श्रेयानिति शतपथश्रुत्यर्थः। स्वमदेवयजेति
सत्र प्रकृतमप्ता द्विजश्रेष्ठोरमाह। नित्येति। नित्यानां संस्कारद्वारा ज्ञानोत्पादकत्वेऽपि इदानीमनुक्तं समुच्च
यवादिनां सर्वेषां कर्मणां ज्ञानकार्यमोक्षे समुच्चयपरिति तत्राह। तत्रैनैवेति। नित्यानां फलं पापक्षयं
ज्ञानमाकांक्षते तेन स्वर्गादि। तत्र पश्यामः ननु उक्तं लोकाः कारणमंगीनामित्ति दर्शनेन प्रकृतोपकारा इति
तोपकारकल्पनमेव ज्ञाने विनियुक्तम ज्ञादीनां नित्यफलपापक्षयमात्रे तिरिके एवं नित्यकाम्यकर्मसं
धारणो नो उपयोग्युपकारः कल्प्यः पापक्षयस्य ज्ञानोत्पत्तिद्वारत्वे तत्र कृतमित्यादि शास्त्रसिद्धं न च
वाच्यं नित्येभ्यः पापक्षयं स्यात् तस्माच्च ज्ञानोत्पत्तेरन्यतः सिद्धौ किं यज्ञेनेत्यादिनेति। नित्यानां ज्ञानो
त्पत्तिप्रतिबंधकदुरितनिबर्हकत्वस्य विशेषतः शास्त्रांतरादसिद्धेः। अस्मिंश्च विनियोगे सक्तिज्ञा

वे॰ क॰ १७ नो द्वेषो न [illegible] नित्याद्यनुतिष्ठतोऽवश्यं ज्ञानं भवतीत्यर्थः॥ शुद्धिमात्रमनित्यतादानोत्पत्तिरिति
विनियोगोपयोगः। ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इत्यादिस्मृतेरिमंश्रुतिमूलं। नश्रु
तिस्थिता इत्थीत्युत्पत्तेर्नैतामनुवाप्स्यति। न संयोगपृथक्त्वेन साक्षादंगभावद्र्सनेन साक्षादंगभ
वो नि विध्यतेन संयोगपृथक्त्वे। सर्वापेक्षा चाधिकरणे संयोगभेदस्यात्रविध्यमाणत्वात्तस्मादयमर्थः
१२ संयोगपृथक्त्वमहती त्वेतावतानुसादाद्दंगभावसिद्धिराराद्ंगभावे चित्तशुद्ध्युपपत्तेरिति नित्यानां
दुरितक्षयफलत्वेपि नित्यकाम्ययोगमाशंक्य नित्येष्विनेष्वपि क्वचित्तसत्ववित्तगतः सत्वगुणः प्र
तत्रोपपत्तीति संस्कारसाक्षात्त्वं इच्छविषयेप्रसक्तग्रासमृद्धये तत्पपत्स्या। प्रसक्तोपपत्त्योऽप्रवृत्तिद्वारं चित्तगतस
त्वं तस्य पापकपारनिवत्त्यापावरणे उद्गारनेसतीत्यर्थः। जन्मश्रूलावबोधमोर्हेतुमज्ञावाभावेपि क्वाश्रूत्यापेोवी
पर्यमाशंक्यते॰ स्यादेतदिति॰ अग्निहोत्रमवाग्स्पाकवदिति॰ पंचमेस्थितं॰ अर्थाच्च। अग्निहोत्रं जुहोतियव्रा
गूस्पचतीत्यत्र किं होमपाकयोर्यथापाठं क्रमउतपाक एव प्रथममिति संशये नियामकस्याभावाद्धोमनिर्व
ते श्रद्धान्तरेणसंभवाद्यवाग्स्पाकस्यवाराद्युपकारकत्वाद्धोम प्राथम्ये प्राप्तेरात्रांतः। पदार्थप्रयोजना राम
पि क्षोनुष्ठानविधिरेव प्रयोजनोपमो [illegible] णि नं क्रमविशेषं तिष्ठतीतिपक्षेव होतमं॰ नचद्र्मांतरानय १२
हेतु५

नंकृतु क्रमवैयर्थ्यप्रसंगात् न च दृष्टार्थत्वेन तयोरुपकारकत्वं पाकस्येति पाठस्थानेति । क्रमेणैवानिय
म्येतक्रमस्यैकत्वेन तद्गुणत्वात् । समित्सोमयजतीत्यादिषु क्रमपठितप्रयाजेषु चिंता किं पाठक्रमानुष्ठानक्रमः उत
न तत्र वाक्यानां स्वार्थमात्रावसितत्वान्न क्रमपरतेत्यनियमप्राप्तौ सिद्धांतः । यथैतान्येव वाक्यानि स्वार्थवि
धायीनि तथानुष्ठानापेक्षितस्मृत्युपयोगीन्यपीतानि निर्वक्रमवंति स्वाध्यायविध्युपादितानि क्रमवंत्येव स्म
रणानि जनयंति स्म तस्यानुष्ठानमित्यस्मरणक्रमेणानुष्ठानं निष्पद्यते । एवं क्रमपाठोपि दृष्टार्थो भ
विष्यतीति तस्मात्पाठक्रमेण नियम इति । स त्वार्थस्तु एकस्मिन्नर्थेतोऽश्र समाख्यानां प्रयाजादीनां पाठक्रमे
ण प्रयोगक्रमो नियम्येत तत्र पाठक्रमस्यानुष्ठाने लोके गुणत्वाद्वागमान्ते यथा स्नात्वा मानुलिंपेत भुंजीतेति ॥
स्था नाश्वीन्तु न्तितसंयोगात् ॥ ज्योतिष्टोमे विकारे तादृशप्रसंगेति दक्षाग्नाग्नेषु त्रीणोमीयादिपशुषु सहत्वस्यु
राद्धिधानार्थकवनंतस्य प्रतेसह पशूनालभंत इति द्विधानात्र प्राकृतः प्रथममग्नीषोमीयस्ततः सवनीय
स्ततोऽनुबंध्य एवं रूपः क्रमो निवर्तते । सहत्वं चैदं सवनीयस्थानेतयासति हीतरयोरुत्कर्षात् तस्मान्नेत न
भवति । सवनीयस्याश्विनग्रहग्रहणानंतरकालः प्रकृतावाम्नायते आश्विनं ग्रहं गृहीत्वा त्रिवृ
ता यूपं परिवीयाग्नेयं पशुमुपाकरोतीति । तत्रैककालत्वेन लक्षणस्त हैसंभवाद्वशं भाविनि क्रमे
ल

सवनीयं

वे॰क॰ ।१।१। कः॰ प्रथमं प्रयुज्यतामित्यपेक्षायां किमनियमेनैवं प्राप्य मुत्तसवनीयस्येति संशयस्तत्र नियामकस्या-
भावादनियम इति प्राप्ते राद्धांतः। स्वस्थानात्सवनीयप्रथमं नियम्येत कुतः उत्पत्तिसंयोगात्॰ प्रकृतौ सव-
नीयस्याश्विनग्रहणानंतर्यमुत्पत्तिवाक्यात्तं विहितौ चैतेनैव कालेन स उपस्थापितः॰ अग्नीषोमीयस्त-
स त्वं वचनेन स्वस्थानाच्चालितस्ततः प्रथमं सवनीयस्यैवोपकरणादिप्रयोगः इतरयोस्तु तत्रास्थितत्व-
वचनात्तदनंतर्यमित्ययं त्वनियमः। अथवा प्रकृतिदृष्टपौर्वापर्यस्यात्र बाधके न्याया मा गात्प्रथममग्नी-
२३ षोमीयमुपाकृत्य नान्बं ध्नदुपाकर्तव्यमिति॰ मुख्यक्रमेणैवांगानां तद्दर्शितत्वात्॥ सारस्वतौ भवत एतद्वै
दैव्यं मिथुनं यत्सरस्वती सरस्वांश्चेति सरस्वतीदेवतं सरस्वद्देवतं च युगपत्कर्म श्रूयते॰ तत्र च सरस्व-
तीदैवतस्य पाठस्यानुवाक्यायुग्मं प्रथममाम्नायते तदनंतरं पुंदेवतस्य तत्र तं ब्राह्मणप्रयोगशेषत्वाद्याज्या- त्रैसं
नुवाक्यापाठक्रमेण प्रधानक्रमोऽवगतः। अंगविशेषे निर्वापादौ संशयः किमनियतोऽस्य क्रमउत प्रधानक्र-
मेण नियत इति तत्र पाठस्यानुवाक्यापाठक्रमस्य प्रधानमात्रगोचरत्वेदंगानामनुष्ठानक्रमे क्रमसाधकभा- राम
वादनुष्ठानक्रमस्य च प्रमेयत्वेन प्रमाणत्वानुपपत्तेरनियम इति प्राप्ते सिद्धांतः। मुख्यक्रमेणांगानां क्रमो २३
नियम्येत तद्दर्शितत्वात्प्रधानार्थत्वादंगानां॥ यद्यपि मुख्यक्रमस्य याज्यानुवाक्यापाठक्रमापेक्षत्वात्प्रमे-

प्रत्येकं तत्पापि प्रमितस्यास्य धर्मादेरिवास्यत्र प्रमाणत्वमविरुद्धं॰ प्रधानस्यहि प्रयोगविधिना सांग
स्यैव प्रयोगस्योक्तेः इति स चावर्जनीयाश्च प्रधानाद्धि कर्म्मवधिमंगानां न सहते॰ पदार्थानां हि संनिधावन्यां
गानुष्ठानं तदा तेनैव सत्प्रधानादंगानि विप्रकृष्येरन् ततो मुख्यक्रमादंगक्रमानियमइति॥ प्रकृतानुत्तकाल
नां गुणानां तदुपक्रमात्॥ वाजपेये सप्तदश प्राजापत्यान् पशूनालभत इति सप्तदशपागं क्रमत्वेन
यं तेतिषां च वैश्वदेवीं कृत्वा सह प्रचरंतीति प्रयोगस्तासां हि सञ्चवणादेकोपक्रमोपसंहारएकस्त्वाधांत
स्य प्रयोगः तेनैषामतिदेशप्राप्ताः प्रोक्षणादिधर्मा नैकैकत्र समापनीयाः किंतर्हि सर्वेषु पश्वपुवेकैकएव
पदार्थः परिसमापनीयस्ततोन्यस्तु तोमः। इतरथाह्येकस्मिन्पशौ सर्वांगानुष्ठाने प्रधानस्यांगैर्विप्र
कर्षः स्यात्॰ तत्र प्रथममेकपदार्थानुष्ठाने विशेषतो वेदाभ्यनुज्ञाभावादिच्छैव नियामिका। तदेवं
स्थिते द्वितीयादिपदार्थप्रयोगे संशयः किं प्रथमएव द्वितीयादावपि इच्छैव कारणं उत प्रथमवत्त्वमेव
नियमइति॰ तत्र पूर्वः पक्षः॥ न तावच्छ्रुत्यादि नियामकं प्रथमांगवद्वृत्तिस्वरूपो रूपेणीवेदनाभ्या
भ्यनुज्ञाभावादिति न त्वेकशाखुलर नियमस्तेन प्रथमतमाश्रितपुरुषेच्छैव चरमतरागानियामिका
प्रयोगे सौकर्यं चैवं लभ्यते॰ इतरथाहि प्रथमप्रयोगानुसंधानमप्रमनसउपरितनं च प्रयोगं तत्क्षणे न

वे॰क॰ १।१। तन्वानस्यमतिरेकः स्यात्तस्मादनियमइतिप्राप्तेराद्धांतः। एकप्रयोगतयातुल्यकालानां प्रोद्देशादंगानां
प्रवृत्त्याक्रमनियमः कुतस्तदुपक्रमात्तेन प्रधानेनांगानामुपक्रमात् तदेकप्रयोगत्वादित्यर्थः। प्रयाजदशमपार्णां
गानिसहप्रयोज्यानि प्रथमांगानुष्ठानेसतिद्वितीयादेर्योऽयमभिर्विधान मप्यनुज्ञानुतिनत्ततोपिर्कंप्र
वृत्तिकक्रमाच्छ्रयेण्यवसम्प्रदशासुप्रथमांगानुष्ठाने द्वितीयोधर्मः प्रथमादिषुपुत्रिर्ममाणः योऽयमि
रेवमवधीयते क्रमोऽत्राग्रहणोभिकेरपिविधानस्यादतः प्रयोगवचनकोपपरिहाराय प्रवृत्त्यानियमइति।
२८ शेषाणां तेषिणांयत्क्रमापेक्षामां हेतुमाह। युगपदिति। युगपदनुष्ठानप्राप्तौ क्रमःस्यात्तदेवकुतस्तत्राह।
एकपौर्णमासीति। बहूनां मध्ये त्रयः पौर्णमास्यांसंबद्धास्त्रयो मावास्यायां कालैकोप्ययदिकर्तृभेदः स्यात्तत्
दानक्रमोपेक्षेत तेतन्मामदित्याह। एकाधिकारीति। स्वामित्वेनाधिकारित्वेत्तस्यैवानुष्ठातृत्वेनकर्तृत्वं
एकाधिकारिकर्तृकत्वे हेतुमाह। एकप्रयोगवचनेति। यजेतेत्याख्यातेकर्तृकास्यविवक्षितत्वात्प्रयोगवचने
कर्त्रैकत्वसिद्धा। एकप्रयोगवचनप्रवृत्तौ हेतुमाह। एकफलत्वादिति। एकफलसाधनत्वतः प्रधानस्योपका राम
रकत्वात्तस्मिन्समुच्चित्य साधनत्वेनोपनिबद्धाः शेषाः एकेनफलेनावच्छिन्नाः शेषिणोऽत एकप्रयोगवच
नोपगृहीताइति। सोऽर्थाभावेति। एकादशेऽभिहितं। अंगवत्क्रतूनामानुपूर्व्यं। सोऽपिचतत्रैवप्रत्यक्षवर्त्त २८

सक्काम आर्यमाणं वसंतिर्वपेत्स्वर्गकामः प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुष्काम इत्यादिषु क्रमपठितत्र्
तुष्टयं विंताद्विंपाठक्रमेण प्रयोज्यानुष्ठाननियमेनेति । तत्रप्रयाणानां समिदादीनामेकेन युगपत्करणाशक्तेः क्र
मापेक्षायां पाठक्रमनियमएवकृत्स्नानामपीतिप्राप्तेराद्धांतः । नवासंबंधात् ॥ अंगेष्वेकप्रयोगवचनमपि
यत्रास्ति तत्र क्रमाकांक्षा एकस्यानुष्ठानापलेषु नैकप्रयोगवचनोस्ति । नच सर्वेपि लिखात्प्रयोज्यंते । तेनैषामे
कप्रयोगवचनसंबंधाभावान्नास्तिक्रमाकांक्षा । किंतु पुरुषस्य । नचतदाकांक्षितं विधिप्रतिपाद्यमिति
तदिच्छयैवक्रमः ॥ पाठक्रमस्त्वध्ययनार्थ इति युगपत्पाठासंभवेनावर्जनीयतयापाठक्रमस्यागतत्वान्नि
यमस्य वाध्ययनार्थत्वादित्यर्थः । गोदोहनस्य पुरुषार्थत्वं च तद्वेर्चितितं ॥ यस्मिन्प्रीतिः पुरुषस्य तस्य
लिप्सार्थलक्षणाऽविभक्तित्वात् । दर्शपूर्णमासयोर्गोदोहनेन पशुकामस्य प्रणयेदिति श्रूयते तत्र गो
दोहनेक्रत्वर्थत्वपुरुषार्थत्वसंदेहे पशुकामस्येति समभिव्याहाराद्वाक्येन क्रतूपकारकत्वेन चोभयार्थ
मितिप्राप्तेराद्धांतः । नोपकारकत्वं शेषत्वं किंतु तादर्थ्यं । तथा च गोदोहनस्य पशुशेषत्वान्न क्रत्वंगत्वं अं
गापेक्षत्वाच्च क्रतोरुपकाराभावान्नार्थस्यापि क्रतूपकारकत्वमविरुद्धं तेन वाक्यात्पुरुषार्थमेवेति । यस्मिन्वि
वृत्ते पुंसः प्रीतिः फलं भवति तस्य लिप्सा फलमप्युक्तानविधितः कुतः ; तस्य फलसाधनस्य प्रीत्या वि

वे·क·२।२। भागाभावादिति सूत्रार्थः। अस्य चैवं प्रणयनाश्रितत्वात्तत्क्रमएव क्रमइति। गोदोहनस्य प्रणयनाश्रित
त्वमुपपादयति नो खल्विति। कल्प्यतां तर्हि व्यापारावेशात्तत्रापि प्रणयनाश्रितमिति। प्रणयनांत
रविशिष्टविधिमाशंक्याप्रतीयत इत्युक्तं। सन्निहितलाभेन विशिष्टविधिरित्यर्थः। सामर्थ्यरूपाल्लिं
गात्। अप्रणयनाश्रितत्वमात्र इत्योग्यत्वाच्चेति। यद्वा। दर्शपूर्णमासाभ्यामिति चतुर्थे चिंतितं। उत्पत्तिका
२५ लांगविषये कालः स्याद्वा कस्य तत्प्रधानत्वात्॥ दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति अत्रपतेतत्र
सन्देहः। किमिदमंगस्य विधायकमुत कालस्येति। तत्र त्वकाप्राप्तेरंगस्य तत्त्रांगत्वेन यजेतेति विधिप्रत्यास
त्तेः सोमस्यैव। ननु उभयथा रेण्यन्यत्र विहितसोमयागस्य प्रत्यभिज्ञानात्कथं तद्विधिः उच्यते। नैकोपि स
त्त्रत्यभिज्ञानात् वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेतिवत्। न ह्यत्र ब्रह्मवर्चसे बृहस्पतिसवकाम्य
प्रतीतमतोंगं बृहस्पतिसवो वाजपेयस्य। एवं च सोमयागोपि दर्शपूर्णमासयोर्विप्रसंगत्वेन विधी
यते इति प्राप्ते उच्यते। अस्मिन् कालांगविधिसंभवे कालो विधेयः। कुतः। अस्य वा कर्मकालप्रधान राम
त्वाद्यदि कर्मविधिरेव स्यात्तर्हि रूपेण द्रव्यदेवतेन भाव्यं। न चैतद्देवतारूपमस्ति। अप्राप्तत्वाच्चेनो २५
क्तिरादिष्टिवत्सोमिकी देवतानिर्देशेन प्राप्येत तर्हि सोमोपि प्राप्येतेति सोमेनेत्यमर्थं स्यादतः सोम

यागप्रत्ययभित्रार्थमिव तत्र · अप्रत्यभिज्ञानेन च न विधिसंभवः । बृहस्पतिसवस्तु वाजपेयप्रकरण
स्यैतत्तत्र प्रकरणांतरस्याभावात्कर्मांतरमेव विधीयते · नामधेयमप्यप्रजापरं तेन तत्र तमानप्रत्यभिज्ञापकं ·
किंतु तत्रैव धर्मलक्षणापावकत्वे · अतो नाम्नैव प्रसिद्धबृहस्पतिसवे धर्माणां प्रापितत्वाद्गुणकर्मवि
धानमिति · यथाग्नेयादीनामिति ॥ एकादशे चिंतितं ॥ प्रयोजनाभिसंबंधात्पृथक्त्वं ततः स्यादेककर्म्मैकश
ब्दाभिसंयोगात् ॥ आग्नेयादिषु संशयः किं तत्र मेते तेषां फलमुत भेदेनेति · तत्र परस्परनिरपेक्षोत्पत्ति वि
धिभिर्विहितानां प्रधानानां पृथक् फलाकांक्षत्वात्तेषां च विशेषसमाणे फलं भेदेनाभिसंबध्यते ततः प्र
तिप्रधानं फलभेद इति प्राप्ते राद्धांतः यद्यप्येषां पृथक्त्वं पृथगुत्पत्तिविहितत्वात्तथाप्येककर्म्म क्रियते
इत्युत्पत्तिवाक्यस्थाफलं कर्म एककर्म्म एकफलत्वमित्यर्थः ॥ ततः प्रयोजनेन समुच्चितानां संबंधात् ॥ कु
एव कुतः ॥ एकशब्दाभिसंयोगात् । दर्शपूर्णमासशब्देन हि समुदायवाचिना निर्दिश्य फले विधीयंते आग्ने
यादयः ॥ यथा ग्रामेणोदपानः खन्य इति समुदायशब्दनिर्देशात्समुच्चितैः पुंभिरुदपानः खन्यते न प्रतिपुरुषं कू
पभेद एवमिहापि · ननु ग्रामापानुलेपनमित्यादौ समुदायशब्दनिर्दिष्टमप्यनुलेपनादि प्रतिपुरुषमावर्त्तं
त इत्यत्र किं न स्यात् · नैतद्वयम् ॥ पुरुषमनुलेपनादेः संस्कारत्वाद्दार्थ्यत्वात्प्रतिसंस्कार्यमावर्त्तिरिह फ

+मुपादीमानाना१

वे·कं·११। लमुद्दिश्य प्रविधीयमानानामेवाग्नेयादीनां विवक्षितं साहित्यमिति फलं तत्रनेति ।। संग्रहे जिज्ञासयोः फलादि
भेदं निर्दिश्य विभजते ज्ञानयोस्तत्त्वस्य न मयुक्तमित्याशंक्याह · जिज्ञासायामिति । इच्छाया ज्ञानपराधीनतया
ज्ञानफलमेव तत्फलमित्यर्थः । फलभेदेव कर्तव्यैकाग्र्यभेदं कथं न भाष्ये नुपयोगित्याशंक्याह · न केवलमि
यांविधे ति · विधेयक्रियाज्ञानफलयोः साध्यतांशपरावभेदं स्यर्थः । अनुष्ठानांतरे स्पष्टत्वं तत्र प्रोच्यमानाह · शब्दज्ञानेति ·
कर्त्व ब्रह्मविदाप्नोति परमित्यादौ ज्ञानफलं साध्यत्वेन प्रतीतमपि न्यायबलाद्धवनवर्ण्णा भिन्नात्पत्वेन [redacted]
२६ मात्मीयफलभेदं कोऽपि जिज्ञास्यविषयभेदं तत्कृती तिसमय एवस्फुटं ह · जिज्ञास्यभेदमिति · ननु भवतेरक
र्मकत्वात् ज्ञावार्थत्वेन पुंस्त्वप्रसंगात् ब्रह्मशब्देन कर्मणि जिज्ञास्यविषयभेदसिद्धिरत आह · भवितेति । ननु तमो
रेव कृत्यस्य केवलार्थादिति कृत्यानां भा[redacted]वकर्मणोः स्मरणाद्वचो मद्धितिसूत्रविहित मत्कृत्यानां तस्य भव्य श
ब्दस्य कर्तृत्वाभावित्वमयुक्तमित्याशंक्याह · कर्त्तरि कृत्यमिति । भव्यगेयेत्यादिना क्रियासूत्रेण भावकर्मवाचिता
पम भव्य कृत्यमन्यत्र एव भव्यादिशब्दा विकल्पेन कर्त्तरि निपात्यंते । तो भवतीति व्युत्पत्त्या भव्यशब्दः कर्त्ता राम
वाचीयदेव भावकर्मणोः । अस्य च भवतेर[redacted]नुपसर्गत्वात्साक्षिवाविक्षाभावाच्च · कर्मावाप्तिर्भवितुम
भव्यनेति स्यान्नेहसः पुल्लिंग निर्देशात् कृत्या यथावृत्तौ पेक्षणाच्च अतः कर्त्तरि कृत्य इति · ननु भवितुः क २६

यं ज्ञानकालेसत्त्वाभावरूपाशंकाज्ञानोत्तरभावि प्रयोजकव्यापारापेक्षोणाद्ध्रस्साह · भविताचेति · भ
वति र्भसिद्धकर्तृक क्रियावाची न पच्यादिवत् सिद्धकर्तृककिंमत्त्वतो भविताख्यातो ऽसिद्धः रूपभावककृत्या
पारापेक्षो निष्पत्तिरर्थस्तस्याश्रयो भवतीति · अतएवाह · । करोत्यर्थस्य यः कर्ता भवितुः सप्रयोजकः । भविता त
मपेक्ष्याप्रयोजकत्वं प्रपद्यत इति भाष्येऽभूत शब्दस्यातीतवाचित्वभ्रमं निरस्यति । भूतमिति · ननु चाज्ञातस्यार्थस्य ना
नुज्ञा नां लोके चोदनात्वात्कथं वेदे चोदनात आह · आज्ञादीनामिति · उत्कृष्टपुंसः स्वाभिलषितोपायकार्यत्वा
भिधानमाज्ञा यथा गामानयेति · एतदेव हीनस्याभ्यर्थना यथा मामाणवकमध्यापयेति · प्रवर्त्तकस्य प्रयोजकस्य
षितोपायोक्तिरनुज्ञा तथा कुरुसमयेऽपीदमिति · नेतासां संभवो वेदे इत्युपदेशाः चोदना । उपदेशो ह्यप्रवर्त्तनियोगस्य प्र
योजनोपायबोधको लोकेऽवगतो यथा गोपालकवत्सस्य पथ्यकथनपरे ऽनेन पथ्यामाप्नोतीति · न हि हठाद्प्रयोक्तुर्निष्फ
र्षोत्कर्षनाऽभ्यर्थना · सप्रयोजनाभावान्नानुज्ञाप्रयोजनस्याप्रवर्त्तत्वात्तदिह नियोज्यस्याप्रवर्त्तस्या हितोपायकर्त्तव्य
तोक्तिरूपोपदेश एव वेदे भवत्येवेति · तस्य धर्मस्य ज्ञानायतनेनेति ज्ञानं प्रमाणमुपदेशो विधिरिति जैमिनीयसूत्रावयवा
र्थः । सविषय इति भाष्ये स्वशब्देन चोदनाभिधीयत इति मत्वाह · स्वार्थ इति · स्वस्याः प्रतिपाद्ये विषये भावनाख्यानियपर्थ ।
धर्मस्येति तु न्यायभावनोपसर्जनाहरतापि शब्दतोऽर्थतः प्राधान्यात्स्वशब्दार्थ इति गृहीत्वाह तद्विषय इति · ननु भावनाया

वे॰ कृ॰ ११। धियो विधित्वादेव पुरुषप्रवर्त्तनमशक्यं प्रमाणमसंभाव्यादिवत्प्रेरकत्वायोगादिति शंक्याह भावनापाद इति । सा चाज्ञाव
नापातत्वस्वेष्टसाधनत्व बोधेन चार्थाद्भवत्यसावेवोपायत्वं बोधयति विधिः बोधयित्वा च तत्रेष्टसाधनतामपाहरति इष्टं
श्रेयः पुरुषः प्रवर्त्तते तदनेन क्रमेणाप्तिमुंजानां चोदना धर्ममवबोधयंतीत्यर्थः । ब्रह्मचोदना ब्रह्मवाक्यं यथा धर्मचोद
२७ ना प्रवृत्तिहेतुं बोधं जनयति नैवं ब्रह्मचोदनेत्याह अवबोधस्येति । ब्रह्मचोदनया सिद्धवस्तु विषयस्य प्रवृत्त्यहेतु
र्थमात्रावबोधस्य जननादिति ~~नन्वविधित्वे विधेः कथं वाक्यत्वं तत्र वस्तुबोधनादिति~~
~~र्थं~~ भाष्यार्थः । ननु सा नाम जनि धर्मबोधवद्ब्रह्मबोधादपि प्रवृत्तिः । सत्यं तु विधितः किं न स्यादिति शंकते
नन्विति विधिशेषकवाक्यत्वेन वस्तुबोधना ईदृशी तावन्नास्ति ब्रह्मबोधमात्रपर्यवसानमित्यर्थः । भाष्येव बोधवि
देशे एव विषयविषयत्वे हेतुं गर्भ इति भावः । अयमभिसंधिरिति । यथा विशिष्टविधौ विशेषणविधिर
र्थान्न विशेषणे तात्पर्यं वाक्यभेदादेवं विषयविशिष्टप्रतिपत्तिविधित्वामर्थ्या ब्रह्मणि स्वयं तात्पर्यं
क्वाह नचबोधस्येति विशिष्टक्रियाविधानायुक्ता विशेषणस्य प्रमाविशिष्टस्य वाक्यत्वात्प्रति राम
पत्तिविधित्वेन विशेषणसत्तामाक्षिपति । वाच्यं चेन्नु मुपासीतेत्यादावारोप्यस्यापि विधेयधीविषयत्वा २७
दित्यर्थः । एवं कामप्रमाणाभावसिद्धौ ब्रह्मधी नियोगेन धर्मबुद्धेरनंतरा । तत्क्रमेमानतीनत्वान्ना

नमुमुक्षुत्वादिधीरिव। नित्यानित्यवस्तुविवेक इति भाष्यकारादिपतित ब्रह्मसत्यमेवेति। अनित्या ब्रह्मणो विवेकः। द्विं नि
श्चयतत्तानमात्रमाद्यं ब्रह्मेति तद्वतमिति। द्वितीयविपर्ययः संशयो वा नावधानतः शास्त्रश्रवणे प्रवृत्त्ययोगान्नाधि
मः प्रपंचानित्यत्वानिश्चये तद्वैराग्याद्यभावादित्याह। तथा चेति। तमाधत्ते। तथा हीति। नित्यपरत्वविवेकः। न च शास्त्रा
नारंभः। इदं नित्यमिदमनित्यमिति निश्चयमात्रम्। आत्मानात्मसमुदाये नित्यत्वमनित्यत्वं च वस्तुनो धर्मौ तयोश्चावधर्मि
स्यां भवितव्यमित्येतावन्मात्रं निश्चितं मया विघटादेरनित्यतावधारिता तत्पापि सकलानात्मस्वनावधारितेति।
नित्यवस्तुस्वरूपाभावो इत्युक्तमिति। उक्तविवेकस्य प्रयोजनमाह। तथाचेति। समासस्यैवरूपादेयानुपादेयत्वे हेतुमा
ह। तदेतेष्विति। एकत्वेत्वा नित्यसमुपादेयं दुःखत्वादनित्यं त्याज्यमित्यर्थः। ६ इहामुत्र। इत्युपपत्तिस्त्वर्थे विगीतं
सर्वविषयान् अर्थवादपुरीवृक्षिता इति। आशंक्याह। नखल्विति। न चेयत्तो विवेकस्य स्वरूपसतो
उद्देशशास्त्रविफलता सगुण निर्गुण विवेकानन्द अस्तीति। न नित्यादिविवेकमात्रं वैराग्ये हेतुः किं
तु तदभ्यास इत्याह। अथपासेति। असत्पुत्र स्पर्शं संसारसम्बन्धे नित्यत्वादिविषयं प्रसंख्यानं नाधीतं इति
वर्तितुमस्वयः। भवी विनरक विशेषः जायस्व म्रियस्वेति पुनः पुनर्जायते म्रियते चेत्यर्थः। क्रियासमभिव्याहारे लो
डिति पौनःपुन्ये सर्वलकारापवादेन लोट्। स्यादेशस्य च विधानात्। आरभ्य ब्रह्मलोकमवी विपर्यं तज्जननमर

वै·क·१५१ गण्याभावात्तमानं दाणाघवांतरसर्पपिदीतैः कालैः संसारसागरस्योर्मिभिरूद्रैरनिशम् समानमितस्ततो नीयमान
मात्मानमसंचजीवसमूहं मवलोकोतियोजना· उक्तेपरिभावनपाद्दतामुत्रार्थभोगविरागहेतुतामाह· तात्से
ति· अनित्यसंसारस्यखर्विविदर्घिकानुमस्तीतीपान्विविकोनलभ्रसेति· तदुक्तं मीदृशास्तेति· आभोगोमुनस्का
१८ रः आदर इतिपावत्· अतदात्मिका· वैराग्यस्यशमादिहेतुतामाह· ततइति· ज्वालाजटिलस्यसंतीति· तपोवने·
अहैवतत्र विषमावित्तमस्यनगवासी तितथाभिहितः। मोक्षेच्छाभवतु कुतस्तावतापलजिज्ञासा· तत्राह·
तस्यचेति· नित्यानित्यविवेकादिहेतुत्वस्यायशब्दस्य एवगतेः किंमतः पाबंदेन त्याशंकयनानेनद्धिज्ञासा
प्रतिसाधनकलापस्यहेतुतोऽमते किंतुतत्स्वरूपासिद्धिपरिहारहेतुरभिधीयते इत्याह· अत्रैवमित्यादि·
शालूकशाकलं: अस्त्विनरशिरः कपालं त्राणंपं गत्वाछूरवंवर्द्धितस्य नारं स्पृष्ट्वास्पिसत्स्नेहं सवासाजलमा
विषो दृत्यागमविरोधः हूतकत्वानुमानानुगृहीता नेषेध्यतिवाकपात्रन्याय हीनमपामेत्यादिवाकप
मापेक्षिकात्मतत्त्वादिपरं आत्मेयमित्याह· नेपितेति· पत्वभिहितंभास्करेण नित्यानित्यविवेका
देरप्रहतेतत्त्वोन्नततदानंतर्यं मध्यशब्दापेति एवचकर्मणांद्वापि क्षुफलत्वब्रह्मज्ञानस्यचमोक्षहेतु
भूतमतः शब्देनानपरामृष्टं पुत्रमितितंभाष्यभाववाचामपानुकंपतेश्चेति। नर्हिसकलावेदांताः परामृश्येर राम
१८

न नेत्याह योग्यत्वादिति · अर्थशब्देनोक्ते हेतुकस्य मर्थे न योग्यत्वादित्यर्थः । हेतुमञ्चलं जिज्ञासौ हेतुत्वं नां
नित्यानित्यविवेकादीनां स्वत्वकारस्य बुद्धिस्थत्वान्न दानं तत्तमोर्थत्वमन्यशब्दस्य प्रकृतेनेव · चतुर्थी
समासाभावे हेतुमाह · तादर्थ्येति पाणिनिः किल चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरिति तादर्थ्यस
मासं सस्मार चतुर्थ्यन्तस्य भावस्तादर्थ्यं क्वचनाक्षिप्तैः शब्दैः समस्यते चतुर्थ्यन्तशब्दोऽर्थस्तत्त्वेन परामृश्यते तेन तस्मा इ
दं तदर्थं यथा कुण्डलाय हिरण्यमिति अत्र कुण्डलं चतुर्थ्यन्तशब्दार्थस्तच्छेषो हिरण्यं तत्र कुण्डलशब्दश्चतुर्थ्यन्तः कुण्डलशे
षवाचिना हिरण्यशब्देन समस्यते कुण्डलहिरण्यमिति · तथार्थशब्दादिनापि ब्राह्मणार्थं पय इत्यादि द्रष्टव्यं · कात्यायनेन
तु अयं समासः प्रकृतिविकृत्योर्नियमितः चतुर्थीतदर्थमात्रेणेति चेत्तर्हि सर्वत्र प्रसंगो विशेषात्प्रकृतिविकृत्योरि
ति चेद् अश्वघासादीनामुपसंख्यानमिति · एवं चार्थात्प्रकृतेन तन्त्रि षष्ठ्यन्तसिद्धिरित्याह प्रकृतीति · इत्येवमादेर्बलं जिज्ञा
सैतेवमादावित्यर्थः । नन्वश्वार्थं घासोऽश्वघास इत्यादावप्रकृतिविकारेपि तादर्थ्यसमासो दृष्ट इत्यत आह कात्यायने
नैव समासांतरमुपसंख्यातमित्याह अश्वघासादय इति · ननु षष्ठीसमासाभ्युपगमे ब्राह्मणेभ्यो जिज्ञासा व्यावर्तकत्वे
नष्टरूपत्वादव्यभिचारपरिग्रह इति भाष्यप्रत्याख्यानमंगमत्रत्याह · षष्ठीसमासेपीति · अनित्यश्चैवं लक्षणः । प्रतिपत्तौ वि
शेषणत्वेनानुबध्यत इत्यनुबन्धः स्वरूपेण निरूपितानां द्विज्ञासापोषधा तत्संबंधिनमपेक्षा व्याचष्टान द्वारा

वे·क·१९। जिज्ञासायास्स्वरूपनिरूपकमिति प्रथमोदिताकांक्षावशेन ब्रह्मजिज्ञासायाः कर्मत्वेन संबंधस्तेन तु संबंधिमात्र
तयेत्यर्थः। जिज्ञासाज्ञानयोर्विषयाधीननिरूपणत्वे धर्मद्वयं तेन प्रपंचयति। नन्विति· नन्वप्रमाणयुक्तत्वाज्जि
ज्ञासायाः कर्म भवतु ब्रह्म तु संबंधित्वेन निर्दिश्यतां· न निर्दिष्टकर्मत्वाभावे कल्पनानुपपत्तेरित्याह· नन्वित्या
दिना। संभंत्स्यते संबंधं भविष्यति ननु श्रुतकर्मत्यागायोगे स्थिते कथं शेषषष्ठीशंकात इत्यत आह· नि
२९ गूढाभिप्राय इति। प्रमाणाद्विबहुप्रतिज्ञानां श्रौतत्वसिद्धिरित्यभिप्रायस्य निगूढता। ननु ब्रह्मसंबंधि
नी जिज्ञासेत्युक्ते कर्मनिर्देशान्निरूपितत्वस्य जिज्ञासासामान्ये नेत्याह· सामान्येति· बहुप्रतिज्ञानां श्रौ
तत्वलाभात्कथं प्रयासत्वेऽमर्थ्यन परिहारस्तत्राह· निगूढेति· एकस्यापि प्रधानस्य श्रौतत्वं च वरं न तु गुणानां
बहूनामपीति। निगूढता। वाक्येति। शब्दोपात्तत्वेन साक्षात्संनिधिः प्रथमापेक्षितस्य साकांक्षता॥
प्रथमसंबंधार्हत्वेति योग्यता। एतैर्गुणैस्तस्य कर्मत्वसंबंधः प्रथमः सन्नपि जघन्यः। एतैरहितस्य संबंधि
मात्रस्य संबंधो जघन्यः सन्प्रथम इति कल्पनेव्याहतमित्यर्थः। कर्तृकर्मणोः कृतीति शब्दयोगे कर्मणि ष
ष्ठीति स्मरणाद्वाक्ये कर्मत्वं जिज्ञासापदस्य चाकारप्रत्ययान्तत्वात् कृद्योगः॥ यत्तु कर्मणि चेति कर्मणि षष्ठ्यां राम
समासप्रतिषेधः स उभयप्राप्तौ कर्मणीति या कर्तृकर्मणोरुभयोरपि प्राप्तौ षष्ठी तदुपादानप्राप्तौ कर्मण्येवेति नियम २९

ति

मिता पृच्छीत द्विषमः। यथान्यार्थेऽपि गवां दोहे गोपालकेनेति। एवं यत्रान्यार्थमप्युपेतमादि दुर्दोहितां गवां दो
हे कर्मत्वम कुशलस्य च गोपालस्याविवक्षितं त्वं। प्रकृते तु अस्ता कर्मत्वमेवोपादीयतेन कर्तृकार्तो शास्य
रस्तु न मप्रासभावात् कर्तृकर्मणोः कृतीत्येव षष्ठी तेन अल्पजिज्ञासेत्यप्यन्तः समास इति। भाष्ये प्रत्यगा
निर्देशो नपुंसकः शाब्दत्वात् कर्मत्वमत्राह। ब्रह्म वेति। अविरुद्धमपि परोक्षत्वं आत्मत्वेऽपि प्रत्यक्त्वस्य प्र
तिमोगित्वात् स्वाभाव्यात्। परमतेऽकर्मत्वस्य फलाश्रयत्वेन कर्तृत्वं च रमात्मपदाप्रसज्जनान्नपुंसकमपि तान्यस्ये
च्चविषमत्वं सोऽत्र द्वित्रासापदान्यसमीपतां नन्याय सूत्र उपदेशमात्रेण विश्वासादित्याह नेति। साक्षात्
कारसाधनं ज्ञानमिच्छाविषय इति प्रतिज्ञामफलविषयत्वादिच्छामा इति हेतुरयुक्तो व्यधिकरणत्वा
नेत्याह तद्व्याप्तमिति। फलेच्छोपाये वोपायपर्यन्तं प्रसादविरोध इत्यर्थः। भवतु ब्रह्मविषयावग
तिरिति स्वरूपावगतिः स्वविषयव्यवहारहेतुत्वेन तद्विषयोक्ता। ब्रह्मणोऽपि धर्मत्व दत्रुवत्स्वान्तःकरण
तिः पुनरर्थ इत्याह एवमपीति। अतिस्वानुभवावगत निर्दुःखानन्दमभिप्रेत्य परिहारो ब्रह्मावगतिरिति।
प्रतिभा न प्रतिभासमानः। अर्थ्यमानत्वात् प्रार्थ्यमानत्वात्। अविद्यानिवृत्तिर्न स्वरूपावगत्या नित्यसि
द्धत्वात्तत् पितु वृत्तित इत्याह अविद्येति। पदार्थान्वयापरव्याप सूत्रतात्पर्यमाह तस्मादित्यादिना। वि

वे·कृ·११। गलितदुःखेति· इति भक्तमुखतापाभिप्रायं· सूत्रेणानुवादत्वमाह तेषेतलाप्रत्ययमध्याहृत्य सेपितमणीति
किमिति ज्ञानमेषितमं वेदांतेभ्य एव तत्सिद्धेरिति· न· संदेहादिनाप्रतिबंधादित्याहतत्रेति। नन्विच्छाया
विषयसंदर्भलभ्यत्वात्स्विंतत्कर्तव्यतोपदेशेन तत्राह ज्ञातुमिच्छेति। ज्ञातुमिच्छांसंदिग्धे विषये निर्ण
यापकं भवति निर्णयस्य विचारसाध्य इति तत्कर्तव्यता श्रीकृष्णतदर्थः। आद्यं किंचित्संज्ञा नार्यं कर्तव्यपद
ध्याहारः श्रोतुस्तु मुमुक्षानंतरं ब्रह्मज्ञानेच्छा भवितुं युक्ता सैषएव तथाचाधिकारार्थत्वं अथशब्दस्य निषे
३० धहाने श्रीजिज्ञासाशब्दार्थस्योपपादनेन विरोधइति· ननु धर्मग्रहणा द्विधीनामर्थविवक्षा तत्र ह
लोकनवेदांतानां नेत्याह· धर्मग्रहणस्येति· उपलक्षणतया वेदांतानामर्थविवक्षाप्रतिज्ञाव द्वि
चारप्रतिज्ञापि तत्रैवास्त्विति [redacted] शंकोपरिप्रतिपादनादर्शनान्नेत्याह· पथ्यपीति· ब्रह्म विचा
[redacted] रप्रतिज्ञायास्तत्रसंभव मंगीकृत्य परिहारउक्तइदानीं संभव एव नास्तीत्याह नापीति· अवि र
क्षेस ब्रह्मविचारे प्रवृत्त्ययोगादित्यर्थः। ब्रह्ममीमांसारंभायेति प्राचां तंत्रेणागतयोः कामित्यादि विवे
कानंतर्यायेतित त्रस प्रथमसूत्रेण ह्स प्रथमसूत्रस्य। मुमुक्षुः स्मादित्यादिना द्युः प्रत्यगजीव [redacted] राम
प्रसिद्धेः संसारि ब्रह्मात्मत्वस्याभावात् विषयमाविविदिषे· अतत्र पत्य ब्रह्मात्मभाववेदांतेभ्यप्रतिसिद्धेरिति ३०

द्विभांज्ञोपप्रवृत्तिद्विभणामाह वेदांतेभ्यः प्रतीतं मुख्यप्रसिद्धस्य ब्रह्मणस्तत्त्वमवाधादेपामोगमपांका ह निष्प्र
पन्नानेनेति। अनिर्धार्थमिकर्तव्यत्वे वेदांतानाममुक्तं निर्दिष्टवान् दिसाह प्रयोजनं चेप्सत्येति। निष्पादितप्रतिषेधलक्षणत्रिवि
धस्य कर्मणो विधयत्वमसहकृतस्योक्तिः। यद्यपि निर्दिष्टो येदस्तथापि सामान्यतो दृष्टे निर्वचनं कवनमरूपाभा
सप्रतिबद्धः संदिग्धार्थः स्पदतो विचारात् आगामात् प्रसिद्धिं दर्शनं प्रसिद्धत्वप्रयोजकदोषमुद्धरति प्रागपि
ज्ञोन मीमांसा प्रवृत्ति। भाष्ये प्रत्यक्षा नित्यत्वप्रसिद्धताभातिकथं प्रतीतिपरत्वमारभ्येत्याशंक्या प्रत्यभिज्ञा प्रमाण्यसं
एणमानात्रचेति। मुख्यमार्थपरि अनित्यवाधमानस्यानित्यत्वस्येति। किमर्थं तं भाषे देहाद्यभेदेनेति। भेदस्ततेनशं
तत्त्वमसि वाक्यनिष्ठ तत्त्वं देहादिस्य प्रसिद्धिं मुक्तावाच्य प्रसिद्धिमाह। विधेयोपाधिरुद्धमिति। अविद्यावि
घयीकृतमित्यर्थः। शक्तिसत्ताभ्यां कारणं तेस्यते योहि जानाति शक्नोति च स करोति नेतर इत्यनु
विधानादित्यर्थः। सदेवेत्यादिवाक्यान् प्रसिद्धिमुक्त्वापवादप्रसिद्धिमाह कस्मादिति वक्तुमुपक्रमते अतः पुन
रिति। वाक्यात् प्रसिद्धस्यैव पुनरपि कुतोऽस्त्वतरात् प्रसिद्धिरित्यर्थः। ननु व्यक्तिविवादे रतिरेणापु
नेवर्तितामापेक्षिकं चेत्तत्र वक्तुम् इत्यिवस्तमेत्याह अनवच्छिन्नमिति। प्रकरणादिसंके
चकाभावादित्यर्थः। पदांतरसाकांक्षित्वस्य त्वादिबोधकं निम्नादिपदं उक्तविशेषणानामन्यत

वे·क·११। नेनापिरस्तत्वस्मन महत्त्वसिद्धिरतो ब्रह्मपदाद्युक्तवत्तत्सिद्धिरितितत्र दार्थ्यसम्यक्त्वुत्वादेरिति· समा
नाधिकरणेपष्ठौ। जीवस्य विभुत्वाद्येवं तस्य देन सामर्थ्यं तेन परार्थ्यतरमिति· प्रतिसिद्धिर्मिरानं
ज्ञातारमाकांक्षतेति· तेनभवक्षितमपि सर्वस्यैतत् दक्षित्वप्रतिसिद्धिरूपं तेन संबंधनीयं· तथा सति
प्रतिज्ञाविशेषणं सत्यैः श्रुतिकल्प्यार्थं द्योतयिष्यति· नतु सर्वस्य ममत्वात् क्षितिरिति तु विशेषणं वैयर्थ्या
दिसभिप्रेत्याह सर्वस्येति· पांक्तमंतोपादे मस्य सतथा हलं व हरीति हालिकः। सर्वस्य आलक्षितत्वप्र
३१ तिसिद्धिः सर्वो क्षितत्त्वमपेतीति स्या अहंत्वोर विशेषमाशंक्याह· प्रतीतिमेवेति· अहं न नास्मीति प्रत्ये
तीतिपो जनायां अस्तित्वं न सिध्येत्· असत्त्वनिषेधेषणनिर्वाच्यत्वस्याभिवारणात्· अतो हमस्मी
तिनन प्रत्येतीति यो जनैव साध्वीति। अहमिति प्रतीतेरहंकारमात्रविषयत्वान्नात्मसिद्धिः सिद्धौ
द्वितिशंकते। नत्वहमिति। सुषुप्तो जनानामपि आपाततः आपकप्रसंगे जनं· सान्नहि प्रतीत्याभावो
नास्तित्व प्रतीत्याभावः सुषुप्तौ विप्याभावप्रतीति[illegible] प्रसंगात् नका भेद
तिभवति तेन संबंधयत्यहमस्मीति न प्रतीयादिति· शंकितु रनुशयमपाकरोति· अहंका राम
रास्पदमिति। अहमिति प्रतिभासस्य चिद्विसंवलितविषयत्वमात्मभावे समर्थितं· तथा ३१
वि

वाहमिति प्रतीतिरात्मविषयापि अत्र तत्रात्मप्रसिद्ध्यभावेहमिति प्रतीतिर्नस्यादित्यर्थः। तदस्त्वमेतितत्व
मसिवाक्ये तत्पदस्य प्रकृतसच्चिदानन्दवाच्यब्रह्मपरामर्शिनस्त्वंपदेन सामानाधिकरण्यादित्यर्थः। ननु ब्रह्मात्मैक
त्वस्य वाक्यार्थस्याप्रसिद्धत्वेनाप्रतिपाद्यत्वात्तेपपदार्थप्रसिद्धिप्रदर्शनमनुपयोगीत्याशंक्याह तस्मादिति। प
दार्थयोरवबद्धतयोक्ताभ्यां गृहीतसंबंधपदद्वयसमभिव्याहारादेको वाक्यार्थः स्फुरतीत्यर्थः। एवं ता
सापाततो वाक्यात्पदतत्त्वप्रसिद्धेर्लक्षणः शास्त्रेण शाब्दप्रतिपादनत्वे संबंधे सामर्थ्यासाधारण
रूपविषयत्वं समाधातुमाक्षिपतीत्याह औदासेति· ब्रह्मण आत्मत्वेन प्रसिद्ध्यभावाद्वाक्यप्रसिद्धि
रूपत्वादित्याह· तत्त्वमसीति। ननु जीवीयामाइत्युक्तं भावार्थत्वे विहायात्मत्वेन हेतुना ब्रह्मपदे लोके प्रसि
द्धं आत्मा च ब्रह्मेति त्वयैवोक्तत्वादिति व्याख्यापतंतदाहि लोकपाद्धोहि कार्थः स्यात· उच्यते तत्पदार्थ
मात्रस्य प्रसिद्धिसदानन्दतास्यात· तस्याद्वितीयस्य प्रतीतिनहेतुत्वं। ज्ञातेपि पदार्थे वाक्यार्थसंदिग्धत्वे लं
पपन्ने इति। स्यादेतत् यदि ब्रह्मात्मत्वेन प्रसिद्धमिति भाष्यमनुपपन्नं· न हि महावाक्ये ब्रह्मात्मानुवादेनात्मत्वं वि
धीयते किंतु लोकसिद्धजीवानुवादेनागममात्रसिद्धं ब्रह्मत्वमतत्राह भेदविवक्षयेति। अन्यत्र हि वाक्यार्थ
बोधोत्तरकालं पदार्थानामुद्देश्योद्देयभावेन व्यावर्त्तते· अत्र तु स्वैऽवाक्यार्थसाक्षात्कारे सबाध्यत इति द्योतयि

पा

वे.क.१७। त्वमादिपदद्वयोरेकत्र लक्ष्यपदं अलक्ष्यपदे चाल्पपदं प्रयुक्तमित्यर्थः। ननु विरुद्धा प्रतिपत्तिर्विप्रतिपत्तिः सा च वस्तु
भावसाधिकेति कथं विषयलाभस्तत्राह तत्रैनेति। न विरुद्धप्रतीतिमात्रेणाभावावगमः किं तु प्रमाणमूल
मात्ततः सा[illegible]धकबाधकप्रमाणाभावे विप्रतिपत्तिः संशयबीजमित्यर्थः। ननु साधारणाकारदृष्टेः स
शयो न त्विह न्याये क्षणिकविज्ञानस्थिरभोक्त्रादावस्तिसाधारणो धर्म इत्याशंक्य विप्रतिपत्तिसमध्यानुपपत्त्यातं साध
पति० विवादाधिकरणमिति। देहात्मवादिविवादाश्रयो धर्मी परं त्वात्मनोऽहमास्पदं सर्वतंत्रैरभ्युपगतमिति
३२ मंतव्यं। तत्र हेतुमाह मय्येति। आश्रमप्रवादे विषयवाची। भिन्नविषयाविषयत्वप्रत्यो न स्फुरतो विवदमानानामप्ये
कमालंबनमविगीतं। अत्रोपपत्तिमाह विरुद्धाहीति। विप्रतिपादकवचनव प्रतिपत्तिरपदार्थस्य ज्ञानस्यतालं
त त बनत्वापत्तेः किं चिदालंबनत्वसिद्धं। वीत्युपसर्गप्रतीतविरोधवशात्तु तदेकमिति निश्चयति। एकार्थ्येऽपि निपाते
हि हिंसां विरोधः। अत्र वैधर्म्योदाहरणमाह नहीति। साधारणधर्मिस्फुरणे भिन्नशब्दार्थस्य बुद्धिसमारो
धा३ हेन हिंसारणः शास्त्रार्थस्तत्राह तस्मादिति। यस्माद्विप्रतिपत्तिरेकावलंबनापत्तत्र्यैकस्मिन्नालंबनेऽसर्व राम
वीविषयनिषेधेन विरुद्धधीरस्तीति। तस्मात्प्रतियोगितया विप्रतिपन्नैकसंबंधत्वेन तत्त्वंपदार्थतदेकत्वं प्रती
तिर्लौकिकशास्त्रीयांसर्वैरेष्टव्येति। नहि कविगानमत्राह। तदाभासवेति। लोकायतिकादीनां स्वप्रतीतिसभ ३२

सः। आस्ति[illegible]कानां तत्पदार्थप्रतीतित्वमैक्यकत्वप्रतीतिस्त्रयोग्यतायां तस्यास्त्वंपदार्थविषये संगतास्यात्तंत्व
नत्वेवविगानमिति॰ त्वंपदार्थविप्रतिपत्तिप्रदर्शनस्यावाक्यार्थविप्रतिपत्तेरपर्यवसानमाशंक्याह देहेति। देहाद्
व्यतिरिक्तकविज्ञानपर्यंतानां चैतन्यं चेतनत्वमात्मत्वमिति सर्वे। भोक्तैवेत्यात्मेति पदे भोक्तृत्वं किं विक्रियोपेतचिद्
त्मत्वं नाथः कर्तृत्वपक्षाद्विशेषाद्दित्याह कर्तृत्वेपीति॰ द्वितीयं प्रत्याह भोक्तृत्वेपीति। न क्रियापत्त्वरूपभोक्तृत्व
भावेपी सर्वे। तं ख्यातिः जननमरणादिनियमात् निर्विशेषास्त्रयश्चेतनाः प्रतिदेहं भिन्ना इति मतं निरेभिन्नानां
घटकुंभवद्विनाशजात्माप स्थिरतो न नित्यस्तत्पदार्थैक्यमिति। अथवा भेवाम्यामात्मभेदाद नित्यतात्मभेदाभ्युपग
म एव ब्रह्मात्मैकत्वविरोधीत्याह देहेति। लौकायतिकादिनिरीश्वरमतानुभाषणेनैव तत्पदार्थे ईश्वरे वि
प्रतिपत्तिः। स्फुचिताः तत्राशयब्रह्मात्मैका वाक्यार्थविप्रतिपत्तिरर्थाद्युक्तेत्याह त्वंपदार्थेति॰ वेदप्रामा
ण्यवादिनोऽपि मीमांसकादयः। शरीरादिभ्य[illegible] इति शरीरव्यतिरिक्तोत्मा इति जीवात्मनि अहंमिति कर्तृभोक्तृभ्यः के
वल भोक्तृभ्य इति स्वभाविकमस्येति। नैयायिकादिमते नेत्यर्थः। पुत्रिकिंवा करोतीति भोक्तृस्य तदुदस्य प्रत्येकं
पुत्रिकांवा क्वाभ्यां संबंधं करोति प्रकृतीति। आत्मा सभोक्तुरिति पूर्वोक्तं पुत्तिं वाको अन्यत्र तदाभासा विनीति।
अनर्थ चेयादिति भाष्यार्थमाह पिचेति॰ भाष्ये तर्कस्यापथ्यगुक्तेर्वेदांतमीमांसा किं न कौनेत्याह॰ वेदांतमी

वे॰क॰११ मांसेति॰ अर्थापत्तिरनुमानं वात्र तर्कोऽभिमतः तत्कृपा वेदांतमीमांसा तस्याश्चाविरोधिनः श्रुतिलिंगाद्य
स्तार्त्तीयाः पांचमिकाश्च श्रुत्यर्थादयो वेदप्रामाण्यपरिशोधकाः कर्ममीमांसायां विचारिताः वेदस्य प्र
समाख्यादीनां तदर्थादीनां च बलदौर्बल्यादीनि न्यायशास्त्रे विचारितानि॰ स्वत्वादिभिश्च वेदानुमानेऽनुमान
वितोपयोगः तेन वेदविहितजातिव्यक्तिपदार्थविवेके वेदस्य स्मृत्याकरणोपन्यासशास्त्रस्योपयोगः सर्वे
वेत्ते प्रमाणानुग्राहकत्वेन तर्का उक्ता इति॰ ॥ ॥जन्माद्यस्य यतः॥ ॥अनंतराधिकरणेन ब्रह्मजि
२२ तस्य मस्त विचारस्य संबंधमाह तदेवमिति॰ सकलशास्त्रप्रतीकेन संग्रहीतं विषयादिसप्त्राधान्यसमर्थि
तं विचारारंभे तमुपजीव्योत्तरविचारं प्रवर्त्तयितुं सूत्रकारेण संबंध इत्यर्थः। प्रथमसूत्रेण द्विती
यसूत्रस्यापादोपलक्षणं संगतिमाह। एतस्येति॰ मुमुक्षुणा ब्रह्मज्ञानाय वेदांतवाक्यविचारः कर्त्त
व्य इति प्रतिज्ञाया ब्रह्मलक्षणस्य विचारवत्त्वमाणयुक्तिसाधनफलविचारणमर्थात्प्रतिभाने कृत्
प्रायमंत्रलेप विचार्यते तत आह तत्रेति। अत्र पतौ वेदाध्यायिवाक्यं ब्रह्मलक्षणपतिज्ञातेति लक्षणस्य लो
कप्रसिद्धप्रसिद्धिभ्यां विशये स्वरूपं तत्माह। तत्र यथावदिति। स्वर्गाधिकरणदोषपरिहारत्वाद राम
स्यात्तत्र तत्रब्रह्मलक्षणेनिरूपकत्वात्तदीयमनेव मुमुक्षुभिर्लक्षितमोक्षलाभः प्रयोजनमिति न प २२

पगवत्तंतं।पराहाचार्यः शंकरस्वामी।आक्षेपेचापवादेचप्राप्त्यांलक्षणकर्मणि।प्रयोजनंनवक्तव्यं
पत्रस्रुत्वाप्रवर्त्ततइति।यत्रसर्वाधिकरणसिद्धांताक्षेपेणस्वर्वपक्षः।तदाक्षेपिकीमत्रानुत्तिःअतोनन
र्वपक्षः।तत्रापवादिकीसंगतिः।आग्निजद्वर्पचिंता।हत्वाप्रवर्त्तनेकस्वार्चिंता।तत्राभ्युपगमवाद
इति।सजातीयविजातीयव्यावृत्तिप्रयोजनोधर्मोलक्षणंनाम।तद्विरूपपरिदृश्यमानंजगदेव
लक्षणंब्रह्मणउतनिसृष्टुत्वादिस्वरूपमितिविकल्पनाधइन्तुके द्वितीयमाशंक्याह।नचेति।न
नुलोकाप्रसिद्धमपिवेदेनज्ञाप्यतामतआह।एवंचेति।नजगद्ब्रह्मलक्षणंकिंतुतत्स्पत्तिकारणत्वं
तद्ब्रह्मीवाविद्याविषयीकृतस्यधर्मइत्युपलक्षणमुपपादयति।मायेति॥तदाश्रमिनेति॥एकेन
तेतोभेदेनतद्धर्मतयेति॥तदुत्पत्त्याविति।तदुत्पन्नत्वेनजगतस्तत्कारणत्वंलक्षयतिज्ञाप्यतीत्यर्था
रणत्वंतुश्रेष्ठलक्षणमित्यर्थः॥अजन्माद्युपायागतेः।जन्मस्थितिलयोःस्थितिभंगयोस्तौजन्मादी
इत्युभयपदार्थेविपरीतविशेषणरूपेणविकल्प्यतेतर्हिजन्मादीअस्येतिनिर्देशगौरवंस्यात्तस्माभ्रू
दितिसामान्यविवक्षयानपुंसकप्रयोगःस्यात्तेत्यतः।तत्रनपुंसकैकवचनप्रयोगात्सामा
रमाहत्याहलाघवायेति।अधीरविषादाःकेचिद्व्याख्यानविषमाणिच।वाचस्पतुक्तं

वे॰क॰११। वा निषिद्धो विभज्य समासः। तद्गुणसंविज्ञान इति। तद्गुणसंविज्ञानो बहुव्रीहिः सर्वनामपदार्थ उच्यते। तस्य
गुणभूतस्य संविज्ञानं यस्मिन् समासे स तथोक्तः। सर्वस्य विशेषणत्वे समासासंभवात् समासार्थै
कदेशो विशेषणमिति लभ्यते। अनादौ संसारे कथं जन्मादि सूत्रार्थ जन्मन इति। श्रुत्या वाक्यक्रमपु
रस्सरं निर्दिष्टमस्त्याह। वस्त्विति। नाना [redacted] दः संसा
रस्यादिर्जन्मोच्यते किंतर्हि प्रतिवस्तु घटस्येव जन्मेवादिरिति। इदमः संनिकृष्टवचनत्वात् स्वस्य
३८ मात्रपराशित्वमाशंक्य प्रतीतिमात्रं सन्निधिरित्याह। अस्येति। सर्वस्य जगतो न जन्माकाशा
देरनादित्वात्। जगतामाह। षष्ठीति। विषयदधिकरणम्ययाप्तेः स्यात् पक्षि जन्मादिसंबंधपदार्थः। ज
गतो जन्मादेर्वा ब्रह्मणो संबंधान् लक्षणत्वमित्याशंक्याह। यत इति। आरम्भात् नेदमिदधत्याह
एवं सूत्रपदानि व्याख्याय पदत्रयमस्त्रार्थ ब्रूमेपदानुषंगे एवं तद्ब्रह्मेत्यध्याहारेण वाक्यार्थ
मा अस्य जगत इत्यादिना भाष्येण। तदुक्तं विशेषणोल्लेखेन तिर्मात्तिः परिकल्पितमित्याह। राम
स्यादेतत् स्यादिना। स्वभावमेव वस्तुनियंतेति स्वभाववादः। यदृच्छापादात्मतो न किंचिन्नियामक
मस्तीति। तन्निषेधति प्रतिविधत्ते तत्पदैः। उक्तैः प्राग्भस्तैः कथंचित् ब्रह्मवाले स्वेन मतमाह। ३८

तस्यैवेति। पदसदिति प्रसिद्धं तद्दुष्यापस्य ऽस्येऽणासदेवात्प्राप्तातुरगप्रयंगवत्कर्मत्वनिर्दे
शान्नियोगादिति सत्कार्यवादिन श्चाहुः। वैश्वानरीष्ट्यादिरिति। चतुर्थी स्पष्टा। फलसंयोगस्त्व
चोदिते न स्यादुपशेषभूतत्वात्। वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यस्मिन् जात
एतामिष्टिं निर्वपति पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीति श्रूयते। तत्र किं पूतत्वादि
तुः फलमुत पुत्रस्येति संदेहे फलस्य कर्तृगामित्वनियमात्तस्याप्रेरणानुपपत्तेः पितुरे
ति प्राप्ते राद्धान्तः। यस्मिन् जाते निर्वपति स पूत इति जातगामित्वेन फलाम्नानात् फलभोक्तृत्वेन
चोदिते पितरि फलसंयोगो न स्यात् वचनस्य तत्परत्वप्रशेषभूतत्वात्। स्वफलभागिनो नप्रेरणेति
तन्न पूतत्वादिगुणवत्पुत्रवत्त्वमेव पितुः प्रीतिहेतुः प्रेरणाविकल्पनादतः पुत्रगामिफलमि
ति॥ अत्रानेककर्तृभोक्तृ इति जीवानां स्वरूपत्वेन निर्देशाज्जगत्कर्तृत्वापोद्यते त्वा। मनसा
पीति जगतः तान्प्रति कार्यत्वायोग्यत्वेति विशेषणद्वयेन जीवकर्तृत्वनिषेधः। माहात्म्येत्
इ त्पनेनानभिमतत्वविभावनस्य जगतोऽभिव्यक्तत्वाभिधानोगाव: प्रागस हिरण्यकाद्यारभंत इति म
तव्युदासः। शेषं विशदं टीकायां। तदेवं द्वितीलदायि चितजगद्यो निरवमस जातीयत्वमापरत्र

वे॰ क॰ ११। मपरिकल्पितप्रधानादेरनेकविधजगत्प्रकृतित्वं केवलं तु लभ्यते छिन्नसजातीयविजातीयात्मस्वगुनः कार्यात्का
रणत्वादेव तथाचसजातीयविजातीयभेदकत्वेन जगत्प्रकृतित्वस्य सिद्धं लक्षणत्वं। धर्म
लक्षणेति। धर्मलक्षणावस्थापरिणाममिति अवस्थेति श्रीलक्षणपरिणामस्य सत्वोक्तेः स
चेसत्तावंतर्भवतीति। धर्मपरिणामं विवृणोति। धर्मिणोमिति। कनकादेर्धर्मिणो धर्मरूपपरि
णामो नाम कटकादिरिति तिस्रोवस्था क्रियास्तत्र निरूप्य मारोप्य रिणशब्दालंबनेन सुकरकादे
२५ र्महिमास्थित उभ्यतीतिरिसर्पः। लक्षणपरिणाममुदाहरति। एवमिति। प्रत्युत्पन्नत्वं वर्तमानत्वं
न टकादिकार्यस्य वर्तमानत्वातीतत्वभविष्यत्वरूपो लक्षणपरिणामः सो प्युत्पत्तिरिसर्पः। अवस्था
परिणाममुदाहरति वर्तमानस्येति। अनागतातीतादेरेवातीतत्वातीततरत्वातीततमत्वादिरूपो नवपुरा
णत्वाद्यापत्तिरवस्थापरिणामो नाम सचोत्पत्तिरिवेरसर्पः। अथ द्रव्यस्य विनाशेतद्भावमाह्लप
रमतत्त्वति। तच्चनष्टकारणेति। पुरुषार्थाणं अतिमतरेणतौ क्रिया पार्थदर्शनं सामर्थ्याभाव
स्त्वर्पः। नचवस्त्वविकारकल्पनादेवनष्टकारणं द्रष्टत्वमनुमेयमस्याप्युपपत्तेरित्याह। राम
महासर्गादिति परमकारणं तुस्मान्धोनगृहीतादतिशंकापनुत्तये पोस्तिर्बलणोपत्ते ३५

वेतिवाकोजायंतइत्युत्पत्तिरभिहिता पावत त्रैवस्थिति जीवंती स्तुत्काप्रध्वस्त त्रैवप्रलयो भिसंवि
शंतीत्युक्तं जन्मस्थित्यादयः सूत्रेणइत्यस्यार्थः। तत्रोत्पत्तिमात्रादेव लक्षणस्य लक्षणमाव
भि त्तिसिद्धौ स्थितिलयोपादानं माशंक्यानिवृत्त्यर्थं तावोक्त उत्पत्तिमात्रमिति। उत्पादकत्वं निमित्ते
दृष्टमित्युपादानसिद्ध्यर्थं लयापादानमुक्तमित्यर्थः। नन्वेवमपि तस्यैवाधारत्वादेवोपादानलोम
तेनहि दंडादिषु कुंभाद्यलीयंते इत्यतरवेषम्यम्। नैवमुपादानत्वमेवनकुलधर्मस्तथापि तंतु प्रव
तिविकाराभेदप्रयोगेनापितृसिद्धेः एवं च भवतु ब्रह्मजगत उपादानमधिष्ठाता उत्पत्तिस्थितिलोर
मः स्यात् कुंभकारइव कुंभस्येत्यसौ तौ राजेवचरा उत्पत्तिमात्रं कीत्युत्पत्तिस्थिति ग्रहणमित्यपि
लक्षणस्य केवलव्यतिरेक्यनुमानादेव प्रसिद्धिः ब्रह्मप्रमितेः शास्त्रयोनित्वसमन्वयाधिकरण
यो वै [illegible] पर्थ्यमित्याशंक्याह। तद्वनेनेति। ब्रह्मज्ञानाय वेदांतविचार आरभ्यत इति प्रति
ज्ञा। विशेषणत्वेन ब्रह्मविषयत्वप्रतिज्ञा विषयस्येतु लक्षणं किमित्युक्तस्य बुभुत्सानोभ द
मवगममिति। इदृशात इति। तत्स्वरूपं वा न सत्त्वं। कार्यं न च कारणं किंचिदस्तीति मितं। तत्वेक
मनेकं वेतिसंदिग्धं तस्य यदेकत्वं स तत्स्वपतितदाभवति तत्सर्वज्ञं सर्वशक्तिरूपेनेतरधात्रय मे

वे॰क॰भा॰ वसंशयः। कल्पनालाघवसंभवात्तर्केणोत्कटैककोटिकसंभावनोपनीतः। संभावनासम
भवेन निर्णयः। विचित्रप्रासादादीनां बहुकर्तृकत्वस्य ग्रामेण दृष्टत्वात्तदिदमुक्तं संभावनो
न्नेति। एकं च बहुसमाधिकरणदृष्टेन प्रमाणं वाक्यमित्यर्थः। एतदेवेति भाष्येण युक्तीनामसं
संभावना हेतुत्वं दृष्टोक्तमित्यत इत्याह संभावनामेति। नैयायिकैरपि प्रमाणादस्माभिर्भेदो नाङ्गीक्रियते पिपु
क्तीनामित्यतो वा [illegible] प्रमाणेन हीनत्वे केवलसंभावयतीति तदाभित्यर्थः। हेतुरूपावेनेति। उत्तरा
३६ धिकरणे भासाकृताणमविशिष्याणमनुपपत्तिशंकामात्रं हितिवृत्पर्यस्मर्थः॥ अत्रेनावेदविन्मनु
तिचेष्टितं नैषा तर्केण मतिरापनेयेत्यादिशास्त्रोत्प्राणमयुक्तावचवेदकमन्त्रं समावत्त इत्याह। परि
न हरतीति। वाक्यार्थविचारणे शब्दे शाब्दबोध उपासनासहित उक्तः। परस्तादवगतिरेवेति मध्येऽवसान
शब्देन युक्त इत्याशङ्कानायं ज्ञानवचनः। किं तु संस्कारसहितलयविक्षेपाविद्यासमाप्तिवचन इत्याह। स
वासनेति। वृत्तिरूपस्य ज्ञानस्य संस्कारस्याविद्यायाश्च स्थितिर्नो मध्ये विद्यमानत्वेऽपि न सोऽवसानशब्देन गृहीतः। राम
उक्तक्रियानिवृत्त्यास्वरूपाभिव्यक्तिं प्रतिमवधानादिति। विमतं चेतनपूर्वकं कार्यत्वाद्धित्यादिवदिति।
श्राद्धाविरोधिनी वस्तुविशेषनिर्धारणेन तदुपजीविनीति वक्तुमसंभवात्मैकात्म्यस्य केवलयुक्त्यगो ३६

वस्त्वाभावादित्याह तदुपजीवित्वेप्यपीति। यथा हि किल गंधारदेशेभ्य आनीय चौरैररण्ये कश्चिद् जंतुप
द्धनिक्षिप्त आप्तोपदेशात्तदुपदिष्टस्स्वसामर्थ्येन गन्तव्यं हितत्वात्पंडितः स्वयमूहापोहक्षमतया च मेधावी
गंधारान्प्राप्नोत्येवं परब्रह्मणा अविद्याविवेकरहितं निरूपाविद्यादिभिः संसाराररण्ये निक्षिप्तो जंतुः
परमकारुणिकगुरूपदेशात्स्वस्वभावं प्रतिपद्यत इति भाष्यस्याशयः। ननु कथं ब्रह्मणो मानांत
राविषयत्वे कुतो मननं न स्यादिति तत्राह। शब्दाविरोधिन्यैव लिकारणासम्भवत्तुलादृष्टौ युक्तिः शब्द
मुपजीवति न स्वतंत्रा कारणमात्रेऽसंभावयंतीति फलितं ब्रह्मानमानांतरमिस्यर्थः। भाष्यस्यानुभ
वशब्दार्थमाह तत्फलकरणोति। ननु कथं वृत्तिः प्रमाणमिति भाष्यस्य उक्तिर्निःफलत्वादित्याशंक्याह तद्धे
ताविद्यानिवृत्तिद्वारा स्वरूपाभिमत्तिरूपचारात् [illegible] फलमत्तीत्याह तस्येति। धर्मजिज्ञासायामिव सा
ध्यस्य प्रमाणानिसुतंत्रे वेदविषयं श्रोत्रस्यावाधापेक्षणादित्याशंक्याह ज्ञातमेवमें न सा आत्मकारतदुप
योगिपुरुषार्थीनां संभवो ब्रह्मजिज्ञासान्तरस्या कालाकारपर्यंते न ताहृम धर्मजिज्ञासादिना। न केवलं ब्रह्मजिज्ञा
सायामनुभवादीनां संभवः किंतु तत्त्वसाक्षात्कारपर्यंततेणपरोक्षसंस्कार [illegible] प्रमवृत्तिव्यसपोगात्तेन विनानं
पर्यवसानं चेसाक्षादनुभवार्थेति। ब्रह्मजिज्ञासायामिति सप्तम्यंतपदं वक्ष्यमाणत्वेन विपरिणामप्यानुभ

वे॰क॰ ११ वावसानत्वा ब्रह्मजिज्ञासाया इति भाष्यं पोऽहं॰ अनुभवो ऽवसाने समाप्तौ फलत्वेनयस्याः सा तथोक्ता ध
र्मजिज्ञासायां त्वनुभवः कारणत्वेनोपक्रम उपयुक्त इत्यर्थः। इहानुभवः स्वतः साभिव्यक्तिर्निवृत्तिः तत्र हे
तुमाह परेति। न वृत्तिरनित्यत्वादिद्वारस्य पुरुषफलं फलमित्यर्थः। तदनुभवस्य वृत्त्वित्यत्र वृत्तिरूढाद्वार
वकारेण तत्फलता विद्यानिवृत्तिद्वारेण स्वरूपाभिव्यक्तिरशकातरेति सूचितं। भाष्ये भूतशब्दः परमार्थ
३७ वचनः चशब्दः शंकानिवृत्त्यर्थः। व्यतिरेकः प्रपंचाभावोपलक्षितस्वरूपं तद्विषयसाक्षात्कारस्य विकल्परूपो
ब्रह्मणस्तद्विषयविषयिभावरूपः संबंधोऽस्ति न तु तत्त्वतः। उक्तं हीदं प्रथमसूत्रे व्युत्पत्तिविषयत्वम् इति मेवो
पहितस्य न निरूपाधेरिति तन्नप्रसक्तं तेअमित्यर्थः। अनर्थ्यं कर्तुमित्यत्र कर्तुमित्यस्यानुषंगो भाष्ये कार्यः क
रणापेक्षत्वादनर्थ्याकरणस्य उदितेहोमः कर्तुरकोनुदितेत्वनपेक्षते त इत्याह कर्तुमिति। भाष्यस्य विध्या
दिभाव्दानुदाहृतवाक्ये प्रयोजयति इति कातीत्यादिना। नारं स्पृष्ट्वास्थि सस्नेहं सवासा जलमाविशेदिति
नारास्थिस्पर्शनिषेधः। शिरः कपाली ध्वजवान् भिक्षाशी कर्म वेदयन्। ब्रह्महा द्वादशाब्दानि मितभुक् राम ३
शुद्धिमाप्नुयादिति। ब्रह्मघ्नः शवशिरसो नारास्थ्नो ध्वजत्वेन धारणविधिः। भाष्ये प्रतिषेधमाति
न हेत्वन्तमाह एतदुक्तमिति। स्वातंत्र्येण कर्तुं सामर्थ्यं पितितपतितोपायत्वम् अजानन्त बोधकविधिनि ३७

विक्षेपशक्त्यसर्पः अंतःकरणाज्ञविलानां द्वैविध्यमात्मसंबन्धेनेति॰ जाग्रद्वासनावासितं मन एव स्वप्नका
रणं॰ जाग्रत्संस्कारविपर्यासाः संस्कारसहितांतर्वृत्तिः करणजाड्यसर्पः। पश्चात्स्वप्नत्वेन त्वनुसारित्वपास्त्रं
नादितात्पर्योक्ताः। नवविरतिसंस्थापानविकल्पयंति विपर्ययानामप्यपती सर्पः। स्वात्सिद्धिः क्रियाणामपत्र्याद्वि
ज्ञितिवान्यप्रपत्तिलोकः। प्रत्यगात्मनस्त्वविषयत्वमितिश्रुपरो वाक्यात्मगात्मप्रसिद्धिरित्यत्रैति उपरिष्टान्ने
कपादेः। उपपादितं वेति॰ विमतं धीमत्कर्तृकं कार्यत्वाद्घटवदित्यनुमानान्नेश्वरसिद्धिः। जीवजत्वेन सिद्धसाधनत्वादु
पकरणाद्यभिज्ञकर्तृकत्वसाधने कतिपयतदभिज्ञतामांसर्वज्ञासिद्धिः। सर्वतदभिज्ञत्वे सपक्षासत्त्वासाध्यहो
नत्वात्॰ कुंभनिर्मितवतः कुंभकारस्य चैत्रकुम्भो मणित्वनवबोधासाधारणेपिति उत्साधकत्वात्मनः संयो
गस्योपलब्धेरभावादमनस्कस्याप्यैश्वर्यादुपलब्धिसंभवे ततएव विनैवोपलब्ध्याजगन्निर्माणसंभवेनोपल
सापि ब्धिमत्कर्तृकत्वस्यैव विलोपेन व्याप्तिः द्वैतोमूलोच्छेदात् सर्वमप्यकरणिकाया अनुदपादीति॰ उपरिष्टात्समन्व
यसूत्रे॰ जन्मादिसूत्रेण यतो वेत्याद्वाक्यं लक्षणमिति भाष्ये उक्तं तदर्थं श्रुतिस्सूत्रे वा रथ्यप्रसभितं दर्श
पतिष्कृतिरिति॰ अत्रोपलब्धकर्त्तापरात्वं सत्वेस दर्शीयितं तस्य चेति भाष्ये तदाचष्टे॰ऽत्रैवेति॰
जगद्विशेषणेः सर्वनिर्णयेपि श्रुतितद्विनिर्णीयते॰ कारणं ब्रह्मानन्दवाक्येनानंदत्ववि

वे·प·११ धानात्तच्च स्वरूपलक्षणे सिद्धिप्यानंदः सत्यादिस्वरूपलक्षणं· ननु आनंदादेर्भेदेन स्वरूपलक्षणत्वं· अ
भेदे वाक्यार्थासिद्धिः। गुणभूतपदार्थविशिष्टः प्रधानपदार्थो हि वाक्यार्थः। अत्रोच्यते·
यत्र पदार्थः प्रमितस्तत्र स्वेतरपदार्थविशिष्टः प्रतिपाद्यः। प्रकृत्वनातः सनात्मेः शाक्योकि
ष्टमिति स एव वाक्येन प्रमेयः। प्रमिते च तस्मिन्वाक्यसमानार्थे विशिष्टपरत्वं। यथा प्रकृष्ट
प्रकाशश्चंद्र इति प्रकर्षप्रकाशद्वारा चंद्रलक्षणे न तु वैशिष्ट्यं मानांतरादेवक्तत्सि
२८ द्धेः। अप्रमितस्य वैशिष्ट्यं अखंडचंद्रस्तिद्धौ सत्वाविरोधात्र्चेद्वैतेनानुपायते। सत्यादिवाक्यत्वनं
तावत्पदैर्बाध्यते वैशिष्ट्यं। एवं चाविशिष्टमपर्यायानेकशब्दप्रकाशितं एकं वेदांतनिष्णाताअव
ऽप्रतिपेदिरे। ननु चंद्रलक्षणे भिदं ततश्चंद्रइतरस्मादिन्न घटेतेच द्रशब्देऽमेव हंतो वा प्रकृष्टप्र
काशत्वा व्यतिरेकेण तमोवद्व्यतिव्यावृत्तिविशिष्टस्य वाच्यत्वविशिष्टस्य वा वाक्येन प्रतिपाद्य २
त्वमिति· तन्न· अप्रमितेचंद्रव्यावृत्तेरबोधान्प्रमिते विप्रमाणांतरात्प्रमितिलक्षणवाक्यवाप्र
प्रमेयासमानतः प्रमितिविशेषतो वा अप्रप्रश्नः सामान्यस्यैव व्यावृत्तिसिद्धौ चंद्रस्य तदासिद्धि राम
प्रसंगात्। नवरमः। विशेषग्राहिप्रमाणादेव व्यावृत्तिसिद्धौ लक्षणवैयर्थ्यात्· न द्वितीयः· लक्ष २८

णवाक्याच्चंद्रप्रमितौ तस्य तत्रैव पर्यवसानेनाव्याप्तिप्रसक्त्वानुपपत्तेः। न च चंद्रशब्दवाच्यत्वं साध्य
ते: अथ चंद्रत्वं चंद्रशब्दवाच्यत्वसाधनेनाव्याघातात्: अथ एवं चंद्रत्वमप्यभिप्रेतम्। चंद्रशब्दवाच्यत्वं साध्यते
मे तर्हि चंद्रत्वे साध्यतामवश्यमापद्येदिति तद्वारणाय मप्रकृतवाच्यत्वकल्पनेत्युक्तं तस्मात् प्रकृष्टप्रकाशत्वं तत्र प्र
काशत्वमज्ञातं चंद्रज्ञापकं यथा अव्याप्त्यादिसिद्धिः एवं चैतद्रूपात्तात्पर्येण पदेन प्राचुर्यमुक्तं तावता
परेणाभिधाने पर्याप्तत्वमधिकाभिधाने विशिष्टं एव वाक्यार्थत्वापत्तिरिति। वाक्यार्थतानां तात्पर्ये
षु त्वाल्लक्षणस्यैव कल्पनान्तर्भावे चंद्रत्वमपि न चैलक्षणस्य विशिष्टार्थत्वाल्लक्ष्ये विशिष्टं स्यात्॥
ने हि भवेति सामान्यवत्त्वे सत्यवेसम द्रव्ये यथा प्रयत्नविशिष्टमित्यनित्यत्वमपि विशिष्टं तर्हि अति
व्याप्तिस्पेवलक्षणेनात्मत्वाल्लक्ष्यस्य अलक्षणः सत्ताघात्मकत्वे नस्यादिति चेन्न तदर्थि पतः सत्ता
दीनां जातीनामभिव्यक्तादात्म्यदर्शनात्स्वरूपमतिरपि श्रुत सत्तादि न जहातीति नः। इदं हि कल्पि
तमेदं तच्छ्रितेः सामान्यैः प्राप्यतां सौलक्षण्यतो नाम रूपत्वं न जहातीति तं गच्छंद्रानुगतं चंद्रत्वेन ल
क्ष्ये चंद्रस्मृतिरिवं चंद्रात्मत्वमेवं अलापिमापाकार्यकुंभादिकल्पितमरूपानुगतसत्तमालक्षणमा
त्रस्य तेन हास्यति तथा ज्ञानत्वेनं दृष्ट्वाभ्यामप्पत प्रकारेण वस्तुप्रधानलब्धभेदविधानं दविशेष्य

वे॰का॰।१। नुगताभ्यां लक्षणाभ्यां चिदानंदमयकोशयोरपि यो ऽयमभ्यासस्तद्भेद औपाधिक एवं सति तत्र ज्ञानानंदयोर्भे
दोपि स्यात्स्वरसि तज्ज्ञानानंदयोः अन्यत्वप्रसंगाद्बोधात्मत्वरहितत्वात् तत्र अभानाभावप्रसंगात् दृश्यत्वेऽपि
तत्वेन सत्वायोगात्तस्य बोधात्मकस्यापि अपरमप्रेमास्पदत्वेनानंदस्वाभाव्यावगमादिति। तथा च
कल्पितस्यानात्मतद्रूपेष्वेव अनृताकारबाधेन सत्यज्ञानानंदात्मकं अवशिष्यते। प्रयोगोपि सत्यादि
वाक्यं विशिष्टार्थपरत्वरहितं लक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चंद्र इतिवदिति तथा। उपाधिभेद
३९ भिन्नार्थो ह्येकः प्रतिपाद्यते तदपि स्यादखंडार्थं महत्त्वं कुंभत्वं यथा। निरंशस्य जीवस्याणुत्वम
नंतत्वं वा स्यात् तत्र नाणुत्वं सकलदेहव्यापि सुखाद्यनुपलंभप्रसंगाद्विभोश्च न भोक्तृत्वमनंतत्वावांतरजा
तनाधारस्येश्वरादन्यत्वायोगात्तस्मादनंतस्यैव सतो नास्य पारिच्छेद औपाधिकः अस्मिंश्च जीवस्य परस्मा
दौपाधिको भेदः यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्नुपाधिना क्रियते भेदरू
पो देवः क्षेत्रेष्वेवमजोऽयमात्मेति॥ ॥ नन्वेवं भूत ब्रह्मणः कथं जगद्योनित्वमत आह। एतदिति॥ शा राम
स्त्रयोनित्वात्॥ ॥ अत्र हेतुमात्रं प्रतिभाति नैतज्जगद्योनित्वे साध्याविशेषादसंगतिमाशंक्या
र्थिकप्रतिज्ञयासंगतिमाहेत्याह॥ सूत्रांतरमिति। अथवा वेदनिःश्वासत्वाद्ब्रह्मणो विश्वयोनितान्ने ३९

तिथं कामपाकर्तृत्वशास्त्रयोनित्वमुच्यते। अस्मिन्नध्याये श्रौतप्रतिज्ञामेव संगतिः। अथ श्रुत्यर्थं त्वे
नहेतुत्वेन रूपं परिहरति न केवलमिति। स्वतन्त्रसमर्थना प्राधिकरणोत्तरत्वात् अस्यमहत्त्वं इतिवा
क्यं ब्रह्मणो वेदकर्तृत्वे सर्वज्ञत्वं न साधयत्युत साधयतीति वेदस्य सापेक्षत्वप्रसंगाप्रसंगाभ्यां
संशये पूर्वपक्षाशंकां निराकरिष्यते सिद्धान्तोपक्रमभाष्यं मावष्टे नानुवर्णितं पादिना। पुराण
मायमीमांसाधर्मशास्त्रषडंगानि दश विद्यास्थानानि · तपातमा द्वारेति · सृष्टिवाक्यापेक्षि
तसर्गादिप्रपंचनद्वारा पुराणम द्वैतपरं जातिव्यक्तिलक्षण निरूपणेन न्यायो वैदिकपदार्थ
शुद्ध्यर्थः शेषोपयोगस्तु प्रसिद्धः। उक्तमर्थं प्रमाणमतीतिति · अत्रायं भाष्यविभागः। महत इत्यारभ्य
ब्रह्मेत्यन्तेन निष्कर्षिता अस्याविभक्तत्वे रेत्यस्य शक्तमा ब्रह्मकार्यवेद इत्युक्तं न हीदृश
स्येत्यारभ्यासीत्यन्तेन व्यतिरेकमुखेन सर्वज्ञत्वप्रतिज्ञापदृष्टादिनालोके इत्यन्तेन व्या
प्तिरुक्तेति। विस्तरत्वं शास्त्रविशेषणं व्यासानुपयोगात् व्यर्थमित्याशंक्य महाविषयत्वा
दिद्रस्य अनुष्ठानेन तुल्यविषयत्वभ्रमनिवृत्तिः प्रयोजनमित्याह विस्तरार्थमिति · यस्मा
दित्यस्य तस्येत्यनेनान्वयः तेन संबन्धमाह वेदस्येति · इदमित्यनुमानं। ब्रह्म · वेदविषया

वे॰ऊ॰१।१। दधिकविषयं तत्तत्कर्त्तृत्वाभिप्रायं प्रमाणकर्त्ता स तद्विषयादधिकविज्ञानोपेतो यथा पाणिनिरिति सर्वा
वभासकवेदकर्तृत्वेन पक्षधर्मताबलात्सर्वज्ञसिद्धिरिति। यद्वा। अयं घटः एतदन्यासर्वविल्कर्तृकत्वान
धिकरणेतदन्यावेदत्वानधिकरणसकर्तृकान्यः घटत्वात् घटान्तरवदिति। ईरणादिप्रयत्नापेक्षत्वादप्र
यत्नशब्दः सोऽकर्म्या ये त्वाहुस्तान्हन्तिवदिति। अधुना पूर्वपक्षे आरंकानि राक्रियते कर्तृमत्वेन वेदस्य सापे
४० क्षत्वं वदन्त्प्रष्टव्यः सापेक्षता किं पुरुषनिर्वर्त्यत्वमात्रादभिनवानुपूर्वीविरचनाद्वामानान्तरोपलब्धार्थवि
षयवचनरचनाद्वा। कतिपयकालविरतसर्वसंप्रदायस्य वेदस्यैकपुरुषनिःसरद्वानाघत्तवाविसम
त्वादित्याह। येपितावदिति। अभिरभियुक्तैः द्वितीये आनामस्वमात्रमभिनवत्वं वि सदृशमस्तं
वाधोभवद्भिरप्यंगीकृतः चमरत्ना स्नाभिरपिस्वीकृतइत्याह। तस्मान्न नैतित्तीयमत्वनभुपगमन्ति
स्तइत्याह। वैष्णासिंकत्विति। अनुवर्त्तमानानाअविसौतेइत्यनुषंगः। ननु निर्वर्त्यकत्वे वेदानां पाद्धि १
केत्वापातान्न्तकमतियमः स्यात्तत्राह। यथाहीति। सर्वज्ञस्य सर्वशक्तेर्बोक्षणेनोपाध्यायवत्क्रमानुरो राम
धो युक्तइतितत्राह। यथा त्रेति। मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। सवाग्वज्रो ४०
यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् इति श्रूयते। चतुर्थं निराकरोति। नचैकस्येति। स

र्यसंप्रदायाविच्छेदसिद्धिरविसंप्रदायप्रवर्त्तकेष्वाप्तत्वासंभवात् सर्वमेकस्मिन्नेव ब्रह्मण्येवग
तमार्थवद्दृष्टव्यस्तत्त्वत इति भावः। ननु नैवयमीक्षावंतं पश्यामः कथं तत्त्वेकस्य वेदे विप्रलासस्तत्राह। सर्वविद्वन्मु
खामिति। तत्तु समन्वयात्। वेदांता ब्रह्मणि प्रमाणं नवेति सिद्धवस्तुबोधात्फलेभावाभावाभ्यां सिद्धव
पादिहीनं वस्तुबोधयतो वाक्यस्य मानांतरसापेक्षत्वानपेक्षत्वाभ्यां वा संशये पूर्वाधिकरणसिद्धांतिप्रवा
केनाक्षेपिकीं संगतिमुक्त्वा पूर्वपक्षं भाष्यं व्याचष्टे। किमाक्षेप इत्यादिना। कथमिति पुत्रस्तस्मात् तः क्रियार्थत्वादा
म्नायस्य। जैमिनिसूत्रोपन्यासो न्यायसिद्धत्वलिंगं तथैवाभासावित्युक्तः पूर्वपक्षनिरासार्थसिद्धांतावष्टंभा
र्थस्तावत्पारमर्षमिति। अभिधेयाभावोनुभवविरोधान्नयुक्तो वक्तुमित्याह। नर्थकं चेति। भाष्येपोनहस्तमार्थ
कासंग्रहविवरणत्वमाह। तदुत्पत्त्यादिवान्त्वमिति। उपासनादिक्रियांतरविधानार्थत्वं वेदांतस्येत्यर्थः। न
नु किमिति वेदांतानामर्थवादवद्विधिपदैकवाक्यता मंत्रवत्पार्थगत्यर्थमुक्तिरत्यादौ कातद्विधिभिर्वा
कैकवाक्यतात्सादित्याह भाष्यकारो मंत्राणां चेति। इषेत्वेत्यत्र शाखां छिनद्मीत्यध्याहाराच्छाखाछेदक्रि
मलतं दोषमनुवदतीति युक्तं। तथा सति प्रसिद्धत्यागात्रात् त्यागे च वैदिके पि दाने स्वत्यागजन्यदुःरवि
न वरुणो गृह्णातीति भवति यतः तत्र शङ्कः तस्मात्प्राप्तस्यानुवादकोऽर्थवादोऽयं ततो यज्ञसंबंधिनि दाने इष्टिरि
ति॥ ॥ तत्तर्कतस्याः कर्तेति चिंता। तत्र अचोदिते च कर्मभेदात् दातुरचोदितमिष्टिकर्मण्यः प्रतिग्र

कल्प० २ ह्वानिसन्निर्वपेदितितस्य प्रतिग्रहीत्रा भेदाद्विरोधश्च इति । न सिद्धान्तस्तु सालिङ्गाद्दातृविषयेस्याच्च ।
कालविज्ञामयजिस्यात्विंजोयजमानः तस्मात् [redacted] ते ह्वि: स्यात् प्रजापति र्वनुरागायामेष मनुयदि
स्तुपञ्च भेदात्कीर्तनाल्लिङ्गाद्रुपन्नमाधीनत्वाच्चैकस्मिन्स्वाकर्यस्य पूर्वसंहारस्य प्रतिग्रहीतीति चप
तिग्रहकर्तृत्वमुच्यते । दानादि प्रतिग्रहं करोतीति संप्रदानं येरणादितो ततः प्रतिग्रहीतीति दातर्पप
वितृकमिति ॥ ॥ पालव्याप्रचनादर ॥ ॥ सोमेन्द्रं चरुं निर्वपेच्छ्यामाकं सोमवामिनइति श्रूयते
ते चास्य प्रतिग्रहे ह्या याधिकरणं पूर्वपक्षे वक्ष्यौ किके धातुसाम्यार्थं पीतस्य सोमस्य वमने यागः इन्द्र
सौपते येणवीर्येणव्यृध्यते यः सोमं वमतीति निर्देशाच्च । वमननिमित्तैन्द्रियशोषस्य दर्शनात्तन्निवर्त्तनाय ग्रह त
वदयानि रित्यधिकाशंका । वैदिके तु सोमपाने शेषप्रतिपत्तेर्जातत्वाद्वमने पि न दोषइति । सिद्धान्त
स्तु लौकिके धातुसाम्यार्थत्वाद्वमनस्यानर्ज्ञात्वेंद्रियशोषस्य धातुसाम्यकरत्वान्न दोष तावेदेतत्सो
मेवाकृतात्मिमतीगाइति समन्वकजरणार्थमंत्रलिंगाद्वमने कर्मवैगुण्याद्दोषइति ॥ आग्निमारुतेति राम
॥ आग्नि मारुतात्रि: ॥ तस्याधनानि शार्करादीनि । अधिकारि पुरुषः स्त्रह्या । तस्मादिति प्राणा अपितमोवद २

र मि

अस्मरणेविकारहन्त्वपरिसंबध्यते प्रदयशीतं प्राणोत्पत्तिश्रुतीनां ख्यातिविख्यानात्सर्वविज्ञानप्रतिज्ञा
सिद्ध्यर्थस्य चोत्तरस्य संदर्भस्य प्राणस्य हिपरस्य प्राणाग्नुज्वर [redacted] तीत्यादेरनुग्र
टी हायतत्पान्माणानपेक्षाशक्तिरुपपन्नायेति योजना। उपवासकार्श्यपोषधदाहइतिवोद्वाक्षिकरणाउक्तं तत्रां
का तरतयैसंतुत्पत्तिरतस्केपेति अविद्यादिवदनायधावसिद्धत्वेसाहिराण्। एवंवधानाह स्तुत्तुद्देतुपलंभ
प्रसंगादित्यर्थः। तत्सामान्यादितिवः। अन्नादीनांक्रासेक्रासाहृद्धौवृद्धेर्हिमनआदीनामन्नादिमयत्वं
श्रुत्योच्यतेतदिंद्रियांतराणामपितुल्यमित्यर्थः। वृद्धाकर्तृकायांनामरूपव्याक्रियायांविषयेयावुपक्रमो
पसंहारौतात्पर्यालोचनयाहितुतौ तेवस्तृहिरि[illegible]रनयः॥ ॥ सजन्चंद्रक्षेपक्लेसतम्यः प्राणोमस्तवंपादा
र्थस्यविवेकोज्ञातव्यः सिद्धांतेरुकादशत्वप्रभृतिप्रयोजनं। यत्कलेनेत्यस्यव्याख्यानंवंधनेनेति रजोत्याद
नेनेंद्रियाकर्षकत्वादृषिषयाणामतिग्रहत्वं प्राणाइतिघ्राणेंद्रियंतद्ग्राह्ययोगंधत्वापानेनगंधजनकाणां
हितस्मादितिवाहः। अपानेनहीति अपस्वाँसेनेत्यर्थः। अधिष्ठानेनात्मोति इंद्रियाणां [illegible] तीतिशे
षः। स्पर्शानांत्वगेकायतनस्पायत्यः ग्राहकत्वात्। ननुजीवरूपाः प्राणाःस्तेनत्वक्तेर्थादश्रिरस्याः प्राणान्त

अपानइतिचगंधः॥३॥

कल्प
२

न्येसतीति गम्यते अत आह। येसमेति। नेह शीर्षरायान्तारम्भानुदिश्य समत्वं विधीयते। अपितो वयमा
नस्यानुवादत्वापत्तेः किंतु शीर्षण्यान्तस्य समत्वोपादानं तु द्विरूपशालात्वं तथा च शास्त्रान्तरस्य त्याज्या। इति
फलमित्यर्थः। ननु षट्त्वादिसंख्या अपि प्राग्वंशस्य यन्ते न च तत्र समत्वे अंतर्भवंति। अंतर्भवंति त
त्रास्तु समत्वमतः कथं संख्यामतिरेकमत आह। यद्यपीति। इह रूपोपलक्ष्यादिकार्यवशाद्द
माना छन्दहीनैकादशत्व श्रुत्यैकादशोद्विंशतीति सिद्धान्त्यनेन तद्युक्तं अतः परतः प्रारम्भसंग
दित्यासंक्वाहुः यद्यपि अनयइति। अतितांपरस्परविरोधाद्दर्वीषकल्पन्नमेन हृदस्येलतात्यर्थतिसं
याप्यानुमानानुसरणमित्यर्थः। स्रुवेणेति॥ ॥प्रमाणान्तरतोमिहितं। अथाहवकल्पेनैक दशत्वा
त्। स्रुवेण बघाति। स्वधितिनावद्यति। हस्तेनावद्यतीति स्रुयते स्वधितिरुभयतोधारः क्षुरः
अवदानं वास्ति। द्वारणामाज्यादीनां संहतानां चमसादीनां तत्राविशेषप्रवरणादानियमे प्राप्ते
नियमः अत्र कार्यार्थविध्यसंभवात् विधिरेव यथासामर्थ्यं विधीयेत अपवादस्यापद्यतेति शालस्य स्रुवे
ऽव स्थावदाने स्वधितिर्मांसस्य हस्तस्य पुरोडाशस्य तत्सादर्थ्यात्सामा यो तर्कलनाद्वयस्या। सा

राम
२

मर्थस्य योगनात्कृपस्य हस्तःस्वउरोद्वारस्यतस्मादर्थो वोधकेक्वदेशतत्वादिति॥ ॥मततात्स्वेशाया
दिकृपदि [illegible] वारकरणादित्यर्थः। भेदे भमाराणामावादिति। चद्रो वइवशादोपलब्धौ द्वित्तिमत्वात्तमो
ध्यवसायादिकार्यव्यतिरेकात्तवगमादित्यर्थः। [illegible] वद्युत्वावादेनेति। ननावत्स्य मवेशीर्षरूपाः प्राणाद्
निति रस्रानार्थवोधनपरा समातिर्द्वैपयति सहवैशीर्षरूपाः प्राणाश्रिरस्ते प्रज्ञस्यपटुरकाशीर्ष
जैवयज्ञस्य प्राणान्द्व धातीस्वरवा द्वपनत्कातिपरत्वात्तस्य समनिर्वस्यवस्य द्वपर्यलिंस्यादिमं वैरित्यर्थः
ततः प्राणां तरवाहतिपरत्वयोजनानात्युक्तायद्यपिदशेनेप्युक्तेवप्राणा आलोकादशाइत्यनुवादरूप
तयापिसदनुवाददूमिविशेषः। एकं दशमीतइत्यनेनरूपप्राण इत्य वाख्यानं॥ ॥पूर्वयोजनायांशि
तेरित्यस्यावगतेरिति। श्लिष्टायोजना। स्तुत्यंतरगताधिकप्राणावगतेश्चदृशितिमेदविषयत्वकत्वनाले
शः। येसत्तनरूपप्राणाइतियोजनायां परिसंख्यापत्तिरितिव्याख्यानांतरमाह [illegible] परेति। अस्मिन्व्याख्या
नेप्राणानां समत्वं नावछिद्यते पूर्वस्मादविशेषापातात्। किंतु संत्वा [illegible] प्राणाउत्क्रांति [illegible] मानाम
वेतिसप्तैवप्राणाइति। मायोचउक्तामंतीत्यध्याहर्तव्यं प्रयोजनंतरक्रमतामेवप्राणानां सप्तविहानुपपाद

कल्प० ५ त्वेनवं धकत्वादध्यात्माधिदैविकोपासने तु सत्तानामुपास्तिः पूर्वपक्षे सिद्धांते त्वेकादशानामिति ॥
॥ ॥ अस्यावस्था एकादशानामनामुत्क्रांतिरुक्तास्तान मुख्यानेषां व्यापित्वादिति संगतिगर्भं पूर्व
पक्षमाह श्रोत्रेति। वृत्तिरभिव्यक्तिः। इंद्रियस्य परिणामस्य अहंकारस्य व्यापित्वमसिद्धं। आध्यात्मिकाहं
कारस्याहंप्रत्ययेन परिच्छिन्न प्रतिभासादधि[illegible]दैविकस्यापि काहंकारसद्भावे च नास्ति
प्रमाणं। इंद्रियाणां तत्त्वहंतिकत्वं तु षंदस्तृतेत्स्वमं व्यापित्वं तु तेषां प्रतिज्ञानुमेशाक्यमसंभावित
त्वादित्याह यदीति॥ ॥ श्रोत्रस्यापादाद्याधिकरणान्यायो त्रातिदिश्यते। नातेष्व च क्षुराद्रितुतद्व्या
पाराद्रप्राणस्य भेदचिंतावद्यमागात्तुकरे तितदनंतरमतिदेशः। आगोदित्यस्य महाप्रलयवि
यत्वेनाधिकां शंकामाह। नासदासीदतीति॥ ॥ नवायुश्रात्। संगतिमाह। संपतीति। उत्पत्तिचिं
तानंतरमुत्पत्त्यधंडांते प्राणादपीति भाष्ये श्रुतिवले तथा पुरेव प्राणा इत्येकं पूर्वपक्षमुक्तासांख्यप्र
सिद्धकरणव्यापारः प्राणा इति पक्षांतरमुक्तं तदद्युक्तं। हठश्रोत्रपक्षव्यतिरेकेणास्मात्तु पक्षोपन्यास राम
वैयर्थ्यादत आह यथवेति। छांदोग्ये अध्यात्मं मनो ब्रह्मेत्युपासीतेति उपक्रम्य मन आरब्य ब्रह्मणोचा ५

मानरम्यकरुणं जिरूप्यत इत्यर्थः ॥ प्रयोजनं तु पूर्वपक्षे वायुमात्रदृष्टिप्राणाध्यात्मपदृष्टिस्वविवेकः सि ३

कृप्राणा चक्षुः श्रोत्रे ः पादेष्वनुव्याप्त्वचत्क्तं । वागादिभिर्हि मनः स्वविषयेषु प्र वर्त्तते गोऽरीव
पादेस्त त्वप्राणात्स्वेति वृत्तकर्णोवा गाद्यपेक्षावाचनत्वर्थः पादः सर्ववायुत्ताद्विदैविकेनमाक्षि
श्रमिव्यक्तो भाजित पञ्चिव्यापारेऽस्य छात्रीत्यर्थः । पदमाध्येइन्द्रियप्रकरणात् प्राणोन्द्रियप्राणं
इति व्याख्यातं श्रुत तु प्राणशब्दश्रुतिवशात्तन्मुख्यः प्राणइति । स्वतद्विरोधादिति । स्वतयोर्भेदे मेद
श्रवणाद्धो विरोधादित्यर्थः । किं सु तीहातव्येनेत्याह । कथंचिदिति । तयापि हि वायुप्राण
योः स्वरूपाभेदमाश्रित्याभेदस्तुतिः । श्रुतितद्भेदाभिप्रायाच भेदश्रुतिरिति व्याख्यातव्यमित्य
र्थः । नहि किं वायुरेव प्राणोऽस्तु तदपि नेत्याह । इति सामान्येति य दात्र श्रुतीत्यादिना स्वार्थेन
दाकरणव्यापारतयापि कथंचिन्नव्ययोजनेशक्यते हि करणव्यापारे चलनात्मयवाचीवायु
शब्दे उपचरितुं तथा चामन्यस्वार्थे स्फूतिवत्वात्करणवृत्तिरेव प्राण इत्यर्थः । स्यादेतत् एतस्मा
ज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादौ करणेभ्यः पृथक् प्राणः स्वतन्त्रवदुपदिश्यते । शक
यं करणव्यापारमात्रः स्यात्तौ त्रापि समः स्फूतिविरोधइति । अत आह । न चात्रापीति । अस्ति तावद्

कल्प०
५

जितहतोर्भेदः।यत्स्वतं त्रवन्तिदिशः सज्ञी बनारव्यकरणह तैर्द्वहस्थित्तुपयोगीत्वेनग्राचात्यमपि
त्रेत्यर्थः।मान्मदतेकसाधो गुणस्यकस्मात्।क्रियात्तु किं नस्यानत्राह।नचेति विरुद्धयो बाह्कमाः
प्रत्येकरुपित्वे च प्रतिंद्रियं प्राणभेदप्रसंगः।यदि मन्येन ना तेकेंद्रियवृत्तिः प्राणोयतः प्रत्येक २
मिलितविकल्पाकाशः।कीतुत्वद्भा त्रवृत्तिरिति तत्र्याह।नवत्वगिति।नतेनदनुगताद्भुति।
नतु परमेपि त्रुस्त्वमौ प्राणंइत्ताद्वित्यर्थः वायुभेदइति।वायोः परिणामरूपकार्यविशेषइत्यर्थः
।संहतत्वादिति।सत्वादिगुणसंहतिरूपत्वादित्यर्थः।एतच्चसांख्यव्रुद्धोक्तं।सोक्तंनमाश्रित्या
ह।अचेतनत्वादिति।प्रमिर्हेतुमिः पुरुषार्थत्वंपुरुषप्रतिशेषत्वं तन्नस्पार्थत्वमित्यर्थः।धार
णा देति।धारणाभे धामिथ्याज्ञानत्वे हेतुरुक्तः भूपपत्तीष्टत्वं पातंजलेरुक्तेशाद्वह्मानात्तुपपत्ति
मे त्वविशेषणं विकल्पस्य विपर्ययाद्भेद उक्तः तं विशदयतियद्यपीति।अपिच्छायानत्वेपमिते
व्यवहारहेतुत्वविशेषइत्यर्थः।वस्तुस्यन्यत्वं विकल्पस्यदर्शयति।नचेतितन्नमतस्योनिद्राव
त्तिरित्यस्त्रयत।नसूत्र पातंजलि। अभावप्रत्ययेत्यादिनासिद्धांतेचस्तुदुष्टुतोमनोत्वयइस्ह

राम
५

अतः कथं तत्र यान्तरस्य पंचत्वमिति। तत्राह। यद्यपीति। स्पष्टमीहास्य साधिकरणोपाख्यानं॥ ॥अणवश्च।
अणवश्चेत्यत्र सांख्योक्तमहंकारिकत्वं नेत्यापित्वमिंद्रियाणां निरस्तं वादिविप्रतिपत्तिनिरासेपि
श्रुतिविरोधनिराकरणपरे पादे प्रसंगात्संगतेः। प्राणो तु हि वस्तुतो तु स्मरिमाणस्यापि वादिसंमतस्य त
बुद्धिस्थत्वादन्न तत्स्वरूपगतप्राणव्यापित्वमाधिदैविकविषयं भाव्यस्यापद्यते इति न तत्स्यात्याय
ता। अत एव भाष्यकारमिवं प्रकाराभ्यां गमनापरावश्येत्यत्रतकाचत्यत्र निरुदाहृता। अन्ये त्वाहुः। तत्स्यापि
द्देशो यं समो नेन सर्वेणेति व्यापित्वश्रुतेर्व्याधिकाशंका आधिदैविकविषयत्वेन च तन्निरासइ
ति। तन्न। सर्वे नंताइतींद्रियाणामपि व्यवहारस्य व्यवस्थायामप्रसंगात्। अपरे प्रतिपादयंति। अ व्यापि
तत्र चात्र चेंद्रियाणां प्राणस्य च व्यापित्वपरिच्छिन्नत्वश्रुतय उदाहरणं। तत्रेंद्रियव्याप्तिश्रुतिर्नास
यो हैतानन्तानुपास्त इत्युपास्तिविषयत्वादुपास्त्यारोपेणाप्युपपन्नेति व्याप्तिसाधकत्वमित्युक्तं
अथ तस्समो नेन सर्वेणेत्यादेः प्राणव्याप्तिश्रवस्याधिदैविकविषयत्वं वर्ण्यत इति तन्न। अत्रापि स
मत्वादिति। ॥ दुरतोयं घटः। वत्सस्य विभुत्वाभावान्नानत्वादिति। समस्यामित्युक्तमित्येवेति स्वयं। स्तर्थः। समष्टिः। सामा

। प्राणमात्र इति व्युत्पाद्यपर एवमेतत्माम बोहेतुपार्क्ष विधानात्। हेतुभेदस्य चाधिकरणभेदे कृत्वादिति॥

कल्प०
६६

संश्लिष्टः विशेषस्तद्रूपेणायस्तु विशेषमात्ररूपः प्राणोऽनेकरूपेण विभुत्वान्नानेत्याहुः नानेति। आत्म
निशरीरे भवतीत्याध्यात्मिकं। सूक्ष्मविषयाकादपि सूक्ष्मशरीरः प्रतिकायं जंतुविशेषस्तदाश्रया
आध्यात्मिकप्राणाश्रयाः। योनिरादिनाइति चक्षुषा लिङ्गपारिषदस्तत्वाश्रिवोऽभूत्वेत्यादेरविरोधवि
चारादध्यायसंगतिः। माध्ये यथा स्वकार्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्त्तन्ते इत्यध्युक्तं सांख्य
स्याध्यनाधिष्ठितत्वाविरोधादित्याशंक्याह। यद्वीति। न तु करणानामपराधीनत्वे स्ति वक्तव्यत्वमाणा
मित्यर्थः। न तु करणानि चेतनाधिष्ठितानि अचेतनत्वे सति प्रवर्त्तमानत्वाद्रथादिवदित्याशंक्य
जीवाधिष्ठितत्वेन सिद्धसाधनत्वमाह। वाय्वादीनामित्यादीना। न त्वनुमानं मानात्तरबाधस्तदागः। आ
गमात्तु बाधिस्यतेनत्याह। न च ग्निरित्यादिना। वाग्भूत्वेति वागाधिष्ठाता भूत्वेत्यर्थः। जीवस्य देवतानां
करणाधिष्ठातृत्वाभ्युपगमेऽपि जीवस्य करणाधिष्ठातृत्वं तस्माद प्रयोजकत्वान्न तस्यात्रावभी
ष्टः कर्म्मस्वस्थैरित्यर्थः। आगमस्तावद्भस्मर्गस्य प्रवादकः न च स औपचारिकः सामान्यत्वादित्याह
नानाधिपत्ये इति तत्र श्रुतिस्मृतिभ्युक्तरणाधिष्ठातृदेवतानां रूपमाध्यात्मिककरणानामाधि

चाधिष्ठातृत्वसामान्यमभ्युपगम्याविरोध उक्तः। अधुना तु तद्देवतानामाह आधिवेति। सत्यपि जीवे देवतानां

राम
६६

अनेकाधिष्ठात्रीनां२

त

देत्विकास्यादित्तिरभेदोपासनार्थं तु पासनं च समारोपादपि संभवतीत्यत आह। न चैतदसत्यमिति। अ
नुपपत्तिर्वक्ष्यमाणाभिप्रायभेदात्कार्यासिद्धिस्तां नु परिहरिष्यन् तेषामधिष्ठातृत्वानिकः परमेश्वरो
स्तिनियंतेति यं येन। अनुमानमप्रसंगं वचनमिति वक्ष्यामः। ननु तज्जीवेनास्ति द्वसाधनमित्युक्तं
मत आह। न च स्वरूपोपयोगेति। अधिष्ठातृत्वं हि अधिष्ठातृत्वं यद्यधिष्ठानानंतरं सर्वं ज्ञानोपि हेय
स्वरूपं तत्साध्यप्रयोजनज्ञानं सर्वं कर्तृत्वेरवत्वं। न चैतदस्ति जीव इति कथं सिद्धमित्यर्थः। सा.६४
न चेश्वरेणासिद्धसाधनत्वं तदस्तु परमेश्वरो वा सर्गो वा भवेत् ईशत्वात्स्वरूपप्रयोजनाद्यभिज्ञ
जीवाधिष्ठितमिति तिसाध्यत्वात् यद्यौ लौकरणाधिष्ठातृत्वाद्योगः स्यादिति तत आह जैना
वतेति यो यदधिष्ठाता सन्तत्साध्यफलभोक्तेति न व्याप्तिः। यत्तरि सारथ्यावनेकांतादित्यर्थः। यदि
मन्येत यंतरि भोक्तृत्वे मानमावाधकत्वदभावइति तर्हि देवतास्वपि समं तत्राह। तावन्मात्रस्ये मरू
ति। अधिष्ठातृत्वमात्रस्येत्यर्थः। स्यादेतत् देवतास्वेतादृङ् नियंसा फलभोगित्वः। न हि अधिष्ठातृत्वाज्जी २
वव स्थिति विशेषतो नुमितेनत्वं तो नैकांतिकतानत आह। न चैतत्तादीति। नहि वै देवानां पापं

क.लृ.०
७

ष्यति भी ति

गछतीत्यागमविरुद्धमनुमानमित्यर्थः॥ ॥तदिंद्रियाणि प्राणाः सर्वेंद्रियेषु तद्विछानुचिंताना
त्स्येव तन्नमुख्यप्राणव्यतिरेकेणसंतीतिनीशंकते। प्राण इति। तद्भावेति। तस्यप्राणस्यभावाभाव
वत्तुविधापिनावनुसारणाद्गौणेर्मुखवैयर्थ्यानानींद्रियाणीतव्यानत्वादित्यर्थः। प्राणत्राइस्येति
तस्मादेतस्मान्नायमानेप्राणाः इतीत्यस्येत्यर्थः। एतस्माज्जायतेइत्यादिव्यपदेशेनभेदसाधन
मितियोजना। तत्रहेतुः नेत्रसोपीतितस्मिन्नेववाक्येमनः सर्वेंद्रियाणीतिभेदव्यपदेशात्मनत
सोपनींद्रियत्वप्रसंगाइत्यर्थः। मनःतिवृश्चादितिमनसः प्रथनींद्रियाणीतिस्मृतिः हेतुमिदानीं
स्यैवमुख्यप्राणस्यरूपमस्यानमन्नवेमेतिप्राणासंवादेइंद्रियाणामुक्तिः। मनुवौगादीनांस्व
विषयासंगः सोत्सरत्राष्टेनमाख्येतिद्विष्टः। मनुप्राणेतिस्प्रयतेहियोकाचिलोगान्तदेवेभ्यआगा
यतयुक्तस्मांवदंतितदात्मतइत्यादिनावागादेर्नामसंगरत्वस्याख्यतानिमनुः अमीमु
त्वोपयेमेयेनमेवताभ्योहायंमघ्यमः प्राणइति। अर्थक्रियाभेदाच्चेति अर्थक्रियालोवनंवादेंद्र राम
द्रियाणांमर्थक्रियामनतोमननंमाघ्यकारैः इतित्वांतराणीतिभेदवाचकंतत्वांतरेनप्राइंद्रस्त्वेध्य ७

हृत्प्राणान्नत्वांतरारीवागादिनीतिप्रतिज्ञारचयित्वात्तद्व्यपदेश्यान्यभेदव्यपदेश्यादितिहेतुंव्या
ख्यायतस्सा धना ६ सूत्रद्वेषो यो छिनः। अन्नत्वश्चेष्ठान्तरश्चेष्टन सं काये श्वराणामुक्तइंद्रियशब्दनो
काः श्रुतौ प्राणास्सं भवंवीद्रियशब्दवाच्यत्वादिंद्रियाणि प्राणान्नत्वांतराणीत्यर्थ इति। तत्रापुमे
नोषं दर्शयन्नकारव्यांतरमा ... विति। नकेवलमध्यारोपे हेतावात्प्रतिज्ञालिंगुरुक्तोहे
त्वंकिंरपिपौनरुक्त्यादस्त्वक्लेत्याह। भेदश्रुतेश्चेति। यदि तद्व्यपदेश्यादितींद्रियाणां प्राणान्नभेदव्यप
देश्यादित्यर्थः तत्र हेतुतरस्त्वे तस्य एव हेतुर्विवक्षित इति पुनरुक्तिरित्यर्थः। ननु प्राणा इंद्रियाणीति
वसंज्ञाभेदस्त तद्व्यपदेश्यादित्युक्तः। प्रकरणभेद ... स्तु भेदश्रुतेरित्युक्त इत्यपौनरुक्त्यं प्रकरणभे
दस्याभाष्ये प्रकटित इति। उच्यते। यदींद्रियशब्दप्राणशब्दैताप्रनतक्तः सन्प्राणादन्यत्वालिंविद
क्षीतिविवक्षितं। तर्हि प्राणावृत्तितामिंद्रियौं प्राणादन्यत्वात्सिद्धसाधनं। अथ यत्स्वतंत्रं वक्षी
ति। ततर्हि संज्ञाभेदः संपिस्यात् अव्याप्तः प्राणाप्राणवृत्तिशब्दयोरेव व्यभिचारात् अतएव सं
वाचस्पतिः भेदंज्ञानन्तिवनद्प्रयोजक। तां मन्वानोवं धांतद्व्यपदेश्यांविद्वेत्वनत्सुस्त्रुप्राणाप्राणत्वेत्यादिना भ
नि

त्वमतिकानां दिंद्रि १३

क.स्व.० ८

करणमेदमेववर्णयांवभूवननतउभय: आप्ययमेववलक्षणत्वाच्चपुनःत्वन्निरितमभिप्राय:। किंचास्यो
व्याख्यायांतद्धपदेशादित्यत्रत्वन्तक्षिणञ्चत्वांतराणीतितव्रजिज्ञासागतमध्याहृत्यपदार्थपरमहृदोत्व
साहादुक्तं।स्ववाच्याख्यायांत्वेकादशानामिंद्रियपदार्थमनंतरोक्तंपरामृशतीतितामम
ताह।तच्छब्दस्यचेति।तन्निंद्रियशब्दस्यहरादिवृत्तत:कथंप्राप्तोवकृष्येतीत्यतआह।इंद्रस्येति
जीवभावमापन्नस्येत्यर्थः।स्मरन्तिस्महिभगवान्पाणिनि:।इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्र ई
सृष्टमिंद्रजुष्टमिंद्रदत्तमितिचेतिइंद्रशब्दात्षष्ठीसमर्थात्लिंगमित्येतस्मिन्नर्थेघच्प्रत्य
योभवतिघस्यायनादित्वेनइयादेश:।चकारश्छिन्नसंज्ञकोपादानार्थ:अस्मादेवहेतोर्यासम
र्थादिंद्रात्दृष्टमित्यादावर्थेष्वप्ययोयोज्य:आत्मनएवकर्तृत्वेनप्रत्यक्षैवनास्तीतिकेशवोलक्षस्मा
श्वस्त्वनिदर्शनानन्दांकोपपत्तेरिति।लोभातिकमित्युक्तेदेहस्यापीन्द्रियत्वंस्यादितीदृढलिंगबोधिकः क
क्षिनइपीदेहमात्रइंद्रमनुमापयतिपदिशारणोतस्यादइंद्रलिंगत्वमहानादेरवस्तीतिमोतिवृत्य राम
हरांइंद्रियत्वंजातिरायजनकमाहदेहादिष्वप्यानइंद्रियितिननुकर्कलंकेषुदेहस्यादः तस्माद्दृष्टमितिन्तरसैवे ८

इदुर्दृश्यमितिसूत्रे

द्रियशरीरस्यस्वरसिद्धार्थं पारिमितिनिर्दुत्वत्तिमत्वश्यात् अतएव चानियमप्रदर्शनं। अतएतेषुहि
पावकादिश्रुतियतोवयवार्थः। तृष्णातांपुनः शास्त्रांतांयथाकथंचित्परिकल्पिते तापवत्वार्थेतस्तुत
ति। त्रियतन्नुतिमाध्यकारीयंलिखिति हि इमे अधिकरणोद्दुत्यर्थः। तच्चैद्विपितिवकृवचतंस्तत्रहदयप
तपदामिप्राया। एवंचाद्यस्तत्रैव यद्भाष्यकारैरिंद्रियाद्यं पारणा श्रुतित्वनिरसनमकारितत्वा
नद्वितीयो। च्चमप्रक्तोमिस्वत्वं भवतितन्नुटीकायांदुरुत्तिचिंतानयुक्तावार्त्तिके हिंसाभवतिनहिंसाहिंसे
त्वमस्त्या। नहिंसात्विकस्यप्रसंगमस्ति। अतएवातदमधाधिकरणोमांत्रवर्णिकस्तत्रैव आरंभसौ
धिकरणेचभावेचोपलक्षेरितिसूत्रेभाष्यमनपेक्ष्यारभांचकार॥ ॥संज्ञास्यात्तत्रउत्तघमा
नव्यापरउत्पत्तिः उत्पादकव्यापारउत्पादनतो विषयस्तुतिविरोधोनिरस्यते। तत्रौविषयस्तुतिवि
धद्वाः प्राकृपादद्वयेनिरस्तः। इदानिमुत्पादानांविषयस्तुतिविरोधोनिरस्यते। तत्रात्रिवल्ली
नमतोत्पादनंपारमेश्वरमेवेतिस्फातिवविगीतमवगतं। मोतिकतिर्मातोतुश्रुतिषु विप्रति
पत्तिर्दृश्यतेतन्नाइतितन्निरासायपततो। विषयप्रदर्शकंभाष्यमुदाहृत्यव्याचष्टे। तस्यार्थइत्ता

जगदुत्पत्तिवि

कलं०
६

॥२

दिना।ननु तत्तेजैक्षत बहु स्यां प्रजायेयेतीक्षणे तेजोऽबन्नानामुक्तेः। अतः कथं सेयं देवतैक्षतेति पुनरुच्य
ते। तत्राह सर्वेति। इति त्रिवृत्करणात् प्राक् तानासंक्लृप्तेन व्यवहारायोग्यत्वात् दीर्घोस्य प्रयोज
नं बहुभवनं समस्तेन तन्निष्पन्नमित्यर्थः। अस्मात् तपेक्षापरोक्षत्वात् तेज आदिषु देवताश
भ ब्दः। ननु वर्णयस्मयेऽभावात् कथं तद्द्वारकनिमित्तजीवशब्द इत्यत आह। पूर्वस्य [illegible] वि
तिरस्य प्रविशेषपदेन तेजीवेनात्मनोपाधिमिव्यक्तिरूपाभावान्निश्चयात् स्मरणसंनिधापितजी
वे। नाम माशयांस्तत्कार्ये रूपतिव्यत्यर्थात् त्रिवृत्करणश्रुतिस्तां व्याचष्टे तासामिति। तासा
मप्येकैकां त्रिवृतं करवाणीति योजना। नामरूपनिर्माणेऽपि समानतन्नामरूपत्वमुक्तं तद
सार्थं त्यक्तमनेनात्रशार्थसंबन्धोऽक्ति नियमत्वशंका जीवेनेत्यस्य व्याकरणानुप्रवेशयमाह। तत्रे संज्ञामूर्ति
ति जीवस्य सहकारित्वान्नामरूपनिर्माणयोग्यत्वाभावात् जीवेनेत्यस्य व्याकरवाणीत्यनेनान्व
ये पूर्वपक्षी भावमाशङ्क्याह। इत्येति। अन्तिम करस्यामान्येन नामरूपनिर्माणे जीवस्य योग्यत्वे राम
नावक्तात्रे चान्वयोपयोगिविशेषारणमतं स्येनाशङ्काज्ञानत्वात्। यथा इह सामान्येनैव यो ६

ति प्रधानपदार्थमिति। क्वचिदिति। तत्र रूपादेः परस्परं संबंधाभावान्मित्यर्थः। ननु व्याकरणात्मेव

णत्वं लोके यदवधारितं। तदत्यितामिधानतस्य प्रत्ययस्तत्त्वादुपलब्ध्यतानिति योग्यतानुपपाद्याकां
क्षामाह। प्रधानक्रिययेति। ननु जीवेनेत्यस्यान्वयविशेषोस्ति नेत्यसंनिधिरस्तीति तत्राह। नेति
ति। आकांक्षायोग्यतासत्तिसंनिधिः स्यान्नत्र देवदत्तेनोदनं वल इत्यर्थः। प्रधानक्रिययेत्यत्र
हि करोत्यस्य मुख्यार्थस्वीकारे कोवाधो यतः प्रयोजककर्तृव्यापरत्वकारणत्वात् तत्राह। यदि वेति। स्या
दिति। तत्साध्यत्वाज्जीवे देवदत्तायाः करणं न च जीवत्वं करणं द्रव्य वा स्यादीति तत्राह। न हि जीवस्ये
ति जीवो हि चेतनत्वात् कर्तृ यत्र च कर्ता कर्त्रंतरं प्रति करणं तत्र कर्तृत्वस्य तत्र कर्तृत्वमि
तरस्य तु प्रयोजककर्तृत्वं चारेण संकल्पयातीत्यादौ दर्शनादित्यर्थः। नामधकर्मणीति। नामोत्थ
स्य तद्वस्त्वर्थः। सामान्यतोवगतयोग्यत्वस्य विशेषे बाधकप्रमाणादपवादमाह। न गिरिनदीति।
अर्थापत्तिमावेति करणसामर्थ्येऽपि प्रमाणं कार्यजनकत्वान्यथानुपपत्तिर्जीवस्य समुद्रादिज
नकत्वादर्शनात् तरनदृष्टौ नार्थापत्तिरिति। तेन सामर्थ्याभावो थापत्त्यस्तु दय परिच्छिन्न इत्यर्थः। जी
वेत्यस्य व्याकरणवाक्यमिति प्रति प्राधान्येन योग्यतायां निरस्तायां संनिधेरेव सामान्यमित्याह। अ

कल्प०
१०

न्नुपविश्येत्यनेनविवृतः। स्थे: स्कन्नत्रायस्यान्नस्य मा गतेति प्रधानात्। योऽणिष्ठः स तन्मन इत्युक्ता

न्न त्वस्य त्रुट्यमागात्मनेत्यर्थः। वाचः प्रवृत्त्या तेजसा साम्यमस्तिति तेजोमयी वागित्युक्तामि

त्रहृतीयमीत्यर्थः तेज इत्यग्निदीपकं घृतादुच्यते तेजसः स्थूलो भागो वाक् अन्नस्यापि त्रि

वृतस्य स्वच्छो भागो मन इति श्रुतिवशात् वाङ्मनसयोस्तैजसभौमत्वेऽपि कथं मांसादे

र्भौमत्वमुच्यते अत आह। वाङ्मनसे इति। मांसादीत्यादिशब्देन तेजःकार्ययोर्मज्जास्थ्नोर्हितयो ६

र्ग्रहणं मज्जानां नास्थ्नां मंतरो रसः। नित्यत्वं मनसो ऽपि यथा। ततावदितिनाप्याह कार्यकं मन

आदीति शेषः। स्वपरत्वं स्वनाना स्वरवाङ्गधिकं तच्चे दित्यधिकरणे समामिद्धशितमिति

॥ ॥ श्री॥ ॥इतिश्रीपरमहंसपरिव्राजकश्रीमदनुभवानंदपूज्यपादशिष्यम

गवदमलानंदविरचिते वेदांतकल्पतरौ द्वितीयाध्यायस्य चतुर्थः पादः॥ ॥समा

॥ २॥ ॥ प्तश्चायमध्यायः॥ ॥श्रीमद्भवानीशंकराभ्यांनमः॥ २॥ श्री४॥ राम०
१०

वेदांतकल्पतरौ तृतीयाध्याये प्रथमपादारंभः

आद्यतानितत्तानि वर्षाः ... तत्करकारितपर्वः

कल्प० १ श्रीगणेशाय नमः ॥ ॐ नमो भगवते श्रीवासुदेवाय ॥ कल्पादौ तन्नमायाः हरिहरसरोजभू
वः कीर्तिविस्तारविघ्नाः श्रीमद्भास्यस्य प्रतिवदतमध्याक्षरेणयेऽस्मिन्विरिंचिः श्रोतुर्वाचेते रा २
वाक्सरसिरिशिभुवि ततंकल्पवृक्षं निबंधमे जेवक्त्री सहस्रं चरितममितं वर्द्धमानं वजा
नां द्वन्द्वमनत्वात्मनः । मत्सरपि ह्यतितदानां विदुषा मम कृचिं चिकित्सति प्रवक्ता । स्वगुरुणागणाद्वे २
नवर्धः कृतिरेया करणारंभागता ॥ इतश्च ॥ अविरोधेन वेदान्तवेद्यं ब्रह्मनिरूपयितांतस्यामि
साध्वतत्त्वानं सोपायमिह चिंत्यते । हेतुहेतुमद्भावं विशादयति । स्पतिन्यायेति । स्पतिन्या
यस्तुत्यभिः सहस्तुतितां विरोधपरिहारे रोगतियोजना । अवांतरसंगतिः पादसंगतिः । भावे
प्रसंगानंतमितितिदेहात्मव्यतिरेकादिनः । स्वर्गोपरोक्षत्वोत्तरयच्छेषोऽस्मिकेतिविषयः । २
नपरिश्वगे श्रारणानांतरकादिगमनाद्देहोऽन्यंतच्चेतिरा सस्यच प्राणागत्यभावात्तेतिर्हि नात्मयो राम
जनं । कर्णोपात्ते श्रुतानुपादानं व्याहतं कार्यस्वीकारस्याव श्यंभावादित्याशंक्याह ओमिति त १
नुमृतोपादानस्या श्रवणांतदभावगमकं न भवति स्यपिश्च मेये प्रमाणानुदयस्य भवात्

२ श्री ... तत्त्वप्रकाशिति

अत आह तल्लोकमेकेति। नानाप्रमाणागम्ये हि वस्तुन्येकप्रमाणानुपपत्तावपि प्रमाणान्तरप्रवृ
त्तिसंभवाद्वस्तुसद्भाववत्त्वं कास्यानतिविहेत्यर्थः। अत एव द्युलोकादिष्वग्नित्वस्याकृतित्व
स्योपचारेतिभिन्नमाह दृष्टीति। यदि द्युशरीरोपलक्षणावस्थायामाकृतिर्जातिरूपं चाकृतित्वेन प्रविभज्यते द्वा
वारे तु द्युलोकादिष्वग्नित्वसंपादनं विधीयते। कथं तर्हि पापः पुनरेव वधस्य इति प्रश्ने आकृता
वपकृष्टः कथं वा प्रतिवचने प्रह्वाञ्जहूतीति प्रश्नाशङ्क्य। अत आह सत्वाय मित्यादिना प्रश्ना
पूर्वं हूतेऽत्युत्पत्त्वयः। वक्ष्यमाणरूपकसिद्ध्यर्थमाह हवनीयाग्नीति। वाक्श्रुतिमुदाहरत्यवाच इ पंचाग्नि वि ६
असौ वावेत्यादिना। आदित्यकार्यत्वाच्चेति। समिद्रूपादित्यकार्यत्वादहरर्चिः प्रसिद्धस्यार्चिषः
प समित्कार्यत्वादित्यर्थः। अधिदैवं जमात प्रमाणाइत्यन्वयः। नात्रि दिशाति अस्मादिरूपाद्गृति
३ काङ्क्षयोर्विस्फुलिंगाइति द्युतिं व्याचष्टे गतिं तमिति। अग्निरूपाद्युत्पन्नस्यादिरूपाइति द्रष्टव्य
स्वर्गे आरचो देहः सोमो राजाय द्यपि प्रज्ञासो मइत्यादि भेदः श्रूयते तत्राप्यपि जीवस्य मूर्तप
रिष्वंगसिध्यर्थमाप एव तत्तदाकारपरिणतास्त्यातयान्तिर्दिष्टं पञ्चत्वाहस्य दारभ्याइति। प्रोगइति

कल्पः
२

[illegible] यमा ननइत्यर्थः स्वरूपानावमुपशममाशंक्याह [illegible] तिष्ठतो [illegible] यतंन्तात्
मिति मोचं वाइश्रवणार्थं दिह्वविकीर्णमिवोपपन्नं चरणांशं केन स्मृतं तरव ज्ञोनाह लोमानि वे
ति। नानि च गोहानि धूमोऽर्चिरित्यत्वादित्यर्थः। स्व खल्वविस्पष्टलिंगहेतत्वात् यामकर्मरोमा
गारत्वं। त्वक्समवायित्वाद् लोमस्येति शेषः। अस्तुतत्वादिति स्व आर्थमिद्गपा। मावसरे दर्शयति
यत्रपीत्यात्यादिना। कार्मिणां चंद्रलोकारोहावरोहावास्थितं पंचाग्निदर्शनमुच्यते। तत्र दक्षि
णमार्गेण धूममेत्यामहृष्टा उपासते ते धूममभिसंभवंतीत्युपक्रम्यैष सोमो राजेति चंद्र
लोकप्राप्तः पुरुषो निर्दिष्टः पंचाग्निविद्यायामपि स्वर्गलोके सोमो राजा संभवतीति संस्थवति
दिष्टपते सोमराजस्तुति सामान्यात् स्वर्गस्थस्थानसामान्याच्चेत्याह तद्यापीत्यादिकारिणामिति
सर्वस्तुतकर्त्तात्मनापामीष्टादिकारिणामित्ययमुक्तः। एष सोमो राजेत्यत्र कर्हिरांस्त्रुपावाक्याव
गतानि रद्धिः परिबृंग साहत या हि यो वेति। अत्यावृत्यसेद्धयाद्वितीयाऽश्रुता द्रुतिः। अथवा प
जेसामैनोद्वितीये द्वितीयस्य साम ऊतो होत स्म यांसोममसामवंगताइत्यर्थः। अस्मिन्य[illegible]केवत्सवरो

राम
२

९

सामग्र्यं वाक्यद्वयेद दर्शितं । तथा हि पंचाग्निविद्यायां पर्जन्याद्धि ध्वस्ति भुगंतस्य सोमराजस्य वृष्ट्य
न्तरतो भावश्चा स्मायते तथा हि तामांगेपि मलवत्तूदाता सोमराजानं तथाश्मा वीवा योर्दिश्यं
ते पृथिवी शाप्यान्नं मवंति त्यादिना । अतःस्य स्यद्वावाक्यैकस्मिन्यां त्तामद्वत्यर्थः चंद्रलोकं प्राप्त
चेद्रुस्यैयंवे तस्यैव भावमन्नमय शरीरान्तागतद्रत्यर्थः । वाक्यद्वयस्य सोमराजशब्दयोरर्थभेदं शंक
वे ते तत्र स्वतं चाह इति । अस्य द्वावाक्ये आपरम्सो मारव्य शरीर भावमाद्रुवतुरस्य सो मोराजेत्यत्रंतु अ
द्भिर परिष्वक्त इंद्रियमात्रोपहितस्यं द्रलोकं गत्वा सोमशरीरं भुंक्तामित्यर्थः । उत्तरं । अयंदो
षः इति । येन ल्पेपेतानि । अस्मत्तमयशरीरान्निमानित्वे तस्यर्थः केम आमृतिपरिनामत्वहरा
शब्दमात्र सामस्मगमकं व दोरप्यस्मिशब्दा विशेषात द्योत्तनाभेद वसंगादित्याशंक्याह तंतस्मा स्व
दिति । अस्य शाक्षात्कुरुषवचसद्रति पुरुषशब्दावकेवल स्तनगमतस्यापुरुषवाचिविहिततन्त
तगमतस्य च संशये सोमराजशब्दसामंतिर्णायकं भवति । मारावकस्य तु वाल्लताद्वेद्दति
स्थयान्ता तेदापातद्रत्यर्थः । वहि स्तस्तोनित्स्य शरीरं भूतनरूतमारीति । तत्रु कैवल्ला
जा

कल्प० युक्ता। ननु व्यापकस्यात्मन इह देहान्तराभिमानपूर्वकमेव देहत्यागः संभवतीत्यत्र चिकित्सति दृष्टान्त
२ श्रुतेरसंभवं गः। क्रियत इति चेन्न च वक्तव्यं क्वचित्परमात्मा न उत्क्रमविधाद्देहान्तरप्राप्तिरत जीव
स्य नायं दृष्टान्त इत्याह तृणेत्यादिना। जीवोपि स्वतन्त्रस्य व्यापकः सन्नस्मिन्देहे वर्तमानो देहान्तर
मभिमन्यते। उक्तोपाधिकस्य तूपाधिव्याप्त्या न प्रथममित्याह परत्रैवेति। न द्वितीय इत्या
हतस्येति। तथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रम्यात्मानमुपसंहरत्येव क्रम्या
मेवायं शारीर आत्मान्यमाक्रममाक्रम्यात्मानमुपसंहरतीति श्रुतौ प्रतिपन्नो देह
विषयभावनादीर्घीभाव उपमीयत इति भाष्यमुक्तं तत्र भाविदेहस्यानुत्पन्नत्वात्स्मृति
तद्भावनानुपपत्तेरयुक्तिमाशंक्याचष्टे उत्पादनापादेति प्राक्तनकर्मारब्धभाविदेहोल्ला
यावत्कर्तव्यापारस्य विततत्वाद्दीर्घीभावः। यस्य तु कर्म नवतिय यावज्जलूकान्तरान्तरं प्राप्य
न्तरां मुञ्चति स्वं संसार्यपि देहान्तरप्राप्त्यर्थकर्मभुक्त्वा देहं त्यजतीति आद्यादिज्ञानानीत्यस्य व्यादि राम
ज्ञानानीति अर्थ इति विज्ञानानीति अहमिति नित्यालयविज्ञानसंतानस्य वृत्तिः कार्यमाधो सं ३

तं स्प्पा

देहे स्मत्रयकार्योपलब्धिं दर्शयति तेन स इत्यादिना। सामान्यवृत्या शरीरं दर्शयतीति वातादयो
धातवः। कथं त्रिधातुकत्वे शरीरस्य पंचभूतात्मकत्वमत आह नातः संदेह इति। वातान्वयाद्वा स्फटिके श:
य्वारब्धत्वं कफपित्तान्वयात्तेज आरब्धत्वं अवकाशदानान्वयादाकाशारब्धत्वमित्यर्थः।
अत्र नैयायिकादयो विवदंते। यदि देहः पंचभूतसमवायिकारणकः स्यात्तर्हि [illegible] द्रव्य
न स्यात्पंचभूतसमवायिकारणकत्वे यदि च प्रत्यक्षसमवायिकारणकः स्यात्तर्हि प्रत्य प्रत्यक्षप
क्षो न स्यात् गगनमरुत्संयोगवत्। तस्मान्न देहः पंचभूतसमवायिकारणकः द्रव्यत्वादाकाशव
त्। नापि प्रत्यक्षाप्रत्यक्षसमवायिकारणकः प्रत्यक्षत्वाद्घटवत्। तोयाद्यारब्धत्वे च शीतस्प
र्शप्रसंगः। तोयत्वादिजातिसंकरप्रसंगश्चेति। तन्न। त्र्यणुकादेरपि प्रत्यक्षत्वा
दिहेतोरप्रत्यक्षसमवायिकारणत्वाभावानुमानापातत्वात्। शीतस्पर्शादिश्च शरी
र उद्भू[illegible] भवान्यायकर्मेणोपलभ्यत एव जातिसंकरश्चादूषणं। यदि मत्स्येतद्व्यत्वादि तो तर्हि
तिः पृथिवीत्वादिजातीय इति परिहरति व्यापकत्वात्तथापि पृथिवीत्वादिद्रव्यत्वादिजाति

ष्व१ वाभि

अप्रव्याप्यवृत्ते   स्परिहा।

कल्प० ननु च जात्यापत्त्यानां हृगजातौ नैऋत्यत्र समावेशो नेतरयोः पृथिवीत्वादिजातिष्वपरस्परपरिहारेणैकं
४ नेसलिलत्वाभावात् । तुं सलिलेच पृथिवीत्वाभावात् । परस्परपरिहारस्य समावेशातिव्या
प्यक त्वेच गोत्वाश्वत्वयोरप्यसमाविष्टत्वतिव्याप्याभावप्रसंगः । उक्तिद्वेन च तज्जातीयविरोधक
प्र त्वात घाचात्तवच तावसित तदभावेत्तरगत्वात्तसयोरित्याद्यनुमानद्वैधकृव्यवच्छेदविलयप्र
संगइति । तदपि न कास्चित्परस्परं परिहरंत्यः कचिदपि न समाविशंति । काश्चित्तु जातयः कचित्प
रिहरंति क्वचित्समाविशंति घटसमावेशाश्चक्रियस्वैववदेहादिव्यक्तिनिष्ठियगोत्वादावणुतरीतो दै
कामानादिभ्यः परिशिष्ठिध्वरतुपपत्तेः । अपिचायमत्र पर्यवसः । पृथिवीत्वजलत्वेते कत्र समाविशतः । मात्र ६
परस्परं परिहारित्वात् । गोत्वाश्वत्ववदिति । तत्र परस्परेति पृथिवीत्वसलिलत्वविवक्षायां साधनवि
कलो दृष्टांतः । नहि गोत्वाश्वत्वे पृथिवीत्वं परिहरतः । गोत्वाश्वत्वविवक्षायामविशेषेणायतिकिंचि
त्परस्परविवक्षायां च हेतोरनैकांतिकता गुरुत्वलघुत्वयोर्गोत्वाश्वत्वे तु जलत्वेर्थक्रिंचित्परस्परात्म क राम
त्वं अकुतोपरिहरतोरप्येकत्र संवेशात् । तस्मात्प्रसिद्धिसामर्थ्याद्बाधकस्यातिरूपणात् । पंचम्यत्र ४

मा १

मयः कायः श्रुतितोपि प्रमीयते। स्मर्यते हि पृथिवीमय आपोमयो वायुमयस्तेजोमयः [redacted] आकाश
मय इति। अत्र देहद्वारात्मनः पंचभूतमयत्वमुच्यते। चतुर्मुखपद्युत्यादिवाक्यशेषात्। अस्तु मा
नमपि देवदत्तशरीरमेतज्जनकत्वे सत्यनुदकत्वात् तेजस्तोयवायुत्वानाकाशत्वा [redacted] तान
र मावबृसमवायिकारणकं शरीरत्वात् घटवद्देवदत्तशरीरवदिति। यद्यपि घटवद्देवदत्तशरीरमनुदकत्वादि द्द
मत्पृथिवीमात्रसमवायिकारणकं [redacted] परेषां तथापि देवदत्तशरीरजनकत्वे सत्यनुदकादिम
त्त्वं न भवति। तस्य देवदत्तशरीरजनकत्वाभावेन नहि विशिष्टानुदकत्वादिमत्त्वरहितत्वात्
त्वात्ः साध्यप्रसिद्धिः। एतज्जनकत्वे सत्यनुदकत्वादिमत्त्वरहितजन्यत्वमनुदकत्वादिमत्त्वरहि
तत्त्वाद्वा स्यादेतज्जनकत्वरहितजन्यत्वाद्वा द्वितीयो व्याहतत्वादिति प्रथमः। स्यात् तथापीदं घटत्वा
दिमद्भूतसमवायिकारणत्वसिद्धिरिति। तन्न निराश्रयावयवप्रमाणाच्छेत्तथा पूर्ववदित्याशंक्याह
जीवेदेहेति। न वस्तु सावयवत्वं गतिसत्त्वात् अवयवेष्वेव न प्राणानामिति तेस्याह दनुविवायितन्नुजि
नवेत्वाणानामहंति स्थित्याधारदेहनाशे विपुत्रेरणानां च देहांतरगते देहे प्राणोपलब्धिर्न स्या

कल्प० ५

दित्यर्थः । साश्रयप्राणे ज्ञातानां वाश्रयार्थोदेन प्रसंगमात्रं क्वाह इति । न तु कार्यव्रह्माश्रय कश्चि

दाश्रयः कल्पतां कथं न तत्सिद्धिरित्य आह । तैन्द्रियमयत्वइति । इन्द्रियग्रहणां स्तदेनुत्पत्तस्याव ह

त्यर्थ जागरिते न तन्मयदेहाश्रयत्वदर्शनादित्यर्थः । नहीन्द्रियाणि संत्वाश्रयो तेत्याह इति

४ श्रुत्वा तेषां न प्रिपरोपाधिगमनेते न प्राणा इत्युत्पद्यादकत्वादित्यर्थः । नैव प्राणा गच्छंतीति माध्यंदृष्ट

प्राणानां गमनानामावे स्यादिति त्रिस्तु निर्दिष्टेत्येइति कश्चित्संसेनानत्वात्तु कंतु तो सत्यामवधार

णात्तु पपत्तेरित्य आह वितैपीति । अत्र स्तुतिद्वयविरोधादनवसाय आशंक्यते । माध्यंदिना

गानं तेवेति यत्तते नि व्याख्येयमित्यर्थः । परिहार मागं व्याचष्टे । इत्यादिना तेषामपी

तिवागादि गमनं तानामपीत्यर्थः । न तु संदिग्धं वस्तु प्रायदर्शनात्तत्तैर्णां पतेः गोरण्यमुख्यग्रहणावि

त्याये च मुख्ये चस्तस्त्व कथं वागादीनाम स्यादित्रिस्तुतिः [redacted] यदर्शनं

मात्रात्मुखार्थोत्तवचाप्यते । आह तु इति विरोधा इति । जीवेन सह कांत्यादि श्रुति विरोधात्संदि

ग्धमानार्था वागादिगतिश्रुतिरतः प्रायदर्शनावकाशइत्यर्थः । गुणायोगउपकॉति च तत्र का

२४ माहु

मायाद् इति शेषः। तात्त्वस्तुपपत्तेर् इति तस्य त्वस्य परिहारमार्गं व्याचष्टे। पंचम्यां तावदित्यादिना। पंचम्या
२ वपो माहुतावपुरुषवचस्त्वमब्वाम्यत्वं यथा भवति तथा किंचिद्वक्ष्यते इति श्रुतेरस्य शाट्द्वकायवृत्तप्रकार [illegible] मात्र मग्नि विस्तु
हि लिंगाद्यविवक्षितः एतस्मान्त दृश्यते। वाक्यस्याविरोधगमासं क्रांतत्वात्। श्रौपत्य स्त्रि हो आदिषु त प्रा
ति तिपुरुषा इत्येयोऽत्रो चत्रायाशास्त्रा [illegible] तः गेस्मानास्व। तत्र प्रथमा बाहुतिः श्राहुतिर् विधि मग्नि इतासिला ओ४
च पंचम्यां अमाहुतवि [illegible] व मग्नि यामः ये व पं प्रत्याहुतिः सैव प्रथमादिस्थानेषु पिमवतीति। स
वे तिचैव प्रस्नह्दये प्रथमाहुतौ श्रुव [illegible] ति रित्या हुत्वानि धानसंबंधस्यादित्यर्थः। अथ श्रद्धास्य तित्यव म
हुवचनांतस्याद तपां श्रद्धा या इति निर्देशः। अपत्रानि रि [illegible] र्येयाः श्रद्धायाः प्रथमाहुतित्वे परं पर्यात
स्नातस्य देहस्यापूर्वहुतत्वे तस्मादित्याह तत्रापो वमिति श्रद्धाकार्यस्य तद्वत्सतास्याम्प्रपञ्चामाद्वैश्र
पा ब्दोक्ती त्वद्रुस्वश्रद्धाम लोपचारायेहितं संबंधमाहात्तरवेति। अपो लक्षस्ये श्रद्धां संततम तद इति श्रुतो
कार्यकारणमावोवगम्यतइत्यर्थः। आहुतत्वस्य लपाश्या पोजीवं परिवेष्ट्य परलोकं नयंतीत्यत्र स्पंवा
दकत्वेनते वाह्सेदइत्यादिवाजसनेयिब्राह्मणं ताभ्यकारैनदाहृतं दिष्ठं श्रियमिहो त्राहुती व्रजस्यज त
त

तै२ दि२ २ते

बृह केवलाक्षरवल्भ्यं प्रतिनलैवैनयोरस्वमुक्तं तिं न गतिं न प्रतिष्ठानं न च तिं न पुनरावृत्तिं न लोकं प्रत्य
६ क्षाद्यैनं वेदैस्यत्स्तानतुष्टा विनैतेन चानुमोदिते जनक: षट्प्रश्नान्निर्णिनाय। तेवा एते आहु
तीहुउन्नामनेन होत्रं क्षमाविज्ञान लोकं तरिक्षमेवाहवनीयं कुर्वीते वायुं समिधमस्मरीचीं
चस्पृक्ता माहुतिनैन रिक्षं तर्पयन्तस्तैनन आवर्तं तेडत्सुपक्रम्य पृथिवीं पुनर्बधोषितं वाहवनी
यस्थैनो पम्यास्वसंवत्सरादीक्षस मि[illegible]दादित्वेन परिकल्प्य योषिदग्नैर्यः पुत्रोजायते स लोक
६ तै प्रत्युत्थायीतिव षट्प्रश्नी निर्णय: पंचाग्निविद्याया मद्भिः परिवेष्टितस्य जीवस्य गमनं तन्ग
मयितुमर्हतीति विद्यामेदाह षट्प्रश्नं प्रावनीयसमिद्धुतय: स्वस्तुयं तेन नुद्ध्या र्विरंगारा
श्चांतरिक्षाग्निस्माधिक: पर्यन्यस्य नक्षत्रप्रतिनैत्रसत्यपि विद्यानैत्रे आहुतिगत्या गतिसाम्या कमाधते
२ प त्दृष्टान्तत्वमित्यत्स्येवं रिहार:। आचार्यस्तुपेयाविद्वैक्यमुपेत्यापा[illegible]षट्स्वप्रश्नाति[illegible]हैत्रे राम
षट्स्वांत्यादिप्रेयेयश्नाल्लोकेपि समित् धूमार्चिरंगार विस्फुलिंगेषु समन्तेषु विशेषु प्रत्येकं वि ति ६
स्फुलिंगादीनां नत्राप्युपसंहर्तव्यत्वात् बहुसामेस्तत्त्वैव षमस्या किंचि[illegible] वेदरत्वात्पजन्यापे[illegible]

स्म

दिवमा[illegible]विशत्तेऽन्तरिक्षे [illegible]वाहवनीयं कुर्वीते [illegible] [illegible]ादित्यं समिधं [illegible]दु[illegible] [illegible]त्तामाहुतिं तेरि[illegible]वंतपयन्ते ८

नं २:२

ग्निहोत्रे स्वर्गात्पृथिवीप्राप्तस्यापि वा तेतार्थसिद्धेः अंतरिक्षात्मेघस्य पंचाग्निविद्यायां पृथिव्याः ।
स्वर्गप्राप्तस्यापि वा तात्सामर्थ्यात्सिद्धेरित्यर्थः । यः समाहारं चरणं तु अंतादीनामित्यर्थः । एवं च य
ड्डसुण सतमिदं पंचाग्नित्वमिति विवांतरसंख्यानिषेधेनासाम्यत्तिमाह बहुष्वप्युपमहा
रसिद्धेः प्रचयशिष्टप्राप्त संख्यानुवादि पंचशब्दस्य दुर्बलस्य तद्बाधकत्वानुपपत्तेः । एवं च ते
विस्फुलिंगादिवद्बहूनामनुपपत्तौ मांगुष्ठात्वादिविषयाणां च विस्फुलिंगादिविषयत्वात्तत्र भाषा
२ स्पतादिस्थो वाचस्पतिरित्युपहास्योक्तं स्मरः । मा प्रस्पृश्य श्रुतिं प्राच्छेत्रियेति । सोमस्य पश्येति
ज्ञेयः । लोकः प्रथमे केवलं सर्वविनकार्थे बुद्धिक्रियासमानाधिकाहारापेतः । पुत्रो सर्वयत्नेनेतरा खे ८
पापवेति प्राप्याप्येत्यर्थः । अपद्वीयस्येति अपद्वापप्येत्यर्थः । यथासोमं यत्नेन स्वये
पवेवं कर्मिणः पुरस्तादेवेत्यर्थः । एतं मतञ्चमहायंतीति श्रुतेर्लभ्यनावशाद्वेतके सिराम
निधानं गृहीत्वा भाक्तत्वं महासप्तस्व ... काराभ्यां वशिष्टं च तु सिद्धानां तु सारेण वि
रुद्धमर्थमाह । सोमसया होकानीतियुक्तिरत्यायमर्थः । एवं सो माराजेति । कर्मभिः प्राप्यस्य

१ तं

क॰स्प॰ सोमस्य प्राश्यासेन प्रकृत्वात् विमृजति तमन्ये येतिभोक्तुं तनि देश: साक्षादमृतत्वे इत्युपपत्तिः ॥ छ ॥
८ पंचमारोत आहुतावापोय य्या पुरुषवचस इत्यव्या भवंति । तं प्रकारंकिं वेद्धु । तिष्ठेत केतं प्रतिप्रवाह
नास्पराक्त: प्रश्न: । तमा तातं । यत्कारले स्यपुरुषस्य यागादयोऽस्मादिदेवानारोहो । तिक्कायं तेदा
पुरुषो भवतीति आह्ने भानस्य याज्ञवल्क्यं प्रतिप्रश्न: । अस्मै अधिकारिणोऽफांसत्तमहे आन
यति । अयोत्तरमार्गकथानंतरं ग्रामे याहास्मे स्थित्वाइष्टयागादि पूर्तंवाप्यादि करणं दत्तेदात
नु दुत्तेतानुसतेनुति इंति ये ते धूमाभिमानी । देवतामभिसंभवंति प्राप्नुवंति । आकाशे वसतो
वायुमाप्नुवंति । आसो अमुकतामास्वर्गायत्लो कायस्वा अयं नागतु एतं देवादित्यस्य रोहिताद्यम
तं दृष्टो बवस्वादयो देवास्तत्यंतीति भक्षु विद्याया भुतं । अथ पित्रानंदकथनानंतरं जितपात आद्य
दिकर्मभि: पितृलोके ये स्तेवां पितृणां आनंदा: सकर्मदेवानामेकआनंद: पित्रानंद शतस्यु
नाआनंद: कर्मदेवानां भवतीत्यर्थ: ये कर्मणेति कर्मदेवानां व्याख्यानं ॥ ॥ छ ॥ । ज्ञानानयेच । कर्म राम
समवापितीनां अपां पंचमाहुतेतोपुंपरि भारोणाहितुमास्थितानिः परिवेष्टितजीवगमनमुक्तोनवम ८

५१

र्गादवरोहतः कर्मैव नास्तीत्युक्तः तत्समवायित्वस्याप कृतस्त्वरांतु परिणामाद्युक्त्वा द्वैपसंगतिर्णि
पूर्वपक्षमाह यावत्संपातमित्यादिना। अतस्यैव च कर्मशेषमेकृत्स्नमविकृतत्वाद्धित्वयसंभवेस
म्यकृत्स्नानस्यानेष्ठस्तं पूर्वपक्षे प्रयोजनं। श्रुतिमुदाहृत्य [redacted] व्याचष्टे यदिति। अंतं फलं भुक्तिमप्यान्हृपाय तस्य चैति। येषां हेतुनां सम्यत्त
मेवकर्मस्वकीयं फलमुपभोजितवदित्सु परिणतम जिज्ञयान्वयः। ननु फलं दत्वापि कर्मणि ष्ठतु
न त्वाहृत्स्वफलविरोधीति। लोके तथोपलंभादित्यर्थः। तन्त्वसति कर्मणि निमित्ताभावात् म
दि यमरोहणमत आत्मावारादिति चरणांनिवेदितिस्व च भागः पूर्वपक्षहृत्यर्थः। अचारे चा
ग्निहोत्रादिवस्ताप्रवाहुत्यमिति पूर्वपक्षघटना। ननु यथाकारी यथाचारीत्युपक्रम्य स भु
कारीत्युपसंहारात्करणाचरणयोरैक्यमेवगम्यते तेन आह तावेति। भवेतामित्यर्थः। कर्त्तार
मनुशेतेनुशायः। छाच्चत्त नुशायः जातिजन्मास्मरति आपत्य स्मृत्वा वर्णाश्रमाद्युक्त्वा वामाव्य
द्वत्यर्थः रुह्यमायं प्रतिमाणीत्यादिना पंध्या चष्टे अयवेति। उपभोगशेषे चिरं स्वर्गादवरोहता

कल्प० मितिकथमवगम्यतेऽत आह कल्पयचरणाइति। यावत्पदस्येति वाक्योपक्रमगतस्येत्यर्थः। यत्किं
२ चेतिपदस्येति सूत्रान्तरगतस्येत्यर्थः। यावज्जीवमग्निहोत्रं जुहुयात् यावत्तदस्य सायं प्रातः कालत्वा
च्छिन्नजीवनविषयत्वेऽपि प्रमाणमिति दृष्टान्ते विद्वोऽवगांवलने सायं प्रातः कालविधाने नियम
नुसायंजुहोति प्रातर्जुहोतीत्यत्र अग्निहोत्रे विधीयमानः कालः सत्वं गत्वार्थप्रधाना संकोच
दे कः न त्राह कालस्येति। कालस्य पुरुषार्थनियमाद्यात्वात्तस्मिद्धत्वेन नित्यचर्वतत्वद्धतेः मित्त
कस्यकर्मेराः संकोचइत्यर्थः। तदुपपत्तेरितिपावत्संपातमित्यादेः स्वर्गेंद्रतपलेष्टा कृत्तौ विषय
त्वोपपत्तेरित्यर्थः। १२ असंजातविरोधस्योपक्रमगतयावच्छब्दस्य संजातविरोधोपसंहार
गतरमणीयचरणास्तुत्वा संकोचइति श्लोक तेन तत्त्वमिति स्वयमेव संकुचितार्थापावच्छ
नितदपेक्षितविषयेऽउपसंहारेरमणीयत्वइतिपरिहरति नेत्युच्यतइत्यादिना रमणीयचं राम.
र रागमित्तको अवरोहइतिवदत्यास्तुत्यार्थानादितरमुक्तफलकर्मविषयायवच्छित्तिविषयो ८
ति दनइत्यर्थः। यावत्संपातमितिकितरत्र नोत्कर्षतंकर्मोच्यते कर्ममात्रं वाता इत्यादि पावत्तदि

पा मिति २

नद्वितीयमुद्यमाह यावत्तांवेति। व्रयमर्थमावे हेतुरुच्छिरेति। द्वितीयाभावे हेतुः पुरुषांतरेति॥ पूर्वद्दर्शित
विकरणापूर्वपद्दंस्यतुच्छतामाह सकलेति। द्वैतभावे कार्यायोगात्कर्मरहितावरोहणं का
१ नमंतीत्यर्थः पित्रादिकर्माचरणाभ्यांतदुपपादनान्नस्यमानेति। सिद्धंतत्तत्सिद्धांतस्यैव द
र्शितः पूर्वदर्शितत्वादित्याह प्रद्युम्नानुपभुक्तफलकर्मवशादिति। अस्मिन्मतेसोत्र दृष्ट
ष्टार्थमाह दृष्टानुसारादिति। ननु सति कर्मशेषे तत्फलमपि स्वर्गेप्येव भोक्तव्यं समस्तम्यो
निष्ठेमाह स्वर्गार्थत्वेन विधानादत आह नचावशेषेति। निष्ठास्मरस्यात्विति छत्रमुविद्योव
फलभोगहत्यर्थः। हरितितांसमस्तैहास्तिकं। अध्यानांसमहोष्वीयं। नन्वस्ताचेति। दृष्टमाय
कि मस्ताल्लौकिकी का लिदासादिसरितिरित्यर्थः। वैदेशीतांसुकृतदाकल्ले। स्वागिरांमपिभागीभी
गशान्निकथयतित्रंगीवरोयदृ कालिदासः स्वस्मीमते सुचरितफले स्वर्गेरम्यांगागतातांशेषे ४ पुरेषः
तमिवदिवः कांतिमरवंडमेकं। अथवातत शेषेरोध्याहेवस्त्वतिलौकिकी। अवसितत्वहेतमस्तेतस्यवि
वरणंलौकिकीति। लौकिकन्यायमस्तेत्यर्थः। शाक्यतेवास्याः स्मृतेवेदोनुमातुरित्तजिद्विकाम

कल्प
८८

भुरोक्तिः । नैव युक्तमित्युक्ते नेत्युर्यस्मादिति । यन्नु स्वर्गस्य च भुक्तिमोक्षममितितत्राह नैरोद्दिकगम्येत्य
र्थ इति । मा उक्तेनैव च स्वसामान्यतो दृष्टेन लिङ्ग संज्ञो योनुमितः तस्य च भुक्तिभोगः कल्पितः तु स्वर्गस्व
र्गो दृष्टो न यागा विधिना विनश्यते मौ भस्त्र च स्वस्वर्गस्या यो गादित्यर्थः । एतदेव स्पष्टी करोत्यु
पित्नं न कर्मणां शेषं वक्ति । किं तु कर्मराशिमध्ये नु पश्चात् कर्मान्तरमिति । किं वित्पिदिवः स्वं दृष्टिवे त
५ ने ति परमुपमिमानो भुक्तिभोगमाह । यावदिति । पूर्वदेहावसानकालीनैतेत्यर्थः । युगपदेवैकला
ति भुज्येरन्निति इदानीमित्यर्थः । ननु युगपदनियत्कालविपाकं कर्मणां क्रमेणापि फलं ददतामनन्त
नचानियतकालमिति ननु स्वर्गादिफलं स्वर्गादिभोगानन्तरं परकर्मभिः सं परन्तु नेत्याह नचेति न
न तु शास्त्रे वेति । अग्निहोत्रादिकर्मणां पूर्व परस्थिताहं त्यर्थः । आचारस्य यागादि च भूतप्रधानत्वं कर्तृत्वेन
पुरुषार्थत्वमित्याह नानादिवदिति । ज्योतिष्टोमेष्वप्यनेनैतीर्थेस्नानमितितीर्थमिव हि सजातीनां मवति
दर्शपूर्णमासयोरप्यान्नायते तेजं जन्मप्रमाणो दृष्टान्तायि दद्वं कृतं इति प्रारम्भान्तावान्तरं धर्म राम
इति । न उतीर्थस्नानं जन्मानि मित्तं मन्त्रोच्चारणं च किं प्रकृतं प्रत्युत धर्मं उत्पन्नस्तु इत्यनुत्पन्नधर्मः प्रकृतत्त्वो ९

त्वेवाक्येन पुरुषधर्मत्वप्रतीतेः । प्रकरणाद्वाक्यस्य बलवत्त्वादेतदेव न प्रकृतक्रतोः ।

उत पुरुषधर्मो वेति संदेहे न तावदत्र लिंगक्रतुधर्मत्वे पुरुषधर्मत्वे वा पूर्वलस्य प्रकरणस्या
विशेषकत्वात् तस्मात् पुरुषधर्मत्वे प्राप्ते राद्धान्तितं शेषलक्षणे । न तावद् हि द्रव्यं पुरुषं प्रति फलाय
प्रधानकर्मत्वेन विधीयते । फलकल्पनाप्रसंगात् । का क्वचिच्छेषनिर्दिष्टस्य वर्तमानोपदिष्टत्वे
न फलत्वानतिप्रसक्तेः । गुणकर्मत्वं तस्मात् । न च तत्पुरुषमात्रे विधातुं शक्यं वैयर्थ्यात् । एवं विधा
नाशो हि धर्मविधानस्य द्रव्यसाधनत्वेन द्वारस्यावत प्रकरणाद्धेतो इति द्विर्वेतस्यापि प्रकरणस्य वा
क्येनानुमानत्वात् प्रकृतक्रतूपकृतमनुष्यधर्मत्वमेवेति । एवं च यथा तीर्थस्नानादेः प्रकरणाद्वाक्या
भ्यां क्रत्वनुष्ठायीपुरुषधर्मत्वं तथार्त्तेरप्याचारहीनं न पुनन्तीति वाक्यात् अमितविधिचिवाक्याद्वेदार्थो
नुष्ठातृपुरुषधर्मत्वमित्यर्थः । अजहल्लक्षणामाह स्मर्तेनुरायइति । यथाकारी यथाचारीति वर
णाचरणभेदनिर्देशो ब्राह्मणपरिव्राजकन्यायेनेति माध्योक्तं मधुक्तो ब्राह्मणत्वस्य यावत्पिंडभावि
१ त्वेन जातित्वे परिव्राजकत्वस्य गार्हस्थ्याद्यवस्थाया अभावेन जातित्वाभावात् करणत्वरणत्वयो
स्वार्हस्य तावांतरजातित्वाद्दृष्टांतासंगतिः प्रत्याशंक्याह गोबलीवर्देति । एतावरजातिविषय

८२

वल्प०
१०

गोवत्सीवद्वृत्यायेऽनुरक्तत्वाद्दत्तविषयत्वसामान्याद्वाह्यात्परिव्राजकद्रष्टृत्वपचरितद्वत्यर्थः
॥ ॥ नैषांकर्मिरांतं हृष्ट्यदापर्यवैजिपरिगच्छेत् जिपरिहीरांमवतितदानआवर्त्तनद्धुक्तच
रवाकोनान्वयः। आप्येति यत्किंचिदिह लोके पुः संसारीकर्मकरोति तस्यांतं फलं परलोके प्राप्य
तस्मात्लोकात्पुनरस्मै लोकाय आवर्तत्यागच्छति पुनर्ब्रह्मद्वात्पूर्वमप्यागतइत्यागमने तेनोदित्वा
त्संसारस्य किमर्थमागमनं कर्मणोक्तमानुष्ठानायातन्वतेऽनुज्ञायिअमुष्मिंल्लोके पेस्वर्वरमणा प्र
याचरणांतत्राणान्नतोनदकुलस्यांवाल्ह्यणादियोतिंश्चारीरमापद्येरन्निन्नियइत्तत्राख्यान्नाहाः द्वि
ष्टैत्रवस्य मेवेत्यर्थः योनिशब्दः स्थानवचनः कपूयचरणाः कुत्सिताचरणाः वर्णावर्णिनः। आश्र
माआश्रमिणः। विशिष्टदेशादयो मेधां नायेषां तेन या त्संसारे मज्जमानस्य जन्तोः कदाचित्किंचित्स
कृतं सुकृतमभिमानपूर्वकं कृतं यत्कर्मतच्यावदेहिकमेवा संसारात्स्य विमुक्तानेताव कृतस्य निवृत्तिर्यो
जना॥ ॥ ज्ञानिनश्चेदानीं स्वर्गादिकारीरागं प्रतीनेरित्युक्तो न त्वेवादिकाराद्विवेशो याज्ञवेयथा राम
मार्जाक्कपरिद्दियते। प्रयोजनं त्वनित्यादिकारीरागांसुम भार्गोत्तिगगनतसाचमपीनास्ती सिवृतिपा १०

फ्तीन्ति

दत्तेनचैतन्यज्ञाननायत्ति। चित्तपावच्छेदयोस्थि रम्ज्ञादिकर्मविषयत्वादत्तत्संकोचोयेवेचसर्वत्राख्य
तान्यर्थसंकोचेनास्तिहेतुरितिपूर्वपक्षमाह येवैकेचिदिति। हेत्वन्तमेवामतिद्वारादिकारिणामपिचेह
लोकगमनेप्राप्तइतिवक्ष्यमाणप्रतिज्ञायासंबंधः तकेवलंसमान्यान्तउपपत्तिरप्यस्तीत्याहदे
हारंभस्यचेतितु तोनुपपत्तिनरआह पंचम्यामिति। नित्वाउक्तिसंख्यातिप्रमङ्इत्यादिकाश्रितिः प्रय
यवास्तु तेनाह। तथाहीति। धूमशब्देनदिविद्गताम्यकालहृपेताभ्यज्ञासोमेत्यर्थः ऊर्ध्वमवचसोमभवंति
नसाधारणपुरुषस्तुनिर्वसंकोचमर्हतीत्यर्थः। निर्हियपोपानमनुष्येष्वेवसंकोच्यतामनुष्यत्व
ञ्चेष्टादिकारीणामेवेतिनिन्यममयोऽहम्। नचैतद् जितद्विरोनान्तरमार्गयोरेवस्तुतावदगम्यत्वर
स्यचज्ञातिमितिरेवावलंइत्वाद नितटादिकारिणांचंद्रप्राप्तिरेवेत्याह। [illegible]मनागमनायचेतिद्वयो
रेवमार्गयोरानमात्। तादिशायस्यासिद्धिमाहस्वमाह। [illegible]यस्यैवेति। स्थानत्वंभोगायतनत्वं। ननुचैत्व
यथासौलोकानसंपूर्णत्वतत्स्यस्यअश्नस्यजायस्वम्रियस्वेत्येतात्रितिमवत्वं। अस्मिंश्चैवइलोकासंह
रंहिनुत्वैतोलस्यानस्यमार्गांतरलंबनायतेरक्कमार्गत्वेप्रिसर्वकर्मिणांचंद्रलोकोतिविद्धः स्या

कल्प ११

दित्यतस्मात्तच्चंद्रलोकादीति। असंभवेत्तेन हि इति वचनोपपत्तिः सा चंद्रलोकादागत्येह स्थावरादिकल्मा
प्राप्यादिस्थावरादित्यर्थः। ननु पापिनां चंद्रलोकगमने तत्र भोगः स्यान्न तस्याकृताभ्यासप्रसंगात्तमा
र्गकथाहेतस्य मार्गान्तरेयेति। पूर्वेक्त्तीयस्थानश्राव्यस्य मार्गपरत्वाभावः प्रतिपादितः इदानीं नक
रेणाचनेत्यस्य तृतीयस्थानस्य च कल्पितत्वं निराकरोति नकतरेणचनेति। एतयोर्देवपथपितृया
णयोः कतरेण च तस्यकृतरेणापि ये न गच्छंति तानि क्षुद्रजन्तूनि भवंतीति न देशान्तरकीटा
दिप्राप्तिर्मार्गद्वयव्युत्थितानामित्येतन्नमतं यवाक्यस्य चंद्रलोकासंप्रापरत्वात् असंभूरता
स्य च चंद्रलोकादागतानां कीटादिप्राप्त्यनुपपत्तेः कतरेणापि नेति निषेधो विंदार्थतस्त्वर्थः। तृतीय
स्थानमिति तत्र स्थानशब्देन यद्यपि शरीरेष्वुत्पत्तत्वात्तन्मार्गमाह तथापि मार्गो भक्त्यस्तृतीयत्वे
न तिष्ठत्युपमानस्य स्वार्थस्य मार्गत्वं गमयत्यवान्तरसंख्यातिवेत्रास्य साजात्यापेक्षत्वादिति सि
द्धांतयति स्मरंति ताद्दिशा। असौ लोको न संपूर्यत इत्युक्तदाहृत्त्वोन्यायसाम्यादसौ मार्गद्वयकं॥ त
प्रतिपन्नंतस्य मार्गद्वयस्य प्रतिहदी इतं मार्गमेवाचष्टी तन्नशरीरमित्यर्थः। यद्यपि तृतीयारोमैव

राम ११

गत्वा आगत्य च प्राप्तस्य दृढ्ज्ञानं तु देहग्रहणस्य वृत्तीयस्यात तत्त्वं निर्दिष्टवेन तत्तु मार्गांतर
स्यतन्हितत्व हद्व हरमरणीय च रस्याद्वस्य त्रापि प्रमाराम सुभाप्रमशारीरस्य वृत्तीयत्वान्निर्दिष्टः
स्यात्तु चात्तितस्मात्तृतीयस्यात तशब्दो मार्गवाचीत्याह तत्र इत्यादि कारीराद्युत्तादितां न
पे नु ये वै के चास्मात् लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति सर्वेषां चंद्रगमनमुक्तमिति।
सत्यं तत्सामान्यवचनं रुत्तीमार्गविषयविशेषवचनेन संकोचनीयमित्याह तस्मात्त्व केचे
ति। यदुक्तं पंचम्या मामकुनाविप्राह तिसंख्यानियमात्सर्वेषां स्वर्गमनमिति तत्राह स्वाध्यायवि ग
धानपरमिति भास्करे राखंड्यं तिलांडुः के मिमि समानफल मात्रकमनुक्तमित्याशंक्या
याततित्तिरस तेन पूर्वपक्षोपपादकतया संयमने चित्यादिस्य चाशितीनामितिनमोगः स्वद्
लोके दुःकः तिनां कित्तुत्तरद्वारा न्तु रकं प्राप्यावरोहादिति विद्याकर्मस्योरितिस्त्र्यादारभ्यासिद्धा
तो दर्शितः तत्र द्वयति। अवरोहापादानतावे ति [redacted] संयमने त्वनुभूयावरो
हद्धत्वेसंमनस्य रूतस्या पवरोहापादनतानाशीघ्रमवगम्यते। नु शब्दश्च चंद्रापादनतावार्थ
म्र।

कल्प० ११

यते। परस्य तु भोगदेशमप्यमध्यादूर्ध्वेन। चंद्रमंडलादर्वागिति चाध्याहारापेक्षादिसर्थः।न ॥
नसायो रायइति। सामगवत्वं एनावेनपरोपरस्मादेहपातानंतरं यते गम्यते इति संपरायः परलो
कस्तत्प्राप्त्यर्थः साधनविशेषः संपरायः स बालमविवेकिनमविवेकिनं वित्तविमि तेन मोहेन
मूढं छन्नं दृष्टिमंतं स्ववशमादं कुर्वंतं प्रतिनभाति सन केवलमप्रबुद्धः किं तु विपरीतदर्शी य
तोयमेव लोकः स्त्र्यन्नपानादिरस्ति न परइति मानी मननशीलः। अतः स देहं तु स्वमाचर
न्पुनः पुनर्जननमरणाद्याप्त्यामेव वशमायद्यते इति। मृत्योर्न चिकेतसं प्रति वचनादि वत्सं जं ते
नानापरलोकागतानां सगमनं संगमं प्रविधायशीरमायते इति जीवजं जरायुजं अंडजं किंचि
न्रश्मि●कादिमानुरुदरे निर्जिघ्रमत्वाज्जायते। उद्भिज्जं च किंचिद्गृहाद्यचेतनं पृथिव्यांक
द्भिद्य जायते। जरायुजं तु जीवत्वेजायत इति॥ ॥ साम्परायाभावानिरूपणाते। अत्राकाद्वाचायु राम ११
मिति कर्मत्वनिर्देशाद्रहूमो भवतीत्यादि भवतिश्रुते [redacted] सु संशयः। तद्वा हयं यतीति प्रुके
मार्गोपक्रमणीयत्वनिर्देशादास्थानत्वाद्रस्य मार्गत्वं तरणार्थत्वं ननु भवतिश्रुतेः सा द्रष्टव्यपत्वे

रितिवा[illegible]स्या २

णार्थत्वेऽस्ति निमित्तमिति संगतिः वायुमिति कर्मत्वेन तन्निर्दिष्टस्य वायुर्नत्वेति तादात्म्यवत्वे
न परामर्शोऽकवाक्यशोभा न्निरूप्येत पूर्वपक्षमाह वायुर्नत्वेत्यादि संभवेऽर्थेत[illegible]र्म[illegible]शोऽकाह
न चान्यस्येति नंदिकेश्वरोऽहिन्दुमारध्यमानुषशरीरस्यैव देहत्वेन परिणतामानुष्योपि
तत्वेऽगास्य शापादजगरत्वं जगाम स्व वेहिस्तु निर्भवतिदुतरथात्वकारणस्यादिति भाष्यं तद
नुपपन्नं तत्र तिष्ठतेर्हिंसा ह्यात्ते वत्वे मारणावकेऽव वहिस्तुतेगौरणां तास्यान्तत्वकारणे स्या
शोऽकाह गौरणामिति गौरयामपि गुरास्य तत्वकारणास्ति। तत्क्षितत्वकारणायात्वनिषेधे प्रसंवंधा
न्तरवर्तमानायां संबधिवस्वांतर परत्वेन संबंध परत्वे गुरणान्तरवर्तमानायां तु गौरणां
वतौ गुरणा परत्वेन गुणान्तु ग्रावस्तु परत्वमिति विवेकः। स्वामाव्यापत्तिरिति पाठे स्वभावो भावो ये ८८
षां ते स्वभावास्तेषां भावः स्वाभाव्यमिति समपदाध्याहारः स्यात्तत्। साम्यापत्तिरित्युक्तः पाठस्तु
व्याचष्टे साम्यान्तर इति चंद्रलोके अुषित्वा यत्र फलकर्मक्षयानंतरमेतमेव वक्ष्यमाणं पंथानं
पुनर्निवर्तन्ते पुनः शाह्यप्रयोगादतादो संसारे पूर्वमपि चंद्र मेऽजस्त गतानि वृत्तान्ते विशाम्यते कोऽस्याच

१ प्रवृत्त

कल्प० ध्यायं प्राप्तिनिवर्तंत इति । उच्यते । यथागतं मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमिति
१५ गमनक्रमः । आगमने त्वाकाशादिति हि श्रूयते यथेतमिति प्रतीयते । आगमने पितृलोकाद्यसंकी
र्त्तनाद्यथादिसंकीर्त्तनाच्चानेवमपीति गम्यते तो यथेतमित्युपलक्षणं । आकाशं प्रतिपद्य
तेयां आपश्चंद्रमंडलशरीरमारब्धवत्यस्ताः कर्मक्षये द्रुता आकाशगता आकाशसदृशा भवंति
तदुपश्लिष्टा अनुशयिनोऽप्याकाशसमा भवंति । ता आपो वायुना इतस्ततो नीयमाना वायु
समा भवंति । अनुशय्यपि तादृशो भवति । तदनंतरं गमनकाले यो धूम आसीत्तत्तुल्यो भवति
ततः अपां भरस्तात्संस्तनोदकमभ्रेण तद्भवति । ततः जलसेचनान्मेघो वर्षणकर्ता स भवति
तद्भावं तत्सादृश्यमापद्य प्रवर्षति । वर्षधाराभिरनुशायी पृथिवीमापद्यत इत्यर्थः ॥ ॥नाति
चिरेणआकादिसादृश्यचिरा । चिरत्वविचारणायां गतिः स्यादेतदतो वै खलु दुर्निष्प्रपततरमि राम
तिदुरुपसर्गतरप्प्रत्ययाभ्यां व्रीह्यादिप्राप्तिनिर्गमनस्येव विलंबितत्वप्रतीत्यन्यथानुपपत्त्या १५
काशादेर्वेगान्निष्क्रमणं प्रतीयते ततः कथं तत्रापि चिरावस्थानं नहि चेत् आह दुर्निः प्रपततरमिति

३ प्रवधिसंतत

दुःखशोकहेतोरेकदेशात्तस्य रागाद् दुःखं वक्तितत्त्वविलक्षणमित्यर्थः। उत्तरावधि करणोत्तरानुशायितां दुःख

निषेधात्मकत्वं इत्युक्तं इत्यदेवकवि ररवत्रुसिद्धान्तयतिपिनि नितचैव मस्यान्तारंभः अनुशायिनामाकाश

दि...साहचर्यं चिरभावि। अनुशायिसाहचर्यपदत्वात्। वीप्सा चित्तं वितत्वे तत्र साहचर्यपदीत्यत् दि

मानस्य प्रागुक्तश्रुतार्थापत्त्या बाधार्थमधिकरणारंभो पपन्न इति॥ ॥अन्याधिष्ठितायाः॥ अत्र जायत इ

ति श्रुतेः। कर्मपूर्वकत्वाद्युक्तिस्य संज्ञायो भवति श्रुतेरुपचरितार्थत्वस्योक्तत्वात् पुनरुक्तिमाशंक्याह। आ

काशस्यानुत्पत्तिः। सर्वगतात्मसंयोगस्यासाध्यत्वात् तस्या हेतुर्यते नो... मित्यर्थः अन्यस्या यथा याव

त्तुपपन्नेर्हितत्रोपचारस्तत्रः। अत्र तु जायत इति ब्रह्मस्य देहस्य ग्रहणोत्तरत्वात् ... न त्वाविरुद्धमिति

तत्त्वोपात्तत्वादहिमित्यर्थः। अस्मिन्सूत्रकरणे यन्मुख्यजन्मनं ... तं यथा रमणी। यावरणा इत्यादि अ

नुव्यापकं कर्मजन्मश्रुति व्यावृत्तात् ... तत्वव्याहतिमाशंक्याह तत्त्वसिद्धिमाह। न चरमणीये त्यादि

२ सा शरीराभावः शरीरितस्याभावादित्यर्थः। ननु इष्टादेर्विहितत्वात् ... स्थावरशरीराभिहितत्वा

च आह। इष्टादेश्चेति। विहितत्वेपि तत्र ... हिंसो ... दिनिषिद्धत्वात् दुःखहेतुत्वेत्यर्थः।

अन्तेश्री स्वादिम्भो
उत्तिष्ठन्तलते
१ नाय नुपपत्ता

कल्प० १४

न्त

सामान्यविषयनिषेधशास्त्रस्य विशेषशास्त्रेण बाधनं स्यात्तदुक्तं तस्य ततो दुर्बलत्वादिति तेन तच्च संप्र
न्नमिति योजना। सामान्यशास्त्रस्य दौर्बल्ये हेतुः सामान्यद्वारेणेति। विशेषशास्त्रप्राबल्ये हेतुः साक्षा
दिति। ननु क्रतुप्रकरणस्थहिंसाविधेर्हिंसा न क्रत्वङ्गत्वविषयः। हिंसानिषेधस्य तु ज्ञात्वानर्थपु
त्वं गोचरत्वमिति विषयभेदाद्विधिनिषेधयोरविरोधश्चेत्तर्हि क्रतुमध्येऽपि निषिद्धहिंसानुष्ठाने कथं वै
गुण्यं स्यादित्याशङ्क्याह यथाहुरिति। क्रत्वङ्गमहत्तरमादिति निषेधात्पुरुषार्थत्वात्तदतिक्रमे पुरुषस्यै
व प्रत्यवायो न क्रतोर्वैगुण्यं। यथाविहितस्य सिद्धेः। न हि क्रत्वङ्गनिषेधः प्रतिषिध्यते यतस्तदतिक्रमे क्र २
तुवैगुण्यं स्यादिति सन्दर्भार्थः। एवं च विहिताया अपि हिंसाया दुःखफलत्वं यदि विधिनिषेधयो
रेकविषयत्वं तदेव नास्तीत्याह पुरुषार्था पारवेति। क्रत्वर्थो हि प्रतिषेधः क्रत्वर्थहिंसाप्रतिषेधे रात
वैगुण्यं न हि स्यादिति निषेधः क्रत्वर्थां हिंसां प्रतिषेधेत तदैव क्रत्वैगुण्यं स्यात्तच्च नास्तीति विधिनिषे राम
धनिषेधयोरेककार्यतामाह तथा हीति। यो हि यदर्थं प्रवृत्तो यस्माद्विषयान्निवर्तते तन्निषेधोऽपि तदर्थ इत्यर्थः। १४
नहि क्रत्वर्थहिंसाप्रतियोगिकोऽयं प्रतिषेधो तत एव क्रत्वर्थत्वं स्यादित्याशङ्क्याह नचैतदिति। येन प्रकरणाम्नातत्वे
२

निषेधाः क्रत्वर्थपुरुषार्थौ वा उभयमप्याकात र

नारत्वदतस्य क्रत्वर्थत्वेनंति निषेधो विकृत्वर्थः स्याद्भायेत च तेनैव प्रकरणाम्नातत्वेन पशौ निषिद्ध्योराज्य
भागयोः क्रत्वर्थत्वाद्वा तन्निषेधस्यापि क्रत्वर्थत्वं भवेदिति तत्प्रकारेण तर्हि हिंस्यादित्येतन्नक्रस्य विध्यप्रकरणेन स
मान्नातमित्यर्थः। नत्वाज्यभागौ भवेतां क्रत्वर्थौ निषेधस्य भावार्थः स्यात् क्रत्वर्थः स्यादित्यत्राह न हिंस
ति निषेधः स्याग्नेयादिदेशगाज्यभागनिषेधे सति तदंतर्भूतांगानां भावार्थरूपे राज्यभागसाध्य
उपकारो जन्यते न केवलं निषेधमात्राश्रयः। अत एव विकल्पः आज्यभागतदभावयोः फलं प्रमाणितस्व
तुल्यानंतप्रामाण्यकरात्तु पक्षे दास्यमेव नमाहुः। अत्र वपा प्रकरणे स्वैतद्वाक्यमस्तीति क्रत्वाप्रतिषेधत्वम
स्योक्तं यत्तु सोपसंहारे तु हानौ तत्प्रावर्तते सधिकरणे दर्शपूर्णमासप्रकरणपठितस्य नतोपदर्शवितस्य
पाशुकप्रकरणे श्रुपगते न द्वाक्यसिद्धार्थत्वं वादित्वे नार्थवादित्वं वक्तव्यमिति तद्विरोधश्च्युतिः। अन्नत्व
दत्तानिषेधस्य क्रत्वर्थत्वे विकरणमनुकम्पते। दर्शपूर्णमासाङ्गयोराम्नायतेनान्नत्वं वेदे दृष्टिा। तत्राय
ने निषेधः क्रत्वर्थः पुरुषार्थो वेति संशयः। तदर्थं प्रतिषेधोऽपवरणं किं सर्वेषां चविंत्यते। यो हियदर्थं प्रवृत्तः
स तत्रिवार्यते। आम्निदिते हि कर्तृनिरितस्य प्रत्ययेन प्राधान्येनाभिहितत्वात् प्रवर्तते प्रयोजनाकांक्षावेला

स तदर्थमेव निवार्यते मरुति के मर्थ्य निर्णयाय चक्रारव्यातेन कर्तृ प्रधीयते न वेति विचार्यते १

कल्प० १५

यां स्तुतिसान्निध्यापितकर्तृपेक्षितोपायत्वं प्रकरणबाधयावगम्यते। अनभिहिते तु बाधकस्तत्वभावाद

र्थाच्च कर्तृः प्रवृत्तिर्न तिङ्ग्रहणस्येवैनैवावगतेः प्रकरणेन प्रवृत्तेः अत्वर्थता गाधार्यतेनात्र च यवतिदेवद

त्ताद्वयाद्याख्याने: कर्त्तृत्वमात्रस्य कर्मणी चेति सूत्रगतचकारेकर्त्रर्थ्यपि लकारविधानात्तत्कार

कशाला चतिवादित्तांस्याति बहुव्रीवेनम्रत्रवाचकत्वाद्व्याख्यातामिधियः कर्त्तेति व्यायया राज्ञो तिते

श्रोषलक्षणे। क्त्वर्थीयं प्रतिषेधं अव्याख्याते तत्कर्तुरनभिधानात्रापात्वाख्यानात्कर्तृप्रतीतिसा

ना श्याख्यानाभिहितभावनया कर्तुरुपस्थापदत्वया। सिद्धमत्त्वं तत्त्वमिध्येयत्वष्ठोत्तत्वयोरुदासीनं

अपि चात्लः कर्मणोस्यभिधायकोकयो रितिसूत्रेण द्विकैकत्वयोरर्थयो र्द्विवचनैकवचनविधानात्कर्तृ

संख्येवाख्यातवाच्यातकर्त्तांसंख्येयवकन्नविवक्षायांहिदेके वितिस्याद्वयो [illegible] रेकस्यच कर्तृणां

बहुत्वाद्याख्यातेनकर्तुरनभिधानेकरणादिसंख्यानामपाख्यातेनाभिधाप्रसंगः पचातन्नस्य त्रु राम नारू

ते पि कर्तुर्गम्यमानत्वात्संख्याभिधानतापात्तरइत्तिचेत्तान अनभिहितस्याधिकर्तुरितरकारकापे १५

क्षयाप्रधानत्वाद्विघनायाश्च तद्व्यापारत्वादाख्यातेन माधान्येन तयोनत्वादनभिहिताधिकारस्य

अनभिहिताधिकारश्चिहितस्तीमायेत्रेः पचति देवदत्तेनेति प्रयोगप्रसंगः गम्यमानकर्तुः संख्याभानेनानभिधाने ह

ञाधानेनाद्योतितत्वाभिप्रायत्वात् करणादीनां पञ्चानां साद्गुण्यख्यातेः प्रधानेन द्योतितत्वात् आधा
यद्योतनं तस्यादौ च कर्मप्राधान्येन कर्तृप्राधान्यस्याद्योतनानन्तरं तस्मादाख्यातेन कर्तृप्रधाना २८२
भूमिरुक्तमनन्तरं वदन् प्रतिषेधस्य क्रत्वर्थत्वमिति॥ ॥ नानृतमावृतप्रकरणानान्नानात्वाद्धिंस्यादि
ना३अप नियमिषेधस्य क्रत्वर्थत्वं तु कथमवगम्यतेन नैतद्युक्तं पुरुषस्य दर्शपौर्णमासगामित्वं न इति। नत्र पुरुषार्थप्रती
तिमुपपादयति नत्स्यादनारभ्याधीतेनेति तद्धिंस्यादित्यनेनेतित न्यायातिरिक्तोपादानं विगर्हि
तं। आत्रवाक्ये हिंस्यादिति भागेनानिषिद्धितस्य पुरुषव्यापारस्य पुरुषार्थत्वभावप्रसक्तत्वयः। तनुहिं
सेव भावाकिं तस्यादत्त आह विध्युपहितस्येति। श्रेयःसाधनत्वविध्यवच्छिन्नत्वादित्यर्थः। नकेवल
मर्थविरोधः श्रावत्वर्थभाव्यत्वे अपितु शाब्दविरोधश्चेत्याह विधिविभक्तीनाहिं सेवकर्मक्रियानन्वयत्व
परित्यागेनेत्यर्थः। पुरुषधर्मीतिमुपपादयति आरभ्याधीतनिषिद्धितस्यापीति॥ कर्त्रिव करणेत्युत्पन्न
निषिद्धितस्यपुरुषस्याप्राधान्येननिषेधस्य [redacted] प्रकरणस्य वशात्कर्तृत्वं इह प्रकरणानावादा
र्थिककर्तृशेषत्वमविन इति निषेधस्य रत्नचुप्राचीनत्वं चेत् अनारभ्याधीतेनेति यदेनद्योतितं तमनुहि

लर्थत्व२

कल्प
१६

स्यादिति विधान्द्रोतयदि हिंसा श्रेयःसाधनमवगता कथं तर्हि निषेधाव का शद्धया शंकायामनुवाद
र्गादिसाधनत्वं कथं तर्हि पुरुषाः प्रवर्तेरन् अप्रवर्त्तमानेषु वा तेषु कथं शास्त्रारं
भमात्रस्य मतं आह। न यावत्कर्मेत्यादि। लौकिकं कर्मविधीनां ब्रह्मज्ञानपरत्वम
त आह भेदप्रपंचेति। अप्रविलापितेऽपि प्रपंचे ब्रह्मादितं प्रत्येतुमशक्य आकाशादि
आपात प्रतीति लयो न भासत आह हन्त चिदिति। ननु केऽस्य स्वर्गसाध्य देहातिरिक्तात्माप्रतीतिरुक्ते
च वाक्यस्य न स्वरत्वं स्यादित्याशंक्याह आपातप्रतीतोऽपि न ह्यात्तु देवताविग्रहादिव
त आह तत्त्वेति। निरालम्बनस्य कथं प्रपंचप्रविलयप्रमित्यर्थत्वमत आह सतीपी राम
पि ति असन्त प्रमितार्थो व्यवहारन्नादिरेव प्रामाण्यप्रयुक्त अर्थत्वमिति भावः स्वर्गकाम २६
वाक्ये देहात्म भावोपलादि न तत्र प्रपंचविलयक्त मार्गो दोहनवाक्ये दर्शपूर्णमासा

ने२

साधिकारिणामुखोदोहीतेप्यधिकारावगमात् भयचाधिकारिभेदप्रविलापनद्वारा
नडुपत्तन्धिनात्मभेदः प्रविलाप्यतइत्याह ज्योदोहेनेति। एवं प्रवृत्तिविषयजडप्रपंचस्य
स्वरूपेणाप्रविलयं प्रवृत्तिनिषेधेनात्मज्ञानोपयोगीनीत्याह नरः। विधिवाक्यानी
त्यैहिकफलानीत्यर्थः। पारलौकिकफलानां देहात्मभावप्रविलयार्थत्वस्योक्तत्वात्।
संग्रहणीयदि प्रवृत्तिपरा तीन भवंति स्वर्गकामपदस्वरसामकामपदस्यापि पुत्तसु
दि मर्थकत्वायोगादित्यर्थः सेवाद्विषोपायप्रवृत्तिषेधार्थानीति। सेवादिविषयप्रवृत्तिर्हि
सायह्ह्यापामनुवीयमानायोत्तमवा नीत्यर्थः एवं मुख्यार्थ [redacted] परिग्रहे बाधक
मु द्ष्टीतेन विधीनां प्रपंचलयार्थत्वमुक्तमिदा नीन द्वा रागस्वीकारे प्रयोजनमाह नया
चेति। ननु यदि नकमेरणां फलसाधनत्वं कथं न लिंङ्गाद्दे विरुसमत आह। अनादिवि
चित्रेतिकथं नहि हि विधिरिनित्वपापिसंग्रहरूपादीनां दृष्टार्थप्रवृत्तिपरिसंख्यायकत्वं
१ दि कृतवनाविनित्यर्थः तथाचपलार्थतोधिकारिणोत्रभावेपि त्वं नस्यादित्यर्थः। वायूदका
महेतिकर्तुमेन नस्यभेदमात्रप्रविलयं चाभिधायप्रवृत्तेः प्रविलयमाहति षेधवाक्यानीति सा हारेव ८

श्कल्प० दिवद्विधेः प्रवर्त्तकत्वमित्येतत्तावन्निषेधे न स्वर्गकामाधिकारगमितो दृष्टांतं दर्शयति।
२८ उपदेशो हीत्यादिना। ननु भवतूपदेशो विधिः कथं तस्य फलसाधनताविषयताज्ञानमा
ह उपदेशश्चेति। नियोज्यः प्रवर्त्यः पुरुषः तदीयं प्रयोजनं साध्यं यस्य कर्मणः तन्नियोज्य
प्रयोजनं। ननु नियोज्यप्रयोजनसाधनतया आज्ञादेर्बोध्यते एवमुपदे
शोपि किं तत्स्यादत आह। नत्वाज्ञादिरिव नियोज्य प्रयोजनं इति उपदेशादस्य तु वि न
का शेषः उत्तमनियोज्य ज्ञाया यथा गामानय। अनुत्तमनियोज्यस्य स्वार्थतया यथा ममपुत्र वि
मध्यापयेति। अमयज्ञापि प्रवर्त्तयितुः प्रयोजनसाधनं बोध्यते नैवमुपदेशो नत्वाइ
तुमाह। नत्वाभिप्रायस्येति। प्रवर्त्तयितास्वस्य हितं भवत्विति यत्र प्रवर्त्तयति तत्राज्ञा
दिस्तदभिप्रायविशेषः प्रवर्त्तकः। अपौरुषेये वेदे तस्यासंभवान्नियोज्यप्रयोजनसा
प धनत्वमुद्दिष्टं नत्स्यार्थः। नु च वाच्यमुपदेशोपि नियोज्यप्रयोजनसाधनाविषयोभिप्राय राम
विशेष इति कथमसापौरुषेये वेदे संभवतीति यतः परस्य स्वस्य वा प्रयोजनमभिसं २८
व मन

संधा

पापिगोपालादिमार्गोपदेशत्वं स्वतार्थविषयं द्रष्टव्यं। न तु नियोज्यप्रयोजनसाधनविषयत्व
मनुज्ञायामपि द्रष्टव्यं यथेष्टमिति तथानुवृत्तिवादे न वा हास्य चेति। अननुज्ञायां हि प्रवृत्तस्य
प्रवर्त्तनं उपदेशेत्व[redacted]प्रवर्त्तस्य तत्तस्याप्रवर्त्तप्रवर्त्तते[redacted]कत्वे सतीति विशे
षणविशिष्टनियोज्यप्रयोजनसाधनविषयत्वमुपदेशस्यैव लक्षणमिति त्याज्यं किं कायाग
पपादितमित्यर्थः। नियोज्यप्रयोजनेत्यादेर्व्याख्यानमनुष्ठात्रपेक्षितेत्या[illegible]भावकत्वामि
मनन्तिर्योज्यस्यार्थस्य र्थसिद्धानुसारत्वतेनादर्थ्यादि नियद्द्याच्छे। अनुष्ठात्रपेक्षितेनौर्द्दिनेति पाप
नादर्थ्यात्तादर्थ्यं सति पूर्वपक्षोल्लसप्रवर्त्तनामात्रार्थत्वे सतीत्यर्थः। यदुक्तं साक्षाद्भावनाभाव्यो
यागादिः स च दुःखरूपत्वात् प्रवर्त्तनिरितिनत्वाहतत्वेनइति। विधिविषयीभूतभावनायाः श्रे
साधनत्वात्स्वर्गस्वेष्टरूपान्नतु यागादयः। यादिस्तु स्तत्वेनर्ववृत्तिविषयतानेकांस्यात्तस्वन्ना
स्ति। यागादीनां भावनां प्रत्य[illegible]स्पिन कर्मतामात्रत्वादित्यर्थः। यागादीनां भावनोद्देश्यत्वाभावे
हेतुः दुःखत्वेन कर्मत्वमिति। यत्स्वर्गादेर्भावनां प्रति उद्देश्यत्वं नाम साध्यत्वमित्युक्तं तत्रा

नी०२ प०१

उद्देश्यमात्रस्य प्रवृत्तिविषयत्वात्।

तुरू

कल्प त्स्वर्गादीनां विधिना सर्वो हि कामनानंतरं प्रवर्त्तते न स्वर्गादेर्भावनायाः एवं रूपकामनाविषय
१८ त्वादिति तत्राप्रधानत्वं स्यादित्यर्थः । यत्तु द्रव्यत्वात् स्वर्गादेः क्रियाशेषत्वमिति तत्राह । प्रीत्यात्म
कत्वादिति । रूपमाहेतुनां स्वर्गकामादेरधिकार इति यद्रूपमाराप्रतिज्ञायां स ब्रूयः । प्रीतो हि स्व
: स्वर्गशब्द इति तत्वं साक्रियोत्यर्थः । यत्तु स्तुवंतपदाभिधेयत्वात्सिद्धरूपत्वेति तत्तत्राप्यधिकाम
पदात्साध्यत्वप्रतीतिरित्यभिप्रेत्याह तामेति । यदपि पुरुषविशेषणत्वात्स्वर्गादेर्न भाव्यत्वमि
ति तत्राह पुरुषविशेषणानामपीति भावनाहि पुरुषकर्त्तृत्वादेन विशेषणम् स्वर्गपरं स्वर्गका
मपदं स्वर्गभाव्यत्वेन समर्थयतीत्यर्थः । यत्तु यागादेः स्वर्गादेश्च भाव्यत्वेन भावनाभेद इति तत्राह क
लार्थं प्रवृत्तेति फलार्थं प्रवृत्तस्य पुरुषस्य या भावना तया भाव्यत्वलक्षणेनेति प्रथमसंबंधे वि
नाहः फलार्थं या प्रवृत्ता भावना तया भाव्यत्वरूपस्येति हि तीयसंबंधेन तस्य यागादेः साध्यत्वम राम
स्य तत्साधने तु स्वर्गादेः स्वरूपनइति स्वतंत्रसाध्यया भावात्कभावनाभेद इत्युक्तं भवति । ननु २८
यागादि ना भाव्यत्वात्स्वर्गवदिति तत्राह भावनाभाव मात्रस्येति परस्वादेरपि तथा भावाद्या

१ नैवाऽर्णस्याभाव

२ पत्रपत्रभावकानन्तरतोदेरपतस्वबधः टीकापां पूर्वापिहेफलस्यापि व ... सप्तितर्थी

पारविच्छेदे परासाध्यत्वादित्यर्थः स्वर्गादीनां विति यं येभावनांप्रतिस्वर्गादीनाममव्यवधाना
न्निराशयः उक्तः इदानीमव्यवधानसंगीकृत्यापूर्वद्वारकत्वेन साध्यत्वेऽप्याकांक्षानिवृत्ताय नाहफलस्य
साक्षादिति तद्रूपतया स्वद्वारेण फलस्य सर्वत्र व्यापितया व्यापित्वेनावस्थानादित्युक्तं तित्
व्यापित्वनिर्देशोऽस्य द्वारत्वस्यास्य व्याप्तिशास्त्रपरिहारार्थः। न चाधिकाराभाव इति। स्वर्गकामो
युक्तो योगाधिकारान्वयानुपपत्तेर्हि देहात्मत्वाभावावगतिरित्यर्थः। संपातश्चापातः पञ्च
पंचप्रविश्य यादितस्व द्वारणा यां प्रयोजनं शास्त्रस्य सिद्धिरिति तत्राह न चैतावतेत्यादिना।
सर्वपारीषदनयास्य परिष्करणप्रसिद्धतया यदि त्रामाकरामत्वी रनश्रसनिव्यापारवतिनव्या
पा रइतितान्नूरत्याह। अतन्त्र स्वर्ग नैयादिषि तिति। तेषामपि मतेऽप्यास्नेत्यादि वाक्यैर्यागाद
वविधीयं तेनापूर्वीरिण। अधिकारवाक्यसन्निधिस्समाम्नातानामाग्नेयादिवाक्यानामधि
कारापूर्वानुवादकत्वशंकायां वृद्धितत्रा तांद्रागिसे वाहृ वांतरप्रत्यया जनककल्पनेऽप्य
परमापूर्वजननपितबे ऽवांतरव्यापाराजन्यमानाश्रसास्वापि व्यापारवं तीत्यर्थः। अथतो

जैमिनि

कल्प० २९

किंकोवदेत्तनत्राह असत्त्वपीति। सापेक्षे स्वर्गादूफलसिद्धेर्वक्ष्यमाणात्वादविचित्रस्येति
माध्यायोगमासंक्याह केवलादिति। नित्तहिकर्मापेक्षत्वप्रसंगोनित्येदोषद्वितिकर्चपूर्वपक्षा
वकांक्षास्तत्राह कर्मभिर्वेति। कुविष्ठ्यंकारयतिकंचिददृष्टंमनिमितिवेवमप्रसंगइत्यर्थः। क
र्मादिचेतनाधिष्ठितमचेतनत्वात्‌हनरहदित्यनुमानस्याजिष्वे: सिद्धसाधनत्वमाशंक्या
हनचचेतनस्यमात्रमिति। कर्मस्वरूपंतस्यचमुमस्यस्वरवमितरस्पष्टः स्वमित्येवसामान्य
विनियोगः आदिशाद्देनज्योतिष्टोमास्वर्गाद्यादिविशेषविनियोगमुच्यते। फलसिद्धिपू
र्वक्षरामकर्मस्वरूपादिसाक्षात्कारवदधिष्ठितमस्माभिः साध्यतइतिनसिद्धसाधनमि
त्यर्थः। आगमप्रमितिसंभावनामात्राभिधानात्‌पत्युरसामंजस्यादित्यत्रोक्तस्वंडतानाम
नवकाशः। दुर्घटयोजनानानातिवेशात्तार्थः। नमिकाविशेषोरच्यते। सावहात्तः। निरंटकि
निष्ठकिंतनिरीनमित्यर्थः। नन्वीश्वरश्चेत्फलंददातिकिंकर्मभिरतआह लौकिकईश्वर
स्यकर्मापेक्षामुक्त्वा कर्मन्यामीश्वरापेक्षामुक्तांस्मारयि। नादिहकेवलंकर्मेति। नकेवलंकर्मा

राम २९

इति ईश्वर युक्तोसंभावनापाम्रयोग:

धिष्ठातृत्वादीश्वरसिद्धिरपि तु कर्मभिरीश्वरप्रसादस्य साध्यत्वाच्चेत्याह तथा देवऋणात्म
क इति। तत्प्रसादयतीत्यस्य प्रसादयतीत्यस्यार्थः। तदाराध्योयं प्रतिषेधवचनैः विरोधनद्रोहः तत्तत्प्र
घातयागेन परमेश्वरः प्रसीदतु तत्रांगानुष्ठानं तर्हि किमर्थमत आह यथा च परमार्थ इति
।अत्र भास्करेण प्रलापे भाष्यकारमतेन नयामि त्यापारः फलोत्पादकः सर्वसंनिधिमात्रस्य
प्रवृत्तिनित्यः सर्वजीवसाधारणात्मा लोकतस्यैकैकजीवकर्मभिः साध्यत्वमिति तन्मास्य व्याख्यो ते
नेनानुष्ठानादिनिषेधनरिति। अविशेषोपाधिविशिष्टादीश्वरस्यानित्यः प्रतिजीवं कर्मसाध्यश्चा
नुग्रहस्तीत्यर्थः ॥ छ ॥ छ ॥ इति श्रीमत्परमहंसपरिव्राजकस्य श्रीमदनुभवानंदपू
ज्यपादशिष्यभगवदमलानंदस्य व्यासाश्रमपरनामधेयस्य कृतौ वेदांतकल्पतरौ तृतीयाध्या
यस्य द्वितीयः पादः ॥ छ ॥ श्री ॥ छ ॥ श्री ॥ छ ॥ श्री ॥ छ ॥ श्री ॥ छ ॥ श्री ॥

३०

तृतीयाध्याये
द्वितीयः पादः

क.ख्य.न२०

न.ध्याय [redacted] र.पादोसेः

भेदचिंताप पौनुवेधा

कल्प० श्रीगणेशाय नमः ॥ ॐ सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् ॥ ॥ द्वितीये पादे त
१ त्वंपदार्थोपरिशोधितो इदानीमपुनरुक्तापेक्षितपदार्थोपसंहारेण सगुणनिर्गुणब्रह्म
वाक्यानामर्थो वधार्यते सगुणवाक्यार्थचिंता उद्दिष्टानां सत्वप्रद्दिष्टानां निर्गुण त
विद्योपयोगात् । पदार्थोपसंहारेण वाक्यार्थावधारणार्थं च सगुणविद्यानामभेदचिंता ।
तत्र यद्यपादत्वेन निर्गुणविद्याभेदादैक्यं सिद्धमिति तन्न विचार्यते । गुणोपसंहारस्त्वाधेदा
द्युक्त्या [redacted] द्यधिकरणैर्न ह्यखंडवाक्यार्थसिध्यर्थं वाक्यार्थोपसंहारेरूपोवर्णावि
धतेन देन सर्वमभिसंधायाह सूत्रेणेति । अत्रापेक्षोपमाध्यं न तु विज्ञेयं ब्रह्म पूर्वापरादि
[redacted] भेदरहितमेकरसं सैंधवघनवदवधारितमित्यादि तदनुपपत्तामिव सगुणब्रह्मणो ना
नारसत्वेन तद्विज्ञानभेदचिंतायाः संभवात् अतं आह । निरुपाधीति पूर्वापरादिभेदरहि
तमेकरसमिति च विशेषणद्वयस्यौपनत्क सर्पं माहास्तावयवस्पृहीस्मादिना । अवयवि ताम
ति ह्यवयवाः पूर्वापरभावेन वर्तते । अनन्तरनिषेधोऽप्यसावयवत्वनिषेधः एकरसमिन्य १

नेकधर्मवत्त्वनिषेधपरइत्यर्थः। स्वभावो धर्मः। भाष्यगतग्रन्थद्वाष्ट्वायेमार्दकठिनमिति श्छि
द्रत्वान्तरसांतरराहित्यमित्यर्थः। अवयवभेदं धर्मभेदं च निरस्यापेक्षिकभेदमाशंक्यान
न्निषेधपरकरूपत्वविशेषणेनक्रियतइत्याह तन्त्वेकपीत्यादिना। भाष्यपरकत्वादित्य
नेनप्राङ्गिष्विष्टावयवधर्मभेदनिषेधानुवादः। नन्वनेकरूपाशिष्टानानीत्यत्ररूपग्र
हणंव्यर्थं। अनेकानिपिवोचनामत आह एकस्मिन्गोचरइति। ननुज्ञानस्यायुगास्य
कथमनेकरूपत्वप्राप्तिरत आह रूपमाकारइति। नामरूपधर्म्मविशेषप्रपुननक्तिभिं प
दाशाद्धिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छारवान्तरेकर्मभेदः स्यादिति शास्त्रा
न्तराधिकरणसूत्रं पठन्सूत्रं। तत्रातिदेति उदितहोमानुदितहोमानिं द्योच्यते। प्रातःप्रातः
रनृतंते वदंतिपुरोदयाज्जुह्वतियेऽग्निहोत्रं। दिवाकीर्त्यमदिवाकीर्त्यंतः। सूर्योज्योति
र्जनदाज्योतिरेषामित्यनुदितहोमनिंदा। यथातिथये [redacted] प्रद्रुतायान्नंहरेयुस्तादृक्
तद्यदुदितेजुह्वतीत्युदितहोमनिंदा। प्रद्रुतायातिथयेऽन्नायेत्यर्थः। ततश्चएकस्यविरुद्धकाल

नेत्य॰ ह्यसंभवात्कर्मभेदः। आग्नेयश्चित्तमुदितानुदितहोमयतिक्रमेतत्त्र निंदा आग्नेयश्चि
२ त्रैवेदांतगतविद्यास्तनस्तइतिनोक्तियेनाइतरेयेनामादयोभेदेहेतवस्तदुपन्यासा
र्थेनाम्नस्तावदितादिनाख्यातं तद्याचष्टे अन्यस्यार्थेषु ज्योतिरित्यादिनानन्यजेतेतिप्रक
तज्योतिष्टोमानुवादोनुपपन्नः नाम्नैव द्विविधेक्ष्वेदत आह ज्योतिरितीति। ज्योतिरि
तिहि अग्निप्रदिक्रमात्रं नत्वस्यनामत्वमभिप्रेतं। एतेनैतदनुलक्ष्यते तदाख्यात
वाच्यकर्मसामानाधिकरण्यमुक्तं नामत्वाभिव्यक्तिः। तथाचाख्यातपारतंत्र्याद्याख्या
९ तं कर्मविदधीत तहिनाम्नापितं देयत्वनुवदेत् तहिनामापितदनुवदिष्यतीत्य
प्रयोजकमिहनामभेदाभेदयोः। ततश्चाख्यातार्थ एव चित्यइत्यर्थः। उक्तं हि प्रापे
ताख्यातसंबंधिनामैकपारतंत्र्यमात्मा। तस्यैव प्रथमं तेन भेदाभेदनिमित्ततेति। राम
ज्योतिरितिकर्मसामानाधिकरण्येन कर्मनामप्रवरव्याख्यानादित्यादिहेतून्नासहत्व २

दक्षिणाग्रहणविधानार्थोयमनुवादइतिवक्ष्यमाणप्रतिज्ञायाःसंबंधः। अथवा वृत्स्यं चेति
।आमंत्रयंहि सर्वं वृत्तापेक्षणस्य विधिपक्षे चाश्रयदानार्थमस्ति ज्योतिष्टोमापेक्षा
नकर्मान्तरत्वे। नहि क्रतुः क्रत्वंतरमपेक्षतइत्यर्थः। ननुद्वादशशतंदक्षिणेतिज्योतिष्टो
मेद्वादशशतंगावोदक्षिणा। नहितुद्वसहस्रंदक्षिणाग्निचिन। मित्यतआहद्वादशशतेति
उत्पत्तिः कर्मस्वरूपज्ञापकं। तन्मध्ये विहितमुत्पत्तिशिष्टं। कर्मस्वरूपज्ञापनोत्तरकाल
विहितमुत्पन्नशिष्टं। नत्रद्वादशशतंदक्षिणायमुत्पत्तौ श्रूयते तत्रहिविस्त्तवत्वाद्रसहस्रंद
क्षिणांवाधेत। तस्मेवमस्तुमयोरपिकर्मज्ञापनोत्तरकालंश्रुतत्वादित्यर्थः। अन्यायश्चा
नेकार्थत्वमितिन्यायादितिदृष्टान्तोक्तिरियं। यथानेकार्थत्वमेकस्यशब्दस्यान्यायः एवमेकस्या
र्थस्यान्याय्यमनेकशब्दत्वमित्यपिन्यायस्ततोज्योतिष्टोमज्योतिःशब्दयोरेकस्यकर्मणो
वाचकावित्यर्थः। ननुवैसन्नवाधेज्योति ज्योतिष्टोमशब्दयोरेकार्थत्वादनेकशब्दत्व
मपिक्वचिदाश्रितमाह उत्सर्गतइति। असंबद्धार्थपदत्ववादादितिपूर्वेणासंबद्धार्थ

मत। ज्योतिष्टोमवाक्ये व२

श्रो २

कल्प ३ वत्ता ज्योतिः पदेन स्व धानादि त्यर्थः । यत्तु वसंतादिवाक्ये ज्योतिः शब्दः एकदेशांतरल
क्षणार्थो ऽपूर्व एव संपी जितत्र्याह नचैकदेशेति । वसंतादिवाक्येहि ज्योतिषा यजेतेत्यनूद्या
ततत्रासंज्ञाश्चारव्यातं च कालादि विधिसंक्रांतमिति पूर्वकर्मानुवदेद्देषा तु प्रथमांत
त्वादत्तं चेति सकल नकमात्तु द्धि विधित्सीत्यर्थः यत्तु ज्योतिरिति प्रातिपदिक तत्त्वार्थ
तेनेति परामृश्य यजेतेति विधानात तामधेयं ज्योतिः शब्द इति । न तर्तमिति ज्रूमः
तस्यैव ताम्रः कर्मांतरवाचकत्वादित्याह । भेदेपिचेति । अपि चेति समुच्चये यथा
म नामधेयत्वमेवं भेदोपिश्रयमुक्तिरित्यर्थः । ननु कठेन प्रणीतत्वात् ध्यापितत्वा
[redacted] द्धा काठकमुच्यते । न विधा प्रणीयते तस्या अशब्दत्वादत आह प्रणायनं चे
ति प्रणायनं शिष्येभ्योनयत्नमुपदेशः संज्ञाने प्यविशिष्ट इत्यर्थः । ज्योतिसंज्ञाया राम
सकाशात् काठकादिसंज्ञाया भेदकत्वातिशयमाह । तथा चेति । ज्योतिष्टोमस्य संनिधौ
श्रुतत्वाद् तदनुवादकत्वेनतत्नामेकदेशत्वे न च संभाव्यमानमपि ज्योतिरिति नामधेया ३

कर्मभेदकं तदाशास्त्रांतरस्यात्वेन द्रव्यं संप्रर्गं चकारः कादिशामान्नितरांज्ञानमे
दकमित्यर्थः।अनंतरप्रतीकमन्यते निषेदः।तयारूपभेदो प्रीत्यादिभाष्यमुपात्तेन प्रत्यु
मावष्टे।इदमाम्नायत इत्यादिना।नन्विह सिद्धांतवादमात्रं सामिद्धेति प्रतीयते नवि
धिः।नत्र कथं कर्मभेदाभेदचिंतावकाशस्तत्राह तद्वद्देवतेति।वाजिनं गुणो विधीयत
इति।यद्यप्यत्र वाजिनं देवताश्च गुणो विधीयत इति वक्तुं शक्यं तथापि प्राप्ते कर्मणि गुणे
कगुणाविध्यसंभवादुभयमात्रविधित्वलः।वाजिपदेन त्रविश्वेदेवाभि धीयते इति
वक्ष्यति सिद्धांते तु विशिष्टविधित्वादप्राप्तं कर्मांतरं गुणविशिष्टं विधानं शाकाभि
निमत्वाद्वदेवतांतरविशिष्टम्पूर्वं कर्म विधीयत इत्युक्तं।विशिष्टविधौ कर्मविधान
स्यावश्यकत्वात्तद्वद्देवता चेति गौरवमित्याह विधिगौरवेति।यदाभिक्षायागाद्वाजि
नयागः कर्मांतरं विधीयते तदान्तरावश्यकत्वात्तन्त्रमपूर्वं च कल्पनीयमित्याह।कर्मां
तरापूर्वांतरेति।ननु वैश्वदेव्यामिक्षेत्यत्र यागविधिवत्तीति समर्थवाभिक्षायागाद्विता

नकारामलभ्य

कल्प० प्रतीयते वाजिनं तु वाक्यांतरेणाऽन्तउत्पत्तिशिष्टामिक्षावत् देवकर्मणि वाजिनं दुर्बलमप्रा
४ तं कर्मांतरं गमयतीत्याशंक्याह न चोत्पत्तिशिष्टेति विशिमिति न युक्तमत आह तुभयो
रपितिश्चयमभिप्रायः। अत्र ह्यामिक्षायां वाजिने वा न साध्यत्वं विशिष्टं पश्यामहे। सा
यवत्तान्तु कल्पयेमहि तत्र वैश्वदेविवाक्य आमिक्षाविश्वेदेवसंबंधः प्रतीयते वा
जिनवाक्येन तु वाजिनानेषामेव विश्वेषां देवानां वाजिनस्य च संबंधः तत्रैव तेक्याद्
बहुयस्य सहाप्यागवत्सनया इत्याह यस्तु तैकपाग विधिरनुमीयते तच्च कुतः उत्पत्तिशि
ष्टत्वमामिक्षायाः कुतो वाजिनस्योत्पन्नस्य इष्टत्वमिति। नत्वामिक्षावत्तद्द्यागस्य प्रयत्नं
प्रत्यक्षविधिअभावेपि विश्वेषां देवानां श्रोत आमिक्षासंबंधस्तेषां पुनर्वाजिपदशाभि
धेयानां वाजिभ्यो वाजिनमिति विधीयते अत आह नवैश्वदेवीत्यत्रेति वैश्वदेव्यामि राम
हेतिपदद्वयात्मकवाक्याद्वैश्वविश्वेषां देवानामामिक्षासंबंधः। एवं वाजिनसंबंधो ४
वाकीयो वाजिनसंबंधः न च श्रौतसंबंधाद्दुर्बल इति न विश्वे देवा वाजिने न संबध्यंते तत्र कर्मांतरं वाजिभ्यो वाजिनमिति २

अस्या इति तद्धितार्थः ॥ ३

॰पितेषां वाजिभ्यो वाजिनमिति पदद्वयात्मकवाक्यगम्यइति तत्त्वात्तेत्यर्थः । ननु वैश्वदेवी
ति तद्धितांतपदश्रुतिमात्रादामिक्षासंबंधो विश्वेषां देवानां अवगम्यत इत्याशंक्याह यथा
सत्यामिक्षापदवैयर्थ्यं स्यादित्याह । नोखल्विति । ननु विश्वेदेवा अस्या इति शब्देन च
सन्निहितामिक्षैवोच्यते । अत औत्सर्गिकामिक्षासंबंधसत्त्वात्... वेति । तत्संबंधिनो
विश्वेदेवानुपलक्षयतीति । उपलक्षिते सुवामिक्षा... संबंधे तु विश्वेदेवैः श्रूयन्ते लि
ख्याति । तत्तत्स्वामिक्षासंबंधोपजीवनेनैतत्परिनिष्ठेयेव स्यादिति । ननु वाजिभ्य इत्येत
त्पदयातपदमामिक्षासंबंधिनो विश्वेदेवानुपलक्षयिष्यंतद्राह्मोति अधिकरणांत
रविरोधादित्याशंक्याह यद्यपीति । दध्नामेति स्थितं । विधित्वाद्रूपस्य तत्त्वभावः स्यादित्येतत् चोद
नादर्शपूर्णमासयोर्देवता यदाग्नेयापादानिति संज्ञिति । संनिवायोरमिधानानि लोके अग्नि
पावकइत्यादीनि तत्र संदेहः किं हविःप्रदानसमये येन केनचिदग्निवाचकपदेनाग्निरुद्देश्यः
उत विधिगतामिपदेनैवेति । तत्रार्थरूपत्वाद्देवतायास्येन केनचिद्वाचकेन निर्देशसंभवा

ऽ यइति विधिग्नतस्यैव मंत्रत्वे देवताप्रकाशकत्वे भा के

का०सू० इति यमद्दति श्रात्तिरन्तः । सत्यमर्थोत्तमकं देवतात्वं तत्तु न स्वर्गं वा श्रित्वादिसंभवतिमा
५ सेभ्यः स्वाहेत्यादौ मासादेर्देवतात्वप्रसंगात् इत्यत्र त्यज्यमानं तद्धविः प्रत्युद्देश्यत्वं । उद्देश्यत्व
हविः प्रतिप्राधान्येन निर्दिष्टास्तत्रा ग्ने ... तनिर्दिष्टा द्धविस्त्यागकालेपि स्यात् तद्धि
मावर्त्यग्निरुक्तेन हविःप्रत्यग्नेः प्राधान्येन निर्दिष्टाद्धविस्त्यागकालेपि तेनैव सन्निर्दिष्टरूपः ग्रा
ह्यं तत्रैरगातिद्वयोर्देवतात्वं न स्यात् तस्माद्विधिदृष्टाद्धस्यैव मंत्रत्वे देवताप्रकाशकत्वे मा वः स्या
त्तेन हि ... स्यात्तेनापि देवतामुद्दिश्य हविस्त्यागो दत्तेति ॥ ॥ तत्रश्रा
द्धमेदेपि देवते कथं तदधिकरणाविरोध इत्यर्थः । यदि चैवं मेदेपि देवते कांतर्हि सोर्थं च
तुर्थं तिर्वपेत् ब्रह्मवर्चसकामः यः पापयक्ष्मागृहीतः स्यात् तस्मात् श्रादित्यंचरुं निर्व
पेदिति च सोर्यादित्यवर्चोरिवस्यत्वं स्यादित्यर्थः । नचैतयोरेकदेवतात्वमेष्टुं शक्यं सूर्या
य जुष्टं निर्वपामि श्रादित्याय जुष्टं निर्वपामीति च सर्वसंमतानुष्ठानविरोधादिति । श्रा राम
ग्रंथपरिहरन्ति तथापि त्यादिनान्तस्यात्वीत्यर्थे हीति प्रत्ययः स्मर्यते श्रस्येति च स ५

केदे

देवेभ्यिन्यादितां॥ अत्र तत्र वर्तते हेतुः एव संनिहितविशेषस्य सर्वनामार्थत्वादिति॥ अपपदं तं वेश्वदे १०

[illegible] चैतामते तन विश्वेदेवपदसहितानां परामर्शानुक्त्वा तान्यत्व [illegible] प्र
युक्तं देवतान्यत्वमित्यर्थः। आमिक्षासंबंधविश्वेदेवोपलक्षणे प्रयुक्तं बहुत्वं नीतमुक्तं तत्राम
तत्स्योति। वाक्येनैवामिक्षासंबंधोपजीवनेन वाजितविधानात् तद्वाजिनसंबंधस्य आमि
क्षयापाधितुं शक्यत्वेऽपि तात्संबंधो [illegible] द्वाक्यीयः संबंधो दुर्वल इति न्यायाद व
गतं यस्य संबंधस्य योग च तेन तद्वाधितव्यमिति तदिदं [illegible] नेत्येवं चयत्संदेहपदं दर्शितावसर ति
उक्तं पूर्वस्मिन्नेव कर्मणि वाजिनं गुणो विधीयत इति तदापामक्षतिमानमादायाक्षिप्त
नमिति। विश्वेषां देवानां आमिक्षासंबंधस्योपात्तत्वात् वाजिनसंबंधस्य च वाक्यीयत्वा
त् श्रुति बलीयस्त्वमादाय सिद्धांतयति स्यादेतदेवमित्यादिना। ननु तद्धितआमिक्षाविशि दि८
ष्टान् विश्वेदेवानभिधत्ते इत्यपवातेषामामिक्षासंबंधमभिवदन्तु यद्धा विश्वेषां देवानां यत्सं
तु बंधिमात्रेण तद्धावत्त्वं तया चतुर्थ्योस्यामिक्षावाचकत्वमत आह तन विश्वेदेवीयदादा
मिक्षा प्रतितावामिक्षायदेवयथ्यमिति तदनुभाष्यते नत्वेवं संततीति। उत्तरमाह। तद्धितो

आमिक्षायाः ॥ द्रव्यरूपेण प्रकृतेऽकर्मविधीयत इति यद्वादि आवादित्यामिक्षीयः सह तत्र इति

कल्प० नस्येति। तत्रैव ध्रुवदेवीयदस्य कस्मिन्नप्यर्थे पर्यवसिते आमिक्षापदेन चापारस्मित्तामिहि
६६ तेन योर्वैशिष्ट्यं पदद्वयसमभिव्याहारादवगम्यते किंतु नामसंनिहितावत्त्वं विना सर्व
नाम्नोर्थः कुड्यस्य ज्ञायमानत्त्रामिक्षापदेन समर्प्यते तत्र यथा घटद्वये इत्यत्र कोयमिति प
दस्य संनिहितावत्त्वं विशेषो विषयसंनिधापकप्रत्ययक्षापेक्षायामपि न क्षतिरत्र हानि
रित्येवं नद्धितस्यापीत्यर्थः। एतदेव स्फुटीकरोति अवसितामिधानं हीति अवसिताभिधा
नत्वं नामपरिपूर्णविषयत्वाम्। इदं हि सर्वचापाद्यमभिमतविधानोनमिमतप्रसर
श्चेति तत्रानभिमतप्रसरं वारयति कुतश्चामिक्षायदन्तपेक्षत्वइति अभिमतविधानोपि
नास्तीत्याह कुतो वेति। नन्वेवमामिक्षायदसापेक्षत्वेवैश्वदेवीपद्यामिक्षासंबंधो वि दा
प्तेवयां देवानां सामप्यतेन तर्हि हुं अपि यदे मिलितयोः प्रमाणांतरस्याद्गतयाचवाकत्वं अयस राम
मप्यामिक्षायदपेक्षायां वैश्वदेवीपदमेव न तत्र प्रमाणांतरमामिक्षापदमेव किंतस्यार ६६
थ्वर्वेवा नस्येति। यदि तिद्वितीयांतः ज्ञाइ यदमिति च प्रथमांतः आमिक्षेत्युक्ते हिन

रमा।

काद्यपेक्षावभासते वैश्वदेवी स्तुत्ते त्वपत्तिकासाविल्पयेक्षातो वैश्वदेवीपदमेवसाकां
क्षमर्थमभिदध्यरूपप्रमाणमाभिक्षापदं नुनदापार्थाभिधानेकथं भावाकांक्षापरिपूरक
मितिकर्त्तव्यभावमनुभवतीति वित्तिगमकहेतुवलात् वैश्वदेवीपदमेवप्रमाणमातन
स्मृत्यात्मत्वांवाक्यापेक्षयातत्र प्रथमभावितत्तः पदांतरापेक्षांवैश्वदेवीपदंयदाभिदा
विश्वेदेवसंबंधरूपंवस्त्वभिधत्ते तदुक्तप्रकारेणप्रमाणमन्तन्त प्रथमभाविवैश्वदेवी
पदावगम्यत्वाच्छ्रौतंतनतस्य बलवत्त्वमितीत्यर्थः। एतत्प्रकारवैपरीत्यंवाजिनविश्वेदेव
संबंधेदर्शयंस्तस्यवाक्यंपिमानाहयत्विति वाजिभ्यइतिवाजिनमिति चपदेपर्यवसि
तानाभिधानेयद्यपिवाजिपदेविश्वेदेवसापेक्षं तथापिनवाजिनपदापेक्षंततस्वपर्यवसि
ताभिधानात्स्वाद्यदामूपपार्वहितौ पदार्थौ वाजिवाजिनरूपौ तदवगम्यं यद्वैश्वदेव
वाजिनसंबंधरूपं बलं तदाभिदाविश्वदेवसंबंधात्प्रथमभाविश्रौतो वाक्यगम्यत्वेत
दुर्वलमित्यर्थः। क्रमांतरविधोहे तंमरमाह एवंचेति पूर्वपक्षे हि विकल्पः सम्यक्स्यो

कल्प० वा वक्तव्यः स चायुक्तः नित्यवदवगतसाधनभावाया आमिक्षाया विवक्षयायोगात् अतएव ह्यव
७ गतसाधनाभावायाम् तस्याः सम्प्रदायायोगादित्यर्थः। नित्यमेवेति वक्तुमेव रूढ्या वृत्तिप्रयो
गः। यत्तु लोकवचनेनैव सिद्धेः ति वक्तीयत्वस्याय वाध इति तन्न आह तन्त्वाद्वक्तव्येति। विश्वेदेवा इ
त्ययं शाब्दो यस्याः सा तथोक्ता तां वैश्वदेवशब्दाद्धि इदमेव चतादामिक्षायां प्रत्ययस्य उपसर्जनत्वा
प वगतामेवं सति कर्मान्तरविधिपक्षे तौल्लक्षणायिमा इति। उपसर्जनत्वाद्रोहितो पसर्जनस्याय बोध
नी स्यादित्यर्थः। ननूपसर्जनत्वाश्रयं पि विश्वे देवा वाजिन इति तद्धितार्थसत्त्वे
नानापरामर्शं तं तस्य हेतान्मः स तिष्ठति गौरवस्याद्दृश्य आह पक्षान्तं हीति
यत्तु कर्मान्तरविधिपक्षे विधिगौरवं चाश्रुतं कल्पनागौरवं चेति तत्राह प्रामाणिके चेति तत्त्व
विषयत्वात् एवं गुरुणालक्षणमेव देवस्य बलिष्ठित्वं मुदाहरणं तम् उक्त्वा चान्यपक्षे गुरुणा तद्भाने राम
दं दाष्टांतिकस्याहेवनिहा पौति आत्ति चाचेति मात्र्यस्य पांशनेन विताग्निरो वृतस्यासत्वं तोके मौ ७
ध्याहरति अन्ये यामिनि तिरि रसंगार पात्रधारणं पुरोवृत्तं आसाहिम रस्य स्पन्द्राद्यान्तरा

२ पत्रार्थविषयत्वात् १८।२

धिकरणेन प्रत्युदाहरणत्वदृष्टांतसंगतिमाह धात्वर्थानुवंधीति॥ ॥उक्तदृष्टांतरे कर्म
भेदः कृतानुवंधत्वात्। यजति ददाति जुहोतीत्यत्र क्रियत्वसाम्यादपूर्वैकां भावनां विशि
ष्टं तु प्रतिधात्वर्थं भावनाभेद इति संदेहे भावनायाः प्रत्ययार्थस्य प्रधानत्वात्तस्मि
न् एकस्मिन्सति धात्वर्थानां समुच्चयः इत्येकभावनाविशेषकत्वे [illegible] सानेनान्वयः। नियमेन
धातुप्रत्यययोरव्यवहिताभिधायित्वात् प्रत्ययस्य च धातोरिति निरवशेषविवक्षितैकवचने
नैकस्मादेव धातोरभिधानादेकधात्वर्थानुरक्ता भावनाभिहितास्मात् धात्वर्थान्तरेण
संबध्यते न तत्संबंधस्योत्पत्तिशिष्टत्वात् यत्र यदनन्तरोपात्तं प्रधानं तत्र भवति गुणा
नां समुच्चयः। अयं इवात्र तरणादीनां तस्मादत्र [illegible] धात्वात्मक उक्तदृष्टांतरे कर्मभेदो
भावनाभेदः कृतानुवंधत्वात्तुल्यस्यैव कृतेन धात्वर्थसंवंधत्वाद्भावनाया इत्यर्थः। धात्व
र्थस्यानुवंधो वच्छेदकः। ननु समिधो यजतीत्यादावेकभावनाविकत्वगिभिरपरत्व
त्वादइतिवत्सर्वतत्रैको विधिरिति न ज्ञायते तत्राह प्रथममाविताकोनेतिविपरि

धावेर

कल्प० वर्त्तमानाभद्रावितिङ्ङोषः। ननु प्रत्यभिज्ञायमाने त्यर्थः। विध्यन्तवादावितिगमनेनाभि
८ क्रांतमाह परस्परानपेक्षाणामिति। एषां बोधकत्वे क्रमो न प्रयोजक इत्यर्थः। ननु पाठ
क्रमानादरे लोकयंत्रयाजानां पाठादनुष्ठानक्रमसिद्धिस्तत्राह परस्परापेक्षाणामिति। प्र
याजादेर्वषट्कारलोपकारं कुर्वन्तीति परस्परापेक्षाः अतस्तेषामेककर्तृलोपकारज
म नकत्वयैकवाक्यत्वेसंप्रयकारित्वेति पाठक्रमेणानुष्ठाने प्रयोजकः स्यादित्यर्थः। तद्वा
क्यानि स्वार्थबोधने परस्परं नापेक्षन्ते तदुक्तिक्रमापेक्षायत एकस्य हर्षेण बोधकत्वं
ते पाठान्नियमोऽत्यर्थः। ननु ध्यात्वैक्यादितरेतरत्वप्रत्यभिज्ञानमुक्तमत आह कथंचिदि
ति। समिदादीनां नामभिः कर्मभेदप्रतीतेः तत्वमिडैव नास्तीति कथंचिदित्युक्तं व्याख्या
तस्याहि सर्वत्र विधित्व मुत्सर्गः स च सत्ववद्र्व्यवाक्येन बाध्यतीयः न चैहैतद्दृत्तीय राम
र्थः। किं तत्रवत्त्ववद्र्व्यवाद कं तदाह गुणाश्रवण इति। यत्र हि याको गुणः श्रूयते तत्र ८

भे८४

गुणविधिश्चैककर्मविधाने विशेषणानां विशेष्यं च विधातव्यं तदा विधिगौरवं स्यात् तत
त्र हि गुणमात्रविधानत्र युक्तलाघवाय विधिना विशेष्यकर्मणोऽनुवादोपेक्ष्यते
तदपेक्षायां बुद्धिसंनिधानस्योपकारकत्वमित्यर्थः। उदाहरति यथेति। ननु समिदादिवा
क्यानामभ्यासात्कर्मभेदे उदाहरणं। समिदादिगुणान्तरप्रतीतेरत आह नचाचेति। समि
धो यज आज्यस्य व्यंतिवित्यादिमंत्रैरेव समिदादिदेवतासंबंधसिद्धेस्तत्रत्याऽन्यत्रा
प्तेः समिदादिरिति नामधेयानीत्यर्थः। अंगीकृत्य गुणवचनत्वमाह अगुणत्वमायो
ति। केन वचनेन विहितमिति किंवचनविहितं। किंच वचनविहितं कर्मत्वं र्मे चेति किं ग
वचनविहितं किं कर्म। तदनुवादेन कस्य वाक्यस्य गुणविधित्वमिति तन्निगम्यत वि
इत्यर्थः। न चाग्नेयादिकर्मसु गुणविधिः। तेषामुत्पत्तिशिष्टस्याग्र्यबंधादि। तियदि ना
मधेयानि समिदादीनि तर्हि तान्यन्य एव भेदो नाभ्यासादत आह न चापूर्वमिति। पूर्वकर्म
न त्वपीत्यर्थः। अनन्यपित्वे हेतुर्विधानासंबंधमिति। ननु ज्योतिरादेरपि विधिनास

भे२

मे   नाहए८

कल्प० वंधोऽसिद्धेः एतेनेतरानुष्ठानप्रयोजनेनेति विधिसंबंधावगमादन्न आह प्रथममिति
९ ज्योतिरित्यादिना महिप्रथमं विधीयते तासं बद्धेवगते पश्चात्तत्तस्य विधिसंबंधः स
च विधास्य मानकर्मतामघेयत्वेनाप्यविरुद्धः समिदादिनु प्रथममेव विधिस
वद्धमिति तत्पूर्वककर्मवुद्धिविच्छेदकमित्यर्थः। तत्स्यैदेवतेति। तस्य पुनर्यस्य हृतेत्या
गस्यासेचनाधिकस्य प्रक्षेपाधिकस्य होमस्यावच्छेदाय। पुनश्च प्रयत्न एकस्या
ग्नारव्यायां चोद्यते सर एस्यारवांतरे चोद्यते यथेत्यर्थः। दार्ष्टांतिकं वमिति। ग्नारवां
तराधिकरणेतास्याः प्रकरणस्यापीनत्वं सूत्रभाष्याभ्यामुक्तमुपपादयति युक्त
मिति। ग्नारवांतराधिकरणे एकस्या ग्नारव्यायां अग्नीषोमीयादैव्यवादशकपालत्व
म परस्यां द्वादशकपालत्वमिति। रूपभेदात्कर्मभेदः शंकितः सिद्धांतेन संख्याया वि राम
कल्पकृत्युक्तो। कपालसंख्यायोत्पन्नत्रिरुक्तरूपेणावगम्यमानकर्म ९
वत्यभिज्ञायाः अवाधकत्वेन कर्मभेदकत्वाभावात्। अग्निगतपंचसंख्यायास्तु

यो

उत्पत्तिशिष्टत्वाद्वाजिनवद्भेदकत्वमिति निरूढाकोत्सो नादगतार्थत्वमित्यर्थः। अग्नि
होत्रस्येत्यर्थः सुदुःपाठो ऽग्निहोत्रे च कपालाभावात्। अथवाग्नीहोत्रं होम इत्यग्नीषो
मीयस्यैवोच्यते एकादशकपालत्वादेरुत्पत्तिशिष्टत्वमिति वदता वा वस्तुतिना कस्यां
चिच्छाखायामग्नीषोमीयो भवतीति केवलोत्पत्तिवाक्यं दृष्टमिति गम्यते इतरथा
ग्नीषोमीयमेकादशकपालमित्यादौ संख्यायोरप्युत्पत्तिशिष्टत्वादिति। उत्पत्तिशि
ष्टा पंचसंख्यैव न यद्दसंख्या षष्ठस्याग्नेरदृष्टमानत्वादिति परिहरति पंचैवेति। सांप
दिका उपास्या संपद्यतिरेकाय। उपात्तिव्यतिरेकाद्य। अग्निरेवाग्निरित्यादिनाग्नुख्याग्नि
समिदादेरनुवादादुपास्यत्वव्यावृत्तिर्वा ध्यतइत्यर्थः। एवं षष्ठाग्नेरनुवादत्वमंगीकृ
त्य परिहारउक्तइदानीं षडप्यग्नयः ख्यातृवाद्गुर्येष्युपास्याः पंचसंख्यात्वमुख्यानन्यीषो
मिद्दीनवछित्तुमित्यभिप्रेत्याह अथवा षोडशानामपीति। षोडशेति दृष्टाग्नाख्यानां ध्ये म
धीयन्ते तिष्ठादौष्याः। इदानीं पंचसंख्योपास्याग्निविशेषणत्वेन न विधीयते किंत्व

हा२६

कल्प॰ यते। अन्यत्तुपंचशाखाद्वयेप्रविशेषेणोपास्यतयाविधीयंते अधिकस्तुशषेणापि
10 विकल्प्यतइतिपरिहरति अथवाभवत्त्ववाजसनेपिनामित्यादिना। अत्र च यच्छोपि
।स्कैवस्त्रोमित्रुविहितेषुतेषांप्रचंनार्थात्त्वज्ञानेत्यर्थः।सांपादिकानितिसमारो
पाग्निभावानित्यर्थः। तस्यानिह्निह्रइतिस्वाराणानताधिकसंख्यादेरितिशेषः असि
न्नइतिछेदः। दर्शयतिचेतिस्वंपूरयतिविधेकत्वमितिनतुसर्वेवेदायत्पदमान
नेतीतिवाक्यंवेद्यैक्यद्वारेणाविद्यैक्यदर्शकंतिर्गुणात्रस्तविद्ययंकथमतेनसगुणा
विद्यैक्यसिद्धिरतआहयत्रापीति तत्प्रायपठितानामितितिगुणाविद्यासंनिधिपठिता
नामित्यर्थः अग्नः ध्येक्षः। ननुविद्यानामशांडिल्यानकाचात्कठादि [illegible] प्रोक्त
त्वाभावेकठाद्यनुष्ठितत्वात्काठकादिसंज्ञाकितस्यादतआहतचकठादीति। अध्य राम
यनंहिप्रतिशाखंस्वरादिभिर्भिद्यतेनत्वनुष्ठानमित्यर्थः ननुकिंकठप्रोक्तत्वादिति 10
मितानुसरणेनविद्यायांग्रंथेचकाठकादिशब्दाहृत्त्वंनतुनवाहतचकठप्रोक्तेति

तद्देश

ना८

नित्ये ऽवयवार्थयोगसंभवे ग्रंथे रूढिर्न कल्पनीया। ग्रंथसंबंधाद्विद्यायां च व्यक्तिसं
भवे तत्रापि रूढिर्नाकल्पनीयेत्यर्थः। अंगीकृत्यापि काठकादिसंज्ञानां विद्याभिधा
यकत्वमप्रयोजकत्वमाह तत्र वेदादिति। यदि काठकादिसंज्ञानां भेदाद्विद्याभिधेनत्त
र्हि एकशाखागतस्यैव ज्योतिष्टोमादिविद्यानामैक्यं प्रसज्येत। तच्च माभूदयुक्तं हि तत्र
नानाशाखादिभेदादित्यत्र तन्निषेधादित्यर्थः। नित्यानित्यसंयोगविरोधाच्च संज्ञानां न
विद्याभेदकत्वमित्याह कठादिपुत्रयेति। यश्चैतत्तच्छाखास्थोंकाररसावीत्याद्यो ब्रह्मवि
द्यासमाप्तिव्यपदेशो येचरणां सोऽपि तद्देशसमाप्त्यभिप्रायस्ततो न भेदः। शाखांतरे विद्या
याभेदक इत्याह समाप्तिश्चेति। शाखान्तराधिकरणोऽस्य पौनरुक्त्यमाशंक्याह कंचिदिति
श्लोकेन। पंचाग्निविद्यायामग्निगतपंचत्वबहुत्वसंख्ययोरनुत्पत्तिद्वित्वं विरोधः।
स च प्रागेव परिहृत इति बहुप्रमाणान्वयो गुणोपसंहारात्तु पसंहारो॥ ॥रेतः प्रजनन
तेंद्रियं प्रजातिः प्रजननं गुणान्विदित्वा तदुपास्ते फलमाह प्रजायते हेति। यजमानः प्र

तं१

दिष्टंपरलोकायकर्मभिरादिष्टमितोग्रामादस्यये अ स्यार्थंहरन्तिनयंतस्तुविजःत्रि
रस्यंगारस्य र्णीयात्र आरस्तंत्रिरोभूतं। एतद्वेवात्मानंबहुभाषास्वेदितोमहत्स्वक्षे
११ शास्त्रविज्ञोयेमामांसन्ते।मह्यब्रूतेकुतुविज्ञोयेमहद्भयंभयहेतर्वज्ञन्तुघतेय
थावत्तेनस्यार्थः।एषोधिकृतःपुरुषस्तस्मिन्नात्मन्युतअपि।अरमल्पं।अन्तरं।भे
दं।अल्पमपिभेदंयदाकुरुतेअथतदातस्यभयंभवति।तत्त्वेवभयंशास्त्रेणविदुषोमन्वा
नवतोमन्वानस्यानर्हतोमननंमकुर्वतोभयंभयहेतुः॥ ॥उपसंहारस्त्रीसर्व
शारयास्तुविधेकोसिद्धेगुरुपास्त्यसुगुरणानामुपसंहारसिद्धेरघिवरणानारंभद्वत्ता
रोक्पात्भवन्तिति।करणाद्धिविद्यायांऽगमाकांक्षते।आकांक्षते।आकांक्षावस्तुनि
भिसमानानेरंगैःशाखांतरीयाणामपेक्षार्थः॥यद्यपेक्षास्यात्तथाप्यप
क्षेणेवेतिसाकांक्षस्यप्रयोगविधेरनुष्ठापकत्वात्समवाहन्तिराकांक्षत्वायसर्व रा॰
मंगजातमेकस्यामेवशारवायांविधीयतेत्यर्थः।ननुसर्वशारवांसुविधेकेरमति ११

नुष्ठानेऽस्यं उकरणोपकारासिद्धेरनुपपन्नताविधानस्य प्रकारी स्यात् तेषामाहत स्वापद्यानैमित्ति प्रमिति गननु १

प्रारब्धांतरं तदीयांगानां नित्यकर्मणि यावज्जीवमित्यादि नियतत्वेऽपि नित्यत्वशास्त्रकां
गानुष्ठानमात्रेण परिपूर्णोपकारः कल्प्यते तु पासनात्तु तत्स्वशास्त्राधीनैरेवांगैः
परिपूर्णोपकारकल्पनायां को हेतुरत आह अंगांतराविधानादेहेति। गृहमेधीये
ति। अस्ति चातुर्मास्ये गृहमेधीयो मनुष्य गृहमेधीयः सर्वासां दुग्धे सायमोद
नइति तत्र हि दर्शमासनं स्याज्यभागोपजातीति। तत्र संदेहः किमयमतिदेशप्राप्तयो
राज्यभागयोरनुवादउतांगांतरपरिसंख्या अथवाऽतिदेशो नाज्यभागावेव प्राप्ये
नन्वते ते ... इत्येतदनेन वचनेन प्राप्यते किं वा सर्वांगे प्राप्तउपकारः संज्ञा प
ज्यभागप्राप्तौ वांगांतरानपेक्षा स्यात् भवतीत्युपकारावच्छेद इति। अत्रैवापिपक्षः प्र
मेकांडेऽत्र मात्रे क्रान्तिरसार स्तोतु विस्तरभयान्नलिख्यते। तेन चानुवादमात्ररूपवैफल्या
त्परिसंख्यायाश्च प्रतिषेधविषयत्वात्। अंगांतरप्रतिषेधस्य च वाक्यादप्रतीतेः क
ल्पनया त्वाज्यभागवाक्यस्य स्वार्थत्यागप्रसंगात्। प्राप्तस्य चांगांतरस्य प्रधीमे

कल्प० शेषापकप्रमाणाबाधापातात्। तदेवं स्वार्थहानिरन्यार्थकल्पनं प्राप्तबाधश्चेति त्रिदो
१२ षीप्रसंगात्। अतिदेशस्यापि क्रत्वपेक्षितत्वाकृताखंडकरणोपकारकपदार्थस्यैव विहितो
पायपतोयुगपदेव सर्वांगविषयत्वेन प्रकृते तदुपभागमात्रविषयत्वकल्पनस्यायोगा
दुपकारावच्छेदेनैवेति दिक्। इत्यामेसिद्धांमितं॥ ॥ एतन्न्यायेनैतेष्टनोपकाराच्छेवदेप्रस्यते
कृतदृष्टपत्नत्याह। नहीति। गृहमेधीयेष्टित्याये वितो कर्मैव गृहमेधीयः आज्यभागादि
रिक्तमंगयागसंस्कारोपकारायनापेक्षते। आग्नेयांत प्रकृति त्वपेक्षते। अत्र पूर्वत्र एकमेव वि
ध्यानं सर्वांतरीयमंगमितरद्धातिविभिरनुष्ठीयमानं सन्नापेक्षते। सांगत्वानतिरि
क्तोष्ठीयमानं सदपेक्षते। एतच्चाविरुद्धमित्यर्थः। यद्वा नैः। यथानैमित्तिके कर्मण्यादि
तत्राह। नैमित्तिकेति। यावज्जीवनिमित्तानुरोधात्प्रधानकर्तव्यत्वेनित्यत्व राम
गतौ। सर्वांगोपसंहारस्य च सर्वदाशुसामसंपादयितुमशक्यत्वात्कर्ममात्रांगात्
शानादेव सकलांगसाध्योपकारसिद्धिरितिपुकारस्याव० इ. अत्राकांगोप्योवि १२

ऽवच्छिद्यमानोऽव्यवस्थापनं उच्यते। ननु तथेह प्रारब्धांतरीयांगोपसंहारस्याशक्यत्व
प्रसक्तेः प्रथमाधिकरणे निरस्तत्वान्न चोपास्तीनां नित्यत्वावगतिः काम्यत्वादि
त्यर्थः। एवमेकस्यैवाग्निविषये पेक्षानपेक्षयोर्विरोधात् गृह्यमेधीयस्याभ्यास
मपकृष्य तद्दानीं वैषम्यांतरे नाम्नाऽतिदेश समवमाह। पालतेति। चोदकोतिदेशः
तेन प्राकृत उपकारपिंडो गृहमेधीये प्राप्यते। तद्द्वारा च तज्जातं कालिसंवृत्त
प्राकृतांगानि तत्राज्यभागाववपितस्य च्छेद्याप्नुतइति प्राप्तयोः पुनर्वचनाः स
कलांगजन्योपकारस्य तन्मात्रजन्यत्वेनावच्छेदः स्यादिति तत्रावश्यकत्वे तान्या
नां वचनात् हि नानि तत्प्राप्तिरिति तद्विधायकमेवं वचनं तेन तरपरिसंख्यायकमित्यर्थः
अतेतत्संद्रहमेधीयपूर्वपक्षगतपरिसंख्यापक्षोपि युक्तस्तुः। तत्रात्रविधिपक्ष
स्यापि स्थले मेधीयपूर्वपक्षगतस्याप्रासंगमवमाह तवतदुपकारेणि तत्र तप्रा
कृतसंगापमस्तीति। आज्यभागानदितरांगसाध्य उपकारस्त्येमेति देशप्राप्ता तेषा

कल्प ज्यभागविधानाद्वितत्त्वातिदेशस्यतन्मात्रविधानपरत्वंकल्पितंनत्विहविधास्य
२३ सपरशाखागतधर्मसाध्योपकारपिंडस्याक्षिकस्वीकृतिदेशः।यस्यतत्राग्नेयधर्मस्य
स्वशाखायांविधानात्स्वशाखागतधर्ममात्रविधायकत्वंकल्प्येतस्यार्थःतत्वे
न न।एकत्वे।बलवतिवाधकइतिप्राप्तेपुनर्विधानमेवबलवत्ववाधकं॥ ॥
अन्यथात्वंस्यात्।चोदनाद्यविशेषादित्यस्यायवादार्थमिदमधिकरणं।माध्येवा
जसनेयिब्राह्मणंतावद्याचऐन्द्रवायव्यादिना।इयाहप्राजापत्यादेवाश्चासुराश्च
ततःकानीयसाएवदेवाज्यायसाअसुरास्तएषुलोकेष्वस्पर्धंततेहदेवाऊचुर्ह
तासुरान्यज्ञउद्गीथेनात्ययामेतितेहवाचमूचुस्त्वंनउद्गायेतितथेतितेभ्योवा
गुदगायत्तेविदुरनेनवैनउद्गात्रात्येष्यंतीतितमभिद्रुत्यपाप्मनाविध्यन्सय राम
हेमसाप्राणंसंदधारामूचुस्त्वंनउद्गायेतितथेतितेभ्यएवप्राणउदगायत्तेविदुरनेनवैना राम
द्युमिधायतममिद्रुत्यपाप्मनाविध्यन्सयथाश्मानमृत्वालोष्टोविध्वंसेतैवंहैववि २३
पार्वोमातमुख्यपब्रह्मणेऽभोद्गोगतउद्गीथाध्यापस्वविषयत्वेनोदाहृतःतत्रवाजसनेयिषु ने

ध्वंसमानाविश्वंचोविनेश्वरिति श्रुतिः। तत्र प्रजापतिः कर्मज्ञानाधिकृतः पुरुषः। तदंशा तो
ऽपि यदृच्छया प्राजापत्याः असुराणां ज्यायस्त्वं रक्षकत्वश्रुत्युक्तमुपपादयति। यतो मी
ऽति। कानीयांसो देवाः कनिष्ठत्वमुपपादयति। ज्ञानपूर्वकत्वादिति। अनादिप्रसू
तानं त्वज्ञाने चरमभावि। अतस्तज्जन्यरतिरूपाणां देवानां कनिष्ठत्वमित्यर्थः।
अस्पर्द्धन्तेत हाच इतेतदस्पत्वाद्दिताप्राणो स्पेत्येतन्नुक्तिगतप्रजापतिशरीरस्य व्या
ख्यानं। प्राणप्रधानस्य देहे त्रयस्येत्यर्थः। हन्तेत्यनुमतौ। यद्यनुमतिरस्ति सर्वे
षामस्माकमसुरजयेत हृत्सुरानत्ययामातीत्यासुरावेदेवुभावमयामसप्राप्नुवा
मेत्यर्थः। यज्ञो ज्योतिष्टोमः। सोऽसुराणां विध्वंसकत्वादाभिचारिकः। वाक्प्राणो
ऽपत्रप्राणेषु प्राणेन्द्रियाभिदित्यैवमि। तानेव वागादीनात्र्यथी लम्पते। प्राणमात्रस्य २
सिवारदकर्तृत्वायोगाद्देवतात्वस्य तद्रुत्याह प्राणमभिमानेनेति। एषद्गुतिमुख्यप्रा
स्यविज्ञो असुराणां प्राणत्वाद्वरत्यर्थः। अभिद्रुत्याभिसमस्य अविध्वंस्तासिति वेतः अविध्य

पे त्वा १

कल्प० सन्निति श्रुतिपदं तत्र सन्नत्वयमुद्गीथ इति मात्रमुदाहृतं। लोष्ठः पांसुपिंडः स
वा अन्यो वा दुर्वृत्तः काष्ठादिरिन्धनयोग्यो वा लोष्ठः श्रुतावविद्यमानोऽपि स्थापत्ते भ्यदुपस्य
१४ छा० । उद्गीथकर्तृत्वमज्ञानक्रियायां प्रत्यंचन्नारखामेदेतस्य यमारान न विद्याभेदके एकस्या
शाखायां विद्योक्तस्मृ अपि पत्नावेपितद्दर्शनादित्याह। नके चत्वत्वंत्र शाखांतर इति। एवं क
र्तृक्रियात्वनिर्देशावैषम्यं परिहृत्य सकर्तृमधिकृत्य निर्देशो वाजसनेयके मध्ये कदेशान्तरा कै
वनिर्देशः छांदोग्ये तु निवैषम्यं परिहरति। कतरत्रुपेति। रसतमादिगुणोपया
स्यानमोंकारस्योक्तमिति शेषः। एतच्च भाष्यवृत्तिकोपादानस्। एषां भूतानां पृथि
वी रसः पृथिव्या आपो रसः अपामोषधयो रसः ओषधीनां पुरुषो रसः पुरुषस्य वा
ग्रसो वाच ऋग्रसः ऋचः साम रसः पृथिव्या आपो रसो। साम्न उद्गीथो रसः स ए
व रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथ इति श्रुतिः। एतत्सूक्तिव्याख्याते राम
न भाष्योक्तरसतमादिगुणयोगं विवृणोति तथा होति। यस्य यजमानस्य पुरु १४

श्री

स्तात्स्वेच्छाविनिर्दिष्टदेवतायै संकल्पितं भवति। चेदमावास्यापश्चादभ्युदेस चतुर्द्धे
श्यामममावास्यान्यमवान्नसंध्यमादिमावेन त्रेधा भक्तो संकल्पान्यमादिभ्योदर्
शदेवताभ्यः सकाशाद्विह्नितं भवति। विमृज्य चदाच्च स्मात्पूर्वदेवताभ्यो निर्वापो दृष्टप्रयोः
दधन्दधनिम्रृतेतदुग्धे तेद्धेव कर्मस्थित्या त्वान्मेयादिष्ट्रस्पर्ध्यः कालापराह्ने। विकृ
ते यथाकालमनुष्ठानं दर्शयति र्षतावदिति। अनितः सन्निधावुदितः स्रेव
यस्य सयजमानो मुदितः। अत्रेत्य सिद्धांते दर्शकर्मरूपेव देवतापनयमात्रमि
स्मिन्प्रयोजनमाहमावास्यायामेवेति। तस्यैव कर्मणोऽनुवर्त्तमानत्वे द्वितय
त देवतापयकांत्य रिसमापनीयतत चतुर्द्धपानिरुत्तह विकाददेवतांतरेभ्यो स्त्र
ऊ मित्ति प्रयोगं पूरिसमाप्य पुनरमावास्यायामेवाग्न्यादिभ्यो दर्शदेवताभ्यो दविति
उप्पशानि परिदृष्टोः प्रवर्तयितव्यः। द्दर्शलोपे तु प्रायश्चित्तं भ॰ तमिदं कर्मामाव
स्यायाल्लोपरं तथामिति चिंताप्रयोजनमित्यर्थः। एवं पक्षमाहद्विविर्भागे त्वा

कल्प० दिता। उत्पत्तिशिष्टदेवतावत्तद्धेकर्मणि देवतान्तरमन्यवाक्याज्ञातं कर्मान्तरत्वमित्ये
१५ वमर्थं हविर्विभागमात्रेऽप्यवरणादिति संग्रहवाक्यं। [redacted] प्राप्ते कर्मान्तरप
ने कत्गुणविधौ वाक्यभेदप्रसंगात् कर्मान्तरत्वमित्येवमभिप्रायेण तत्रविधा
न सामर्थ्याद्भेदे तिद्वितीयं संग्रहवाक्यं तत्राद्यं विभजते पूर्वेहात्यादि ता पूर्वं देवता
यो गमादिभ्यो हविर्योगविरोधे तिवाक्येन विहिते उत्पत्तिशिष्टदेवतावरोधस्य
वाक्येनैव वारितत्वादुत्पत्तिवैकर्मणि देवतान्तरनिवेशासंभवे सति न कर्मान्तरत्वं
स्याद्धविर्मात्रविभागविधाने तू उत्पत्तिशिष्टदेवतावरोधाभावाज्जितेऽप्या
वन कर्मान्तरत्वमित्यर्थः। द्वितीयं संग्रहं विवृणोति आपि चेति तत्तु कर्मान्
रविधौ सारदर्शप्रयोगस्य काणात्। तत्राह दर्शस्थितिति कर्मान्तरमिति शक्ति
प्रायहेतुमाहत्यर्थदेवतान्तरं इति। उत्पत्तिशिष्टदेवतावरोधं परिहृत्य वाक्यमि राम
रि देयं हरति चर्येयस्येति वा मांतरप्राप्तमिति चेमध्यमाइत्यादिवाक्ये:प्रा २५

तो केषिमा गोऽवग तोऽनस्तयो ऽस्यत्तावैं दूरध्यमा वास्यायामैं दूपयो मा वास्या यामिंतौ दूरेवतात रुद्धयोर्नदेव ४

न्नामित्यर्थः। ननु विभज्ये दिति तेताद्धन्मात्र विधौ कस्मादिति न ज्ञायते तत्राह तत्र चत्वा
र्यातरेति येम ध्यमादिवा कौर्दैवतांतरे विहिते तु तत्प्रकृतियोगितो नादेवता
नामेव भुक्तिस्थानेतां विभागप्रति योगित्वं नास्मात इत्यर्थः। ननु तं तुल्यानामेव देव
तानां विभाग प्रवृत्ताद्धविषयस्तोनं देवंतांतरे वकाशा इति कमेभेदे तस्य तत्र स्या
दत आह तत्तुल्यानामिति हित्वे विवक्षितामिति। हविर्मात्रे विभागो विषयः तस्य तत्तुल्यत्वे
न विशेषणे न विशिष्टाद्देवताद्धा का भेदः स्यादित्यर्थः।। ।।हविस्तु भयत्र चादिति
।हतो प्रत्यमासयोरा न्नायते।। यस्योभयं हविरार्त्तिमार्छेदैंद्रं पंचशरा [illegible]
नि वृमोदनं वपेदिति। उभयं हविरिति यत्। तत्र क्रतन्नाद्दविर्द्वभयत्वमपि तिमित्तान्तर्मुत
मिति गायघ्य घटेरा द्रां नित आविवाहितत्वमुभयत्वं। नाहि विवक्षा यादि विशिष्टो देवतानास्ती
कामितिचेता। हविरार्त्तोति निर्व ये उभयोर्विनतौ चेति विद्यावतीति प्रसंगात्। ननु तोहिर्हवि
रप्यविव हितेस्याद्दविर्विशिष्ट भार्ते तु देश्य त्वेन वाक्यभेदस्तो दवस्थाहनं। आतिमात्र

आस्तिमात्रस्य सर्वदा सर्वैषां संभवे न निमित्तत्वापर्यवसानात् तत्पर्यवसानाद्बहिर
कात्य० षा महे हविषा विशेषाणां तु भयत्वं तु पर्यवसितं निमित्तं विशेषणं भवद्विधानात्को
१६ क्षितं वा स्यामिष्यादिति तत्त्वमयत्वायामः। तस्माद्धविर्विशिष्टितन्मयत्वमिति॥ ॥
ननु दर्शवत्कुर्वन्नेषामानीतास्मिन्कर्मणि देवतान्तरविधानं तत्रैव तत्त्वाद्विशेषत्वा
लक्षणेन च देवताविधिरित्यत आह द्वयम् रवेनेति। होतं सिद्धान्तप्रयोजनं निगम
यति। ततश्चेति। एवमुपपत्तिविशिष्टदेवतावरोधपरिहृत्य वाक्यमेदश्च संगं परि
हरति। न च दधिवत्तमित्यादिना अप्रकृतकर्मणि तंडुलादयः पाकान्तरोत्तर्प
णामर्थाः तत्सिद्धाः। दधिपयसी वस्तुतस्त एव सिद्धेः कथमेतावताधिकरणापवर्ग्य
योः प्राप्तिरत आह। नवात्मदयेति। दध्नस्तंडुलानां पयसस्तंडुलानां च साहित्ये
ऐम ध्यमादिवाक्यावगतादेव देवताकत्वात्सिद्धं। तदिदम् [illegible] तिथिरुक्तानापयो राम
पुक्तानां चेति। न त्वेवमपि दधिपयसोस्तंडुलानां च मिश्रणमेव भवति। कथमधि १६

करणार्थलाभस्तत्राहनवश्ननेति। अधिकगवां दोहविधानाद्दधिपयसोः उ
त्पत्तत्वं आतत्वात्तस्यां रात्रौ तु ब्रह्मचर्यपरत्वस समर्थे दधिपयसोः सिद्धं न
तु परोक्षज्ञानि व्रतोपाकोपनिवर्ततं तथा च कुर्यं च तु सिद्धं तत्त्वमाह इत्याह इति वक्त्रं सिव
गदृष्टसाधनं तिसाधनविद्यो धात्रिंतत्वाद्धुर्मांराम तुहले चापि पाकानुवर्तित धर्मारामामिवाबद्दा द्वीहि४
ताः क्षेत्राय वेष्ठितव्यः। अलंताधि कारेति। सा लुल्यस्पर्द्धापरगोमासवकर्मरागेदुद्धला
रेणाधिकारावगमात्तस्य वधावगमादगस्यागाकमभेदस्यन्यायत्वादित्यर्थः वत्ता
नपाकुर्णान्तगोदेत्राहद्वंशांतरं नयेत्। तुतरयादिति सर्वे दुग्धं पिवेयुरिति। मवस्तुप
रस्याश्वस्वरसारणादेः परोवराचतस्मादेववरीयानु वश्वातरुउरीयः कथमनेनते
त्याह परमात्मस्वरूपेति। परमात्मदृष्ट्याध्यासात्तद्रूपसंपत्तिः। तनुकासाः लोगा जि
रित्यतेनाकाशमिति हि रूपाकाशोध्येवं नोज्ञापानित्यामिनाकाशस्य वपरोवरीयस्त्वा
दिगुणयोगंदर्शयतितन्नकथं परमात्मदृष्ट्याध्यासउद्गीथेतत्राह परमात्मदृ

२ रितिश्रुतिः कोरणं स्वरतिहि वाचुस्वरस्य गतिरिति प्राणस्तुपञ्चमास्मलोकस्मिकागतिरिह

ओ वाद

कल्प० मिति। आकाशाल्लिंगादित्युक्तेन ग्रंथसंदर्भेणेत्यर्थः॥ ॥ननु च देवासुरसंया

९ मेहकिलदेवा उद्गीथमुद्गीथावयवमोंकारमाजह्रुराहृतवंतस्तस्यकेवलस्याहरणा

योगात्तदाश्रयं ज्योतिष्टोमाद्याहृतवंत इत्यर्थः। अनेनकर्मणाएनानसुरान्

भिभविष्याम इति। सउद्गाता। वाचाप्राणेन च। वागुपसर्जनप्राणो लोपहानेत्युक्ता

वात।। ।।व्याप्तेश्चवसमंजसम्।ओमित्येतदक्षरमुद्गीथमिति वाक्ये ओंकारस्योद्गीथे

न विशेषणमर्थसिद्धवत्कृत्य प्रक्रमभेदाद्द्विधा भेदो दर्शितः इदानीं सर्वथैक्यत्वेति

भाष्ये भेदबुद्धावनुवर्त्तमानायामन्यत्रान्यतरबुद्धिरध्यासलक्षणा स्यात्। तदेवुक्त

प्रवेक स्मृतिरूपइत्यत्राविवेकत्वस्यवशीकृतत्वादनग्राहमोटमीबुद्धिरध्यास इति। उक्ता

नीति। भाष्ये यथा शुक्तावन्यथाख्यातिनकारख्यातोपेक्षाणामित्यर्थः। उद्गीथोंकार

शब्दयोरैकार्थ्यपर्यायत्वासहप्रयोगादैकत्वपक्षानुपपन्नमाशंक्याहसैकार्थ्ये राम

पीति। भाष्ये छंदसि वेदे समत्वाद्व्याप्तेरिति ज्ञातोद्वेति। ओंकारस्य शब्दविशेषस्य केवलस्य सर्वे १७

इति। ध्यासरात्पर्य

प्रणवपर्यायः

नेदव्याप्तिरत आह ब्रह्मतु वाकमिति । यजुर्वेदे ऽध्ययनप्रवचनयोः । प्रत्येकमुप
क्रमे समाप्तौ चोंकार उच्चार्यते । ऋग्वेदे तु प्रत्यृचमेतदेव । सामवेदे पि ऋगन्तत्वा
त्साम्न इति सर्ववेदव्यापकं ॐकारः प्रतिवेदं च स्वरादिभेदात् भिद्यते । न हि द्वितीयत्र
मिप्रत्ययमुच्चशिक्षाविशेषणमित्याह । किं गतोपमिति विशेषणोच्च प्रयोजनमाह तत
द्रष्टादीति । आदिशब्देन समृद्धिरसतमत्वादि गृह्यते । आशिषः कामप्रापकत्वं । आधि
क्रियते प्रतिपाद्यते । ननु संभवे व्यभिचारे च विशेषणमर्थवत् । तत्र सर्ववेदव्यापि
त्वाद्विशेषात्स्योंकारस्य भवतु विशेषणेन व्यभिचारः । संभवस्तु विशेष्यान्तर्भावे ओंकारे
विशेषणाय स्योद्गीथत्वस्यानोपपद्यते । उद्गीथशब्दस्य सकलभक्तिवाचित्वात् ।
भक्तित्वस्य च मह्यावयवेंकारेनुपपत्तेरत आह । उद्गीथपदेनेति । स्यादेतदुद्गी
थशब्दस्य किमित्यवयवलक्षणया उद्गीथशब्दवाच्यां भक्तिमवयवित्वेनैव लक्षयतु न
तापि विशेषणयोः सामानाधिकरण्यसंभवादत आह तत्प्रणवेनोंकारेणेति । खल्वत

सामानाधिकरण्य

वाचूरस्या

कल्प० स्यैव व्याख्यानं भवति आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गी-
१२ थमुपास्ते इत्यादिना प्रथमाराधकस्यैवाप्त्यादिगुणविशिष्टस्य तादृक्फलविशि-
ष्टस्य चोपव्याख्यानस्य समानत्वात्। प्रधाने च लक्षणानुपपन्ने तत्रैव पदार्थ एव लक्ष-
क्षणीक इत्यर्थः। ॐकारेण भक्तिलक्षणायां वैयर्थ्यं च स्यात् उद्गीथपदेन भक्तेर्वि-
शेषस्यैव समर्थ्यत्वेन व्यभिचाराभावादित्यपि द्रष्टव्यं निरूढा चेयं लक्षणा न
सांप्रतिकीत्याह रूढेश्चेति। अध्यासेन लक्षणेति भक्त्यवयवे ॐकारे सकलभ-
क्तिदृष्टिलक्षणा हि सांप्रतिकी स्यादित्यर्थः। इयं च वक्ष्यमाणन्यायेन गौरोपच-
लक्षणोत्सृष्टेति। ननु किमिति फलकल्पना आप्त्यादिफलस्य श्रुतत्वादत आह। आ-
प्त्यादिगुणकेति। ॐकार उद्गीथ एवेस्तस्मिन्नाप्त्यादिगुणादृष्ट्यापासकस्य पुरुषस्य प्येदाव राम
मेर इत्यर्थः। सिद्धान्ते फलकल्पनां वारयति। उद्गीथमुपासीतेति। उद्गीथभक्तौ संबंधि १२

ॐकारे

फलसङ्कल्पमाला... कल्पतरुस्वर्पः (

नः प्रणवस्योपासनायामधिकारः प्रतिपादितं। तत्परेतु वाक्ये तत्फलकल्पना
दोषः। आप्त्यादिदृष्टिविधानार्थमोमित्येतदक्षरमिति वाक्येन विशिष्टप्रणवसम
र्पणोतद्वेयमुपासनविधिमाघाद्यास्त्यादिगुणविशिष्टप्रणवोपास्त्यापृथ
नाहैवैकान्तानं भवतीत्यादितत्फलस्यैव प्रणवस्त्रत्यर्थः। ॐकार उद्गीथदृष्टिविधौ
हिरण्यपुरुषोध्यात्मस्वरूपज्ञि: स्यात। उद्गीथदृष्टिविध्यसिद्धेः सिद्धान्तेत्वेवयविव
चनेनोद्गीथपदेनावयवलक्षणा ततः किंजातमत आह गौरुपावृत्तेरिति। वाच्य
मर्थं विहाय यद्दलक्ष्यते तेन तत्रात्र परत्वेन लक्षणा याइत्यमेव धातमुखकागौराप
लक्षणा ... यार्थद्वाराधीतरेवाद्यस्वरत्वेवोवधानमोहगौर्वाहीक इति। लक्षणा
यामपीति भाष्येस्वर्वपक्षेपि लक्षणा सुपगमोतयुक्तः। तन्नगौणीवृत्तिरिस्युक्त
त्वादतत्राह गौरुपपीति। लक्षणा गुणविद्यया वयवस्य केन्दो यस्याः सातत्थोक्ता गौणः
एवमध्यासपक्षे दृष्टिपक्षे कल्पपक्षे दृष्टिपक्षे यतपक्षे पापीति विवृद्धव्यादित्राद्देवस्तु
दृष्टिविषयत्वेनगुणः तत्रभोक्तीय दृष्टि दृष्टत्वादोंकार उद्गीथ इत्यर्थः। नपुनरस्मीपेनोंकारलक्षणा तथा सति ६

कल्प

च्या। २५

लस्यैकोपिवाचमेदात्तयर्यायत्वंनवक्तुर्वोमे दात्पर्यो यात्वमित्यर्थः। ननुपर्या
यत्वेपिकरिसिंधुराहि ज्ञाह्मनासहब्रयोग [redacted] उक्तत्वात्
नचव्याख्यानमिति॥ ॥सर्वामेदाद्यमग्रेमे॥ ॐकारस्यसर्वस्यज्ञात्वाद्वस्थ
मितिविद्येषरारादृस्यव्यावृत्तिवेदेवविहातिस्येवरा द्दात्संतिहितावत्तवनाद
संनिहितस्यविवेकद्वारातुमातात्पर्यानुवतोग सहत्यादेर्मातिरितिपूर्वपक्ष
माह। स्व ज्ञादृस्येति। ननुक्षौ शीतकिंवाक्य। वक्षि इत्यादिमत्राणांविषयास्रे
स्याद्विगराकप्रारोणपास्तिपरत्वात् वाजसनेयिवाक्यवदित्यतमातान्हसिद्ध
वादिकस्यपिसंनिहितमितिनेत्याह साक्षादिति। अत्राद्यस्यज्ञादेनानत्वयान्तु
नद्विगामानयेतिवाक्यार्थेभत्यन्तद्देशघटोन्वेतीति। फलविधिपरेस्वीद
ह्यातिति वाक्येन्यव्यावृत्तिपरत्वमेवंज्ञाद्दस्यनतु केवाक्य भेदप्रसंगादि। राम
तिकेरावोल मधुस्कंध्यावृत्तिपरेपिवाक्ये विद्धे कन्दारपातज्ञारवातरीयफलसे १९

रवेयफलउक्तं२

हः शाखे मि

वंधात्तु वारदारकुतोवाक्यभेः सत्यमशाखें नान्वेति । संतिष्ठिमात्रमभिदधत स्वे

वंशाद्वस्य शाखान्तरीयमपि वज्रिष्टत्यादिकं गुणेणा द्वारेण संनिहितमेधेयमिति

मवति शाद्वमतश्च वाक्यार्थेन्वेतीति सिद्धांतयति सत्यमित्यादिना । एवं च सिद्धां

तेसंनिहितसमस्तधर्मपरामर्शिन एवंशास्यानुवादकत्वात्फलपरत्वमेवकौ द्व

षीतकिवाक्यस्येति वेदितव्यं । उद्देश्य स्थापितत्वात्संनिहितः स च ऊहपदस्य फल

स्वरूपतिनाशाद्वद्वयर्थः । उपास्यफलप्राप्त्यभिज्ञानादीति । उपास्यज्ञानस्य प्र

त्यभिज्ञानादाविलक्षणफलस्य प्रत्यभिज्ञानाच्चेत्यर्थः । भाष्ये कौषीतकिब्रा

ह्मणगते तेवंशाद्वेन वाजशाने पिब्राह्मणगतगुणपरामर्शो भावीति कारणेन

युक्तः । उक्तप्रकारेणगतस्मरामज्ञोस्यापि संभवादित्याह तथापीति । शाखांतरी

यगुणोपसंहारेपि स्वशाखायां श्रुतस्वीकाराच्च यश्रुतहानि । प्रज्ञाक्लिष्टेतो भाष्य

निर्दिष्टत्वेनेत आह केवलस्येति । केवलाहि शाखायांश्रुतास्तेषां चैवल्पहानिर

ख्या

१ श्रेयसं

कल्प० श्रुतौ पसंहारे सतीति तां केत्यर्थः ॥ ॥ निःश्रेयसं लक्ष्यादातं निर्द्धारणं प्रसक्त्यं इयपर्थः
२० अहं श्रेयसे आत्मा श्रेष्ठत्वाय यथा प्राणो वागादि भ्यः श्रेष्ठस्तथा । उत योऽतसद्धी
त्यर्थः । एवं विद्वानपि प्राणो श्रेष्ठं विदित्वा तदुपास्य प्राणात्मा आत्मा श्रेष्ठ्यादिगुणका
न्वितो भवति ॥ आनंदादयः प्रधानस्य ॥ प्राणस्य सविशेषत्वात् फलः प्रारणा तद्गु
यवशिष्टत्वादुपसंहारो ब्रह्मणस्तु निर्विशेषत्वात् । एवं प्रारब्धागतेन ब्रह्म
रेव भूमिनि सिद्धे तीनंदादुपसंहारद्वानिर्भात्यवस्थानात्संगतिः । ननु वेदब्रह्मैश्वा
त्युगुणोपसंहारउत्सर्गप्राप्तोनचात्रापवादकमस्त्राहुवह किंचिदुपलभ्यतेतन्नि
मर्थमधिकरणमारभ्यतेत आनंदगुणविधानस्यैति । यद्यानंदोदयो ब्रह्मैश्वा
त्सर्वशाखास्वयसंक्षियेरन्नहि सयद्यभमत्वादयः किमितितोपसंहृताइति प्रतिब
धाशंकायांसंयद्वामत्वादयउपासनार्थं विधेयाः विधिप्रयुक्ताः एवं सप्रचातिर्भ्रा राम
नपरिमाणत्वादपूर्वप्रयुक्तधर्माणांयथाविधिव्यवस्थासत्यज्ञानादयस्तु २०

छके नैवपदे नानार्थे शेषस्य बोधितला।।८

स्तुतत्त्वमित्यर्थोऽङ्गितियत्रयत्रवस्तुतत्त्वप्रतिपत्तिस्तत्रैतेनव्याहतिरितिविशेषप्रद
र्शनेनप्रतिबंदीपरिहर्तुमयमारंभइत्यर्थः।शिष्टंस्पष्टार्थं।यत्तुनिर्विशेषेपदां
तरवैयर्थ्यादनुपसंहारइति।तत्रोच्यते।सत्यज्ञानानंदानंतानामनवपदार्थाइतरे
तरविशेषणाविशेष्यभूतात्मविरुद्धानृतजडदुःखपरिच्छेदानात्मतानांव्याव
र्तयंतःसत्तादिपरापरसामान्याधारभूतामेकामात्मव्यक्तिंलक्षयंति।सत्यज्ञ
व ता भुंननुनिर्पंतौकंनव्यक्तं।एतावताऽस्यब्रह्मत्वसिद्धिर्भवतिकर्मान्त्यपदलक्षणाचप्रयोगेविरो एकापद्मार्ज
तज्ञामाम वार धाभावाल्लक्षणायाश्चतुष्टानात्मयोल्लखेचपदांतरेयावत्योध्यंतयःसंभाव्यंते
तन्निरसनसमर्थपदद्वंद्वयोलक्ष्यमितिसमारोपितमनंतरसतत्समर्थपदार्थ
द्वंद्वसर्वत्रोपसंहर्तव्यमिति।आध्यातायप्रयोजनाभावात्॥विद्याभेदाभेदप्रसंगे
नवाक्यभेदाभेदचिंतानंतरंवपततविद्याभेदाभेदचिंतनादेपादसंगतिः॥ब्रह्मस्व
भावभूतोपसंहार्यधर्मचिंतानंतरमस्वभावस्यानुपसंहार्यस्यापघ्यर्थादिपरत्व

विरोधमानाभावेलक्षणानोदेतीत्यर्थः ५

ग्रावंद

कल्प०
रूपधर्मस्य श्रुतप्रतिपन्नरूपावस्थाचिंतनताद्वांतरसंगतिः विगतन्त्र्यत्वं प्रतिजित्ज्ञन
२१ र्थं सर्वं ध्याते ज्ञाते सह स्व भिन्यादिभिर्मन्वंतरमेव विज्ञाप्यते। सूक्ष्माद्वाद्वादिमूर्तध्या
नो मौक्तिकाः। कररामाभिमान्यादित्यादिदेवताध्यायिनः अभिमानिकाः। अंतःवृ
त्त ध्यायिनो बोद्धाः। इह प्रयोजनेऽसंभवात् इह फलत्वनानुपपन्नेः परत्वार्थत्वमित्यतरे
षामित्याह तत्र देवेति फलत्वनिरूपणत्वेन तास्य यौगिक पुरुषपरत्वेमिधायमानांतार
नभिगतत्वलक्षणाम प्रवेशत्वं तात्पर्यलिंगमाह अनभिगतताथेति। अचेतना
याश्रुतेरभिप्रायायोगान्महाभूतेत्याप्रश्रयश्चाङ्गोगोरमाइत्याह आज्ञायातिश्चापद्रवे
२ ति। किं चार्थादिपैरविमाकमेदेतप्रतिपादिते प्रकरणोद्र्यथः स्यात्रिर्गुण विधायांन
दनुपयोगान्मूत्रपरत्वमात्रप्रतिपादनेचैकवाक्यत्वलभ्यतइत्याह किं च श्रुत्य राम
तरे जिज्ञासितस्मकरणास्थ से प्रकृतइतिवाक्यमेवंश्रुत्यंतरा॥ ॥अजामवीतिरितस्य २१
डजारातप्रवृत्तबाकामेदप्रसंगात्यादिपरत्वंनिरस्तंतर्हि हिरण्यगर्भसकलस्य

एकलेहिरवं

वाक्यस्यान्वयेन वाक्यभेदाभावात्त[illegible]रत्वं वाक्यस्याशंकते। तत्वेकरवायम्आ
सीदिति प्राप्तस्यात्तेरात्मैकत्वावधारणादेहात्ते नोहितस्यैवरणात्परमेश्वरे गम
[illegible]मानेकथं हिरण्यगर्भैश्रीकाउत आह श्रुतिस्मृत्योरिति। आत्मा वेति वाक्ये हिर
ण्यगर्भपरमेव महान्तस्तस्य विषयत्वेसतिज्ञो कस्य स्वस्य विषयत्वात्। आत्मै
वेदमग्र आसीत्पुरुषविधः स वै शरीरी प्रथम इति च वाक्यवद[illegible]त्पन्नमात्मा
लिंगाद्धयमन्यथानेयमित्यर्थः। लोकस्य सृष्टिप्रलयप्रमाणां वांतरेश्वरकार्या
स[illegible]तीत्यकत्वावधारणादिकमवांतरेश्वरसंबंधितयागमयतीति योजना
अनुमानस्य स्तुतिस्मृत्योरित्यादि। तात्पर्यव्याप्तिस्त्वाईदर्तानो व्यतिरेकव्याप्ति
माह पारमेश्वरस्येति। पारमेश्वरलिंगहयस्यान्यथानयनप्रकारमेवदर्शय
ति अग्निर्हीति। संदेहान्यायं वक्तुं पूर्वका[illegible]मनुसंधत्ते अपि चेतस्मिन्निति। अत्र या
तोरेतसः सृष्टिः प्रजापतेरेतो देवा इत्यादिना प्रजापतेः कर्तृकास्य सृष्टिरुक्तेत्यर्थः उत्तर

ति

कल्प० वाक्यमात्रेणोच्यत इत्यपि चेतनाभ्युदृति। अत्रापि हृष्टहति। आत्मैवेदमग्र आसी
२२ त्पुरुषविध इति वाक्ये हहृत्यर्थः। आत्मेति पदं यस्य तस्य भावस्तत्त्वं। महात्म
नाविषयत्वे सति लोकस्य हि विषयत्वादिति हेतोर्विशेषणासिद्धिमाह नच म
हाभूतस्यैतत्त्वाद्ब्रह्मापि महाभूतानि सृष्टेति कल्पनीयमिति। अनेनेति द्वा
तेमहाभूतैनसर्गेतोपसंहारान्याद्रसंगतिः। सूचितासर्गस्य महाभूतादित्वं यद्
उ न्यंतरे ऽपि ननं तस्मिन्नष्टौ छिद्यत्वं नादरनीयं किंतु तस्येहोपसंहारः कार्य इत्यर्थः
। औपयिकत्वमुपयोगित्वं महाभूतानुपसंहारेपि परमात्मा प्रत्येतुं शाक्य इत्या
ह नच लोकसर्गोपीति। अत्रैवोक्तमिति। अस्मिन्नेव ब्राह्मणे संज्ञामूर्तिक्लृप्त्या
द्यभिकरणोक्तिरित्यर्थः। उपरिष्टाद्वेति। एष ब्राह्मणे षट्सूत्र्यादिवाक्ये इत्यर्थः॥ ॥ राम
द्विदं जगदग्रे सृष्टेः प्रागात्मैक एवासीदृ। एवकारस्तु सजातीयभेदात्मसुदानी २२

मिव विशेषावस्थायानिषेधार्थः। मिषन्निमेषव्यापारवच्चेतनंतत्रच्छामिषतोऽप्यु
पलक्षणांईक्षंतेनतेनत आडभावश्छांदसः कृथ मिक्षितचार। लोकांतस्तजेत्यक्षा
मीति। लोकाएवोचंते अंभ इत्यादिना। अंभः प्रभृतीन् स्वपमेवस्तुतिष्याच
ष्टे अदोंभः परेणादिवंद्यौः प्रतिष्ठांतरिक्षं मरीचयः पृथिवीमरोयाः अधस्तात्ता
आपइति। अदस्तदंभः परेणदिवंदिव परस्तात्तत्तेनतस्यचपरस्तात्तेमात
स्य द्यौः प्रतिष्ठा आश्रयः सोप्यंभः प्राहवा द्यादिवमारभ्योपरितनलोकाद्रष्टांश
मस्येरंभो निरमिप्राप्तत्वादंभ उच्यंत इत्यर्थः। अंतरीक्षलोकः स वितमरीचिव्या
प्तत्वान्मरीचय इत्यर्थः। स्थानभेदापेक्षया बहुवचनं। मर्यंते स्मिन्भूतानीति
पृथिवीलोकोमरः याः पृथिव्या अधस्तात्ता आपः पातालानि तेषामप्युपलक्षणात्
विधेयापेक्षयास्त्रीलिंगत्वं आत्माहिरण्यगर्भः पुरुषविधः पुरुषप्रकारः शिरः
पाण्यादिमान्प्रजापतेरेतः कार्यदेवाः। प्राजापत्तिः कार्यकरणाधिष्ठात्रीस्त्मा

कू२

देवताभागादिभिः सहसृष्टवान्। तांश्च तं प्रति भोगसिद्ध्यर्थं शरीरमयांश्चकार। स च ता
कल्प० भोगांगो शरीरमानीतवान्। तथाश्वशरीरं पुरुषशरीरं चानयत्ता देवताः सोऽब्रवीद्
२३ यथायतनं यथा च चक्षुरादिस्थानं। अस्मिञ्छरीरे प्रविशतेति। स ईश्वरस्तमेव सीमा
नं मूर्द्धः केशविभागावसानं विदार्यच्छिद्रं कृत्वा तया द्वारा ब्रह्मरंध्राख्यया शरीरं प्रापद्य
त प्राप्तवान्। स शरीरे प्रविष्ट ईश्वरस्तमेव शरीरांतर्गतं स्वात्मानं। ब्रह्म तत
मं तत्कारणकोऽत्र दृष्टः ततमं व्याप्ततमं यच्च ब्रह्म तद्रूपेणात्मानमपश्यदि
त्यर्थः। यः शरीरे प्रविष्टः परमेश्वर एष एव ब्रह्म परमात्मा प्रजापतिर्हिरण्यगर्भोऽप्येष
वा। प्रज्ञा ब्रह्म चैतन्यं। नीयतेऽनेनेति नेत्रं नियंतृ यस्य तत् प्रज्ञानेत्रं। प्रज्ञाने तस्मिन्ने
वाधिष्ठाने प्रतिष्ठितं। लोकोपि भूरादिः प्रज्ञानेत्रः प्रज्ञानियंतृकः सैव प्रज्ञा सर्वस्य लोक
स्य प्रतिष्ठाधिष्ठानं ब्रह्म॥ ॥पूर्वं चर्मणोके विघ्नैकपशुरोपसंहारमित्र परमात्मादात्मादसंग राम
तिसिद्ध्यर्थं वर्णांतरमारभते अपरः कल्प इति। कल्पः प्रकारः। पूर्वत्र वाक्यैर्बलार्थादिपर २३

त्वमविरुद्धत्वाविद्धैकामुद्धंश्च श्रुतमित्तार्थोपक्रमेणवाक्यभेदादित्याभेदड्डितिपूर्वपदस्य
तित्वसच्छब्दस्येति। उपक्रमस्यभेदादिद्वितार्थत्वमिति। आत्मोपक्रवाजसनेपिरात्वपान्मि
त्तार्थत्वमित्यर्थः। ननु सच्छात्मोस्तु संहारादुपक्रमस्याप्यात्मपरत्वमस्तु तेत्याह सन्न आत्मेति
असंजातविरोधोपक्रमात्संजातविरोधउपसंहारः सन्न्यासामान्येपरमात्मशब्दध्या
सपरत्वेननेतव्य इत्यर्थः। ननु हृदयव्रह्मात्मत्वपरत्वाभावेवाक्यस्यकथमेकविज्ञाना
त्सर्वविज्ञानप्रतिज्ञासदुपक्रमादध्याये निर्दिष्टाधारतेन आह विज्ञाने न चेति। ननु तत्र
प स्थाद्येउपक्रमस्यवात्मरः आत्मत्वएवसत्वेनसच्छब्दस्याकाशादिवद्भाक्तिवाचित्वेनासं ग
त दित्याशर्थत्वात्तथाविमित्तउपसंहारगतात्मनादात्मपरामर्शोभावाक्यशेषात्। अतआ
हात्मनावदिति। आत्मेवसदिति स्थेतदात्मनावदिति योजना। अभ्युपेत्यापि सच्छब्दस्यसामा
न्यवचनत्वेनाद्यात्स्योपदेशादितिहेतुमाहेत्यर्थः। सच्छब्दस्यसामान्यवचनत्वेऽभ्युपेतेवा
क्यशेषस्यनिर्णायकत्वमाह सच्छब्दस्येति। सदेवेत्येतद्वाक्यमात्मन्येव व्यवस्थापनीयमित्यर्थः
ग

कल्प० ननु क्वचिदुपक्रमादुपसंहारोपि निर्णीयते यथा वेदोपक्रमा ऋग्वेदादिज्ञानानां वेदपरत्वे तद्वदिस्मिं
२४ न्नप्यादत आह तत्तार्थेति। निर्णीतार्थत्वार्थः। अत्र ह्य फलकल्पना प्रसंगाच्चेन सत्ता यामरा
मत्तिरित्याह। अपि चेति किंचास्तु नामोपक्रमादुपसंहारे निर्णीयः। स तूपक्रमादपि वाक्य
नादेकविज्ञानहेतुकसर्वविज्ञानात्परमात्मपरत्ववाक्यस्येत्याह नचेति। वर्णकद्वय प्र
योजनं विभजते अथ चेत्येवं स्मिन्निति। पूर्ववर्णकान्तपूर्वपक्षे स्पतेरेकवाक्यं हिरण्यग
र्भोयास्ति परं। तत्स्वहोतेनुन वाक्यं [illegible] अंश भावनापरब्रह्मत्वप्रतिपादनद्वारेणा
र्थीतद्भावनायां पुरुषप्रवृत्तिहेतुरित्यर्थः अस्मिंस्तु वर्णके पूर्वपक्षे दोऽपवाक्यं सत्तासामा
न्ये ब्रह्मत्वसंपत्यर्थोपाज्ञस्तेनपि वाक्यत्वात्मनो ब्रह्मत्वगोचरमिति विषयभेदः सिद्धांतेहे
अपि वाक्यस्य प्रत्यक् ब्रह्मैक्यगोचरे इति भेदे तत्त्वाप्ते ज्ञात्वात् ज्ञायत एवेति तोणे।।।। ।। ।।
श्रुतिसिद्धये पि वृद्धैक्ये सदात्मप्रामुपक्रमः ततः किंमिति तत्त्रोतुराचार्यो न्यायसंग्रहे तत्प्र राम०
या। पदयोः श्रोतसामानाधिकरण्यस्य वाच्यार्थभेदादनुपपत्तौ तत्प्रतितारापल्लहेणा २४
सामानाधिकरण्यमिति

श्रापते। तत्र लक्ष्यमाणावपि तत्त्वमर्थौ यदि भेदेनैव लक्ष्येते तर्हि तत्रापि लक्ष्यांतरं स्या
दित्यनवस्था स्यात्सामान्यादिति लक्ष्यमाणार्थैक्यमेव युक्तं। तत्र तत्त्वपदार्थो ब्रह्मपर्यंतम
त्वपदार्थोपि प्रत्यगात्मपर्यंतो लक्षणीयः। तथा च वाजसनेयिवाक्ये तत्त्वमर्थपर्यंतं लक्ष
ग यति। छांदोग्यवाक्ये तु दृष्टं त्वमर्थपर्यंतं लक्षयत्यर्थैक्याद्धि द्वैविध्यमिति।। ।।कार्याख्या
नादपूर्वं। संदिग्धस्य तु पंचमस्य वाक्यशेषान्निर्णयः यद्वद्भिष्यंत आचामंतीत्यादिवैतस्मा
कृत दुःकृतयोरन्यगोचरस्तेवारस्या ग्राहनन्त्वत्रैति॥ एतद्व्याख्यानं दूषयति॥ तेषामिति॥ कयं हि विचारो
भवत्यपिहानौ विताधिकरणे संगच्छते नात्र तनः कर्तांको त्र रत्वेनास्य अन्यकृतमेव व्याख्याने भं द्वितस
प्रियाः सुकृतम्‌पयं तप्रियादुःकृतमिति तदधिकरणे दाहन्तवाक्यादेव निर्णीतेव्याचवाक्यांतरो
दाहरणं॥ यत्तु केशावेनास्य विचारस्यैवेतदधिकरणसंगमः उक्तः॥ विदुषः सुकृतदुःकृताविधूणे हे
तु ज्ञेनानां विदुषि सुखासुखसंबद्धोजीव तो विदुषि परन्नत स्वजीवदत्वसाधाम्वे विदुषः कर्म हानेनो
च्यपच इति॥ सा साधुः॥ कार्यमध्यगत मपि विद्वांसं प्रति अनानांश्रीत्यपाति संभवात्रहापि सुकृता
दिसंक्रमोपपत्तेरितात्तो तावृत्तं न गते द्रुमं॥ विषोदयम संत्रनं तरं हृत्वा एव कर्म हानमितिप्रसंगागतं नि
रूप्य प्रसक्तं तगुणोपसंहारं छेता माजपवारं केत्वेनाधिकरणं संवेधयन्नप्रवे प द्वयाति पपेत्यादि ना॥

१ मोक्षार्थमर्चिरादिपथेद॥ विद्योत्पत्यर्थं वा॥ विदुषोपि द्वैतदर्शने न यत्नोत्तरायणे दक्षिणायने वा विद्यायेवमोक्ष अवगत्यादित्याह विद्यानित्यादिना॥
४ न्यायमप्याह अत्र मानि वेधन इति॥ द्वितीये प्रत्याह न च विद्योत्पादायेति॥ न तृतीय इत्याह यद्यपि रश्मि
ति॥ भोगादारब्धफलकर्मक्षये द्वैतदर्शनोपरमसिद्धेर्न मार्गापेक्षेत्यर्थः॥ उक्तमर्थं निगमय
ति इति श्रुतिदृष्टविरोधादिति॥ श्रुतिर्निरंजनः परमसाम्यमिति॥ दृष्टे न्यायः॥ भास्करमतमाह येवि
ति॥ विदुषः पुण्यमपि निवर्तेत चेद्भोगप्रयोजकाभावात् गतिर्व्यर्थी स्यादित्यर्थः॥ अन्यथा
हि विरोध इति स्तत्र मार्गं तत्कृते न योजयति यदि पुनरिति पुण्यक्षये पापाक्षये भोगप्रयो
जकापाविद्यमानत्वाद्देहकाशानुत्पानेन दूषयति तेरिति॥ अनियमः सर्वेषां॥ सगुणनिर्गुण
विद्यास्तु गतिभावाभावव्यवस्थावत्सगुणास्वपि व्यवस्था प्राप्तौ तदपवादोयमारभ्यते॥
ननु ब्रह्मलोकप्राप्तेर्गत्यपेक्षत्वात्तत्फलास्तु सकलसगुणविद्यास्तु लिंगात् इति सिद्धेः कथं प्रक स
रणेन दुर्बलेन गतिव्यवस्था शंक्यते तत्राह प्रकरणं हीति॥ लिंगस्य सामान्यसंबंधसापे
क्षत्वात्प्रकृते चेतदभावाद्विनियोजकत्वे प्रकरणव्यवस्थेत्यर्थः॥ यदि पंचाग्निविद्यादिषु
श्रुतापि गतिर्विद्यांतरेषु चार्थतत्तोतिप्रसंग इत्याह यद्यदिवितिप्रकरणस्थानियामकत्वे
म

यत्र क्वचिच्छ्रुतेः सर्वत्र श्रुतमेवेति ॥ दर्शपूर्णमासविकृतिषु सौर्यादिषु ज्योतिष्टोमविकृतिषु द्वाद
शाहादिषु च प्राकृतधर्म्मणामतिदेशातः प्राप्तिर्न्न स्यात्तस्य वीजौपदेशिकत्वप्रसंगादित्याह न चैते
षामिति ॥ अतिप्रसंगांतरमाह न च दर्विहोमस्येति ॥ यदेकयान्नुहुयाद्दर्विहोमं कुर्यादिति श्रूयते
यत्रैकयर्चा नु हुयात्तं होतुमारभेत तत्र दर्विहोमं कुर्यादित्यर्थः ॥ ये होमाः ऋतुश्चित्प्रकृतेः स्वं
न गृह्णंति न च वैश्वानराग्निवत्स्वधर्म्मं प्रपद्यंत इति ते चापि दर्विहोमा इति नामतेषु नारादुपकारकमं
गमात्त ॥ तत्र दर्विहोमाधर्म्मग्राहिणो न वेति संदेहे उत्पत्तावश्रुतदेवताकत्वात्मकाव्यक्तत्व
न सोमयागसाम्यात्तद्विकृतित्वात्तद्धर्म्मप्राप्तावश्यमेव्यसिद्धांतितं ॥ अग्निहोत्रे तु जुहोतीत्यादे
र्द्दर्विहोमस्य होमत्वात्सोमयोगस्य च यागत्वाद्वैषम्येण न प्रकृतिविकृतिभावः ॥ अव्यक्त
त्वं च सति यागत्वे विशेषसंबंधनिमित्तं न यागहोमत्वकृ[illegible]पात्यंतवैलक्षण्ये प्रकृतिवि
कृतिभावमनुगमयितुमर्हति ॥ अन्यत्र तर्हि नारिष्टहोमप्रकृतिकत्वं दर्विहोमानां तदपि न ॥
नतोवदग्निहोत्रस्य नारिष्टप्रकृतिकत्वमुभयत्रापि कृतिपदधर्म्मासंक्रांत्वेनाग्रहणमा

णविशेषत्वान्नचहोमांतराणां नारिष्टप्रकृतिकत्वं तेषां नारिष्टप्रकृतिकत्वमाग्नेहोत्रप्रकृतिकत्व
वेत्यविनिगमप्रसंगात् तस्मादपूर्वादर्विहोमा इति ॥ एतदेवमप्रकृतिविकृतिभूतस्य दर्विहोम
स्याधर्म्यकत्वेनासिद्धत्ति प्रकरणस्यानियामकत्वे यत्रकोपि श्रुतस्य दर्विहोमशेषत्वापत्तेरित्यर्थः ॥ अ
पिच प्रकरणानियामकत्वे सर्वेषु धर्मोः सर्वकर्मणां स्युस्तथा चाप्राकृतानुष्ठानेत्याह न च सर्वधर्मे
ति ॥ ननु प्रकरणस्यानियामकत्वेपि श्रुत्यादिभिः शेषशेषिभावावगमः स्यादित्याह नचैवं सतीति ॥
श्रुत्यादयो हि द्विःकामाः केचित्सामान्येन प्रवर्त्तंते यथा व्रीहीन्प्रोक्षतीति ॥ केचिद्विशेषतो यथैंद्र्या गा
र्हपत्यमिति ॥ आद्येष्वाह तेषामपीति ॥ इतरथानर्थक्यादित्यर्थः ॥ द्वितीयेष्वाह यत्रापीति ॥ वि
शेषश्रुतिविनियुक्तस्यापि धर्मस्य प्रकरणानपेक्षायामानर्थक्यमेवस्यात् न ह्यैंद्र्या गार्हपत्य
प्रकाशनमात्रेण किंचित्फलं लभ्यमित्यर्थः ॥ यत्रस्वयमेव प्रकरणं विनियोजकं यथाप्रयाजा
दिषु तत्र विनियोगाय यत्र श्रुत्यादीनि विनियोजकानि तत्र विनियोगनिर्वाहाय प्रकरणम
वश्यमभ्युपेयमित्यर्थः ॥ प्रकरणस्यवाक्यादूष्यमाणं कथमाह नचपेचेति ॥ छांदोग्यस्यपंचाग्नि

क॰त्रि॰त्रि॰ विद्यावाक्यगतमत्र श्रातपसोर्वीर्यांतरवशेन विद्याफलत्वश्रवणात्तं व्याख्यायवाक्येन सब्रह्मणा वाधयसर्वं
सगुणे हे स्यहविद्यानामर्चिरादिद्वारा ब्रह्मलोकप्राप्तिसाधनत्वमुक्तं इदानीं वाजसनेयकगतपं
५८ चाग्निविद्यायां साक्षात्सत्यब्रह्मोपासनस्यार्चिरादिप्राप्तिसाधनत्वं प्रतीतेरप्येवमेवेत्याह तथान्य
त्रापीति॥ ननु सत्यशब्देन फलाद्याभिचारात्तं चाग्नय एवोपेता मतस्त्राह पंचाग्निविदश्चेति॥
न केवलं लौकिकसत्यस्यापेक्षितत्वात् ब्रह्मणः स्वीकारात् कुत्र सत्यत्वात्सत्यमुपासत इति ब्रह्मो
पासनादीग्रहणमपि तु पंचाग्निविद्यासन्निधानादपीत्याह विद्यासहचर्याच्चेति॥ इति तत्र
मार्गहीनानामपयत्ते तौ पंथानौ न विदुरित्यधोगतिश्रवणाद्द्वितीयातरणीलानां मार्गद्वये तत्रापि
वेश्वतत्वोपासकानां दक्षिणमार्गप्राप्तिरस्तीति॥ नेत्याह तत्रापि च योग्यतयेति॥ विद्यायात
दाशेहनीति विद्यादेवयानयोः संबंधं योग्यतयेत्यर्थः॥ यत्तु प्रकरणस्यानियामकत्वे दूषणं
२॥ जातमुक्तं तदनंगीकारपक्षस्मिन्नित्याह मतेत्वं प्रकरणमिति॥ वाक्यबाधितविषयादन्यत्र प्रक
रणस्यानियामकत्वमिष्यत इत्यर्थः॥ श्रौतंवाक्यंये चैमेरण्ये श्रद्धां सत्यमुपासत इत्यादि॥

स्मार्त्तेशुक्लकृष्णेगतीह्येतेइत्यादि॥विपरीतरेष्वपिदेवयानःपंथाअस्तीतिशेषः॥यतस्तत्रमेकेवलआतस्म
मार्गस्यसर्वत्रोपसंहारश्रुतेस्तल्युपक्रोशलविद्यायांपंचाग्निविद्यायांचानेकत्रमार्गोक्तिर्हेपर्य्यमिति
तत्राहेत्यकारकरिति॥उभयत्रानुचितत्वंभाष्योक्तंप्रयोजने॥॥यत्रेयस्मिन्कालेकामाःदृदृविष
याःपराङ्गतानिवृत्ताभवंतितद्गुणलोकाखंस्थानंविष्ण्यारोहंति॥तत्रचस्थानेदक्षिणाःदक्षि
णमार्गंगानयंति॥तपस्विनोप्यविद्वांसोनयंति॥येएततंचाग्निरूपंविदुःयेचारण्येस्थिता
इमेवनस्थाश्रयःश्रद्धांकृत्वासत्यमवितथंपरंब्रह्मोपासते॥उभयेप्यर्चिरादिमार्गंप्राप्नुवंतीति
शेषः॥एतौपंथानौदक्षिणोत्तरौयेनविदुस्तेतत्प्राप्तिसाधनंनानुतिष्ठंतीत्यर्थः॥तेकीटादयोभ
वंति॥कीटाःगोमयादिजंभवाः॥पतंगाःशलभाः॥दंदशूकाःसर्प्पाः॥पावकं॥॥निर्गुणविद्या
यांगतिंप्रतिषिध्यसगुणविद्यायांगतिप्रयोजनंकेश्वर्यविशेषदर्शनात्गतिरर्थवतीत्युक्तं
सगुणस्यचगतेःसार्वत्रिकत्वंवर्णितं॥इदानींनिर्गुणविद्यायामपिमोक्षहेतुत्वानुपपत्ते
रैश्वर्यफलत्वंवक्तव्यं॥ऐश्वर्यविशेषस्यगतिमंतरेणापितिसगुणस्येतिविशेषणंचव्य

क॰ त्रि॰ त्रि पमित्यभिहितव्यवस्थाद्वेषेण प्रत्यवस्थीयते। तत्रोपरितनकतिपयाधिकरणानां तात्पर्यमाह स
५५ गुणमामिति॥ अपुनरावृत्तिर्हि इति। पुनर्देहानुपादानमित्यर्थः॥ ननु पुनर्देहानुपादाने नाप
वर्गः। किं विदानीमप्रवृत्तफलकर्मजन्यभाविदेहसंबंधाभावः॥ वसिष्ठादीनां चासोस्तीति नाप
३ नापवर्ग इत्याशंक्याह न च तावैवेति॥ भाविदेहस्य सद्वेस्याप्रवृत्त[illegible]फलकर्मजन्यत्वाद्वसि
ष्ठादेर्यदि देहांतरे ग्रहणं पुनः तर्ह्यप्रवृत्तफलकर्मजन्यदेहत्वान्मुक्तानस्फुरतस्माद्यदि प्रवृत्तफ
लकर्ममात्रं देहांतरस्याहैवं वसिष्ठादिदेहमात्रारंभकं कर्मोपतीचेदेरव्यक्तिदेहांतरग्रहणानुपपत्ति
६ प्रती रित्यर्थः॥ पश्चावसिष्ठादीनां प्रारब्धकर्मप्रतीक्षायामस्मदादिविछन्नदर्शनेतरव्यासिद्धमित्याह
न चैतावदेवेति॥ विद्याकर्मणोः सहस्तु तुष्ठानं विद्याकर्मसमनुष्ठाने प्रतिबंधापगमे ग्रहत्वेन न
हेतुरपितु हेतुरेवेत्यर्थः॥ सेतुभेदेन हेतुनान्निम्नदेशमापो नापिसर्पंतीति नापितु सर्पंत्ये
वेत्यर्थः॥ आवर्जितो वशीकृतः। धियते प्रतिबध्यते प्रारब्धेमधिकारलक्षणे फले याभ्यां विद्या
कर्मभ्यां ते प्रारब्धाधिकारलक्षणफले विद्याकर्मणी इत्येको बहुव्रीहिः॥ तादृशे विद्याकर्मणी यस्य

अभिमानः

त्प्रारब्धाधिकारलक्षणफलविपाककर्मा पुरुष इत्यपरः ॥ सौम्य दिव्यधुगपत्क्रमेणैवेति प्रवृत्तफलादेवकर्म
र्मणो नानादेहप्राप्तिरुक्ता ॥ मुक्तो जीवन्मुक्तः ॥ अनाभोगात्त्रिविधयेत्यविस्तारात्त्रिविधया ॥ प्रख्यापाप्रतीत्या
दृष्टाभिमानरहितयेत्यर्थः ॥ विहरति चेष्टते । स्वकृत्यप्रवृत्तमिति भावः किमर्थं प्रवृत्तः कर्मस्नेहः इति न म
ज्ञायते तः पूरयति आधिकारेति ॥ ननु प्रवृत्तफलं कर्माशयं भोगे नातिवाह्यं तु अप्रवृत्तफलानां तु
कथं निवृत्तिरत आह प्रारब्धविपाकानि त्विति ॥ जातिस्मरस्याधिकारिकपुरुषाद्वैलक्षण्यमाह योहीति
परिसज्यते परित्यक्तत्वेन क्रियते ॥ पूर्वजन्मानुभूतस्येति कर्मणि षष्ठी तत्र जन्मवानिति ॥ जातोह
मित्यबाधिताभिमानवानित्यर्थः ॥ आधिकारिकपुरुषस्य जातिस्मराद्वैलक्षण्यमाह गृहादिवेति ॥
बाधितदेहाभिमान इति प्रदर्शनार्थं गृहोदाहरणं ॥ व्युत्पत्तेति मा ष्वपदमुपादाय व्याचष्टे विवादं कृ
त्वेति व्यतिरेकमाहेति । प्रवृत्तफलमेव कर्म भोगेन क्षपयं त्याधिकारिका इत्युक्तं तस्य व्यतिरेकमुप
न्यस्य दूषयतीत्यर्थः ॥ प्रवृत्तफलानेककर्मजन्यफलभोगस्याधिकारिके सुपोषकत्वात्कर्मान्तरशा
दंव्यारव्यात्यप्रारब्धेति । त्वं तदसि वर्त्तेस्व इति ब्रह्मात्मत्वं जीवस्य वर्त्तित इत्युक्तोऽनुभवारूढत्वं ब्रह्म

गी॰ त्रि॰ त्रि॰
५६

त्मत्वस्य न प्रतीयतेऽर्थस्य तन्मात्रस्योक्तत्वादित्याशंकायाः परिहारमात्र व्रतेमानापदेशस्येति ॥ स्वप्र
काशं ब्रह्मात्मत्वं मत उपदिश्यते तस्मिन्ननुभवे न भाव्यं अज्ञानस्य प्रतिबंधकस्यापनीतत्वात् ॥ न चेदनुभ
येत तर्हि तदित्थं नीनास्तीति मतं तत्त्वमविषयत्वीत्याध्याहार्यं ॥ अतो ध्याहार भयात् उत्तमानापदेश उत्त
माधिकारिणं प्रत्यनुभवपर्यंततामचिज्ञप्यतीत्यर्थः ॥ अपाधिकारिकैस्वर्यप्राप कन्वर्थं ततोया
ए नेतर ॥ ततः पदार्थेद्युः विलक्षणसाक्षादेतदुभयत्नेबोधनानाकन्मेतादित्यर्थः ॥ कितं लिंकलए र्ध
वमध्येस्याकांतिस्यातास्यात् अन्तरधियां रतं ॥ प्रवेत्राधिकारिकाणां प्रारब्धकर्मणः वशी
रांतरो रेभसंभवो न कर्मांतरस्य निमित्ततेत्युक्तं केवमिह पितात्वप्रकरणपठितनिषेधेभ्य ए
वोपलक्षणं तथा सर्वप्रपंचनिषेधसिद्धेर्गारस्वांतरीयानिषेधानंतत्र ब्रह्मप्रमितिहेतुत्वमि
त्याशंक्यते अन्तरस्याधियोन्तरधियः ॥ अन्तरे धर्मिणि सप्रपंचप्रतिषेधाधिपदत्वं तत्र पदं व्या
चष्टे अन्तर विषयाणामिति ॥ प्रतिषेधसामान्यादिति प्रतिषेधानां अत्र मन्ति वैवदत्वसामान्या
दित्यर्थः ॥ तस्यैवैष प्रपंचरहितं ॥ अस्यार्थः ॥ भवे ब्रह्मत्वरूपत्वादेनं दाधुपसंहरति ॥ निषेधा

तदस्य

नामनाम्नोर्व्याप्त्योपसंहारसंभवः ॥ किं च त्वा ञ्च निषेध्यानां च निषेधधियामपि ॥ असंख्ये

यत्वेयैकत्रैकधर्मशक्योपसंहृतिः ॥ स्थालीपुलाकवत्किंचिन्निषेध्येनान्यत्र त्वयाप्यश्रुते

र्न्तासिद्धेरुपसंहरणं कृपा ॥ इत्याशंका निरस्यत्यमेतद्दृष्ट्वा करणं निरस्ति प्रकारस्य प्रतिषेध्यास्य

नाम्नोर्व्याप्त्युपलंभनसंगताः ॥ आत्मप्रमितिविस्तु अपि संयोग्यस्य अतस्य पले ॥ न च नि ३ पसंहरिष्यते

षेध्यानत्वात्तदनुपसंहारः ॥ प्रपंचो हि निषेध्योऽत्र मतं वा मौनितिकानि वा इंद्रियाणि शरीरं वा विद्या

वा विषयकारणं ॥ एषां परिमितत्वेन निषेधपरिमेयता ॥ साकांक्षे पुनिषेध्येषु गच्छेयुः प्रतीये

परेतत्राप्यस्य त्वं वाक्ये परिपूर्णे निषेधः ॥ अस्थूलमित्यापदी र्घमंत्ये न शरीरं निषेध्या

त ॥ अतमः स्पर्शविधा निषेध्यात् ॥ अवायुनाकाशमिति मतं निषेध्यात् ॥ अचक्षुष्कमि

त्यादिनेंद्रियनिषेध्यात् ॥ अन्यत्र त्वस्मादुपसंहारइति तच्च यत्तु भगवतास्तत्रकारे

चैतन्यनः ण्ण हेर्राधियामिश्रत्तु ॥ भाष्यकारेणोपसंहृ वादितिसंत्रोक्तं द्वैतान्विवरणं पंजाम द्रष्टव्याहि

नगतमंत्राउदाहृताः ॥ तदेव सूत्रं अस्थूलाधिकरणविषयाः इति च सत्रिच्छितं प्रधानकर्म तानं

क॰ १।२।२।
५८

का

गानामितितत्रैवमन्त्रयोजनात्॥ स्वावरतं चे चान्यदुहत्सतन्नमिति विनियोगमात्रं कथं तु पपापीति॥ वा
रवेत्यादिपदर्वेतिसामानि॥ रवेतीयादानि॥ वारवंतीयादेवं हे संप्रेग्य इति वेदसंयोगसिद्धे तत्रत्येनै
वस्वरेण स्वरवत्वेन नसिध्यतीत्यपि प्रायः॥ विनियुज्यमानं तत्स्य मुख्यते तितद्धि फलसंनिक
षीन्नरव्यमिति॥ ननु सर्वेषां विधीनामुत्पत्तिविनियोगाधिकारप्रयोगात्मकत्वात् कथं विधी
नां शेषशेषित्वमित्यत्राहैतदुक्तमिति॥ विधित्वे त्वपेक्षितोपायत्वरूपेण तत्रानुष्ठेयमात्रापेक्षा धात्वर्थः
नादुत्पत्तिरस्ति॥ अस्ति च किंचित्प्रतिशेषत्वाद्धि नियोगः॥ अस्ति च फलसाधने स्वामित्वपु
रुषस्याधिकारः॥ अस्ति चानुष्ठेयत्वबोधात्प्रयोग इत्युत्पत्तिविधावपि विप्यते चेतेषां प्राप्ति
ति॥ एतद्वैपर्यमेदेहेतुमाह एकस्यैवाहि विधेरिति॥ विधेर्विध्यपेक्षस्य उत्पत्त्यादिषु मध्ये यद्येक
मप्राप्तमितराणि प्राप्तानि तर्हि तदेवरूपं वाक्येनोल्लिख्यते नेतराण्यन्यतः प्राप्तेः॥ यदि त्वि
तीयापत्यतोऽप्राप्तानि तर्हि गत्यास्य वा एवोल्लिख्यते इत्यर्थः॥ प्रकृते तु विनियोगादेरन्यतः
प्राप्तेरुत्पत्तिमात्रपरत्वमित्याह तत्रेति॥ समीहितार्था प्रतिलंभादिति॥ समीहितेष्टसाधः समी

समीहितं फलं तत्साधनः तदर्थः तस्याभावकादर्पत्वं॥

हितार्थः भावप्रधानो निर्देशः ॥ हितसाधनत्वेतर प्रतिलेखादित्यर्थः ॥ तदर्पणान्नेवेति विनियोगवा
क्यार्पणान्नेवेत्यर्थः ॥ भवतु साम्नां सामवेदे उत्पत्तिर्यजुर्वेदे च विनियोगः स्मृतः किं जातमत आह
तत्र येन वाक्येन येन वाक्येन सामानि विनियुज्यन्ते । तस्यैव तद्वाक्यप्रकाशितत्वेन तस्य
उपांशुस्वरस्य ग्रहणं युक्तं तस्य साधनत्वसंस्पर्शाद्धि विनियोगस्योपांशुसाम्नो साधनत्वे
ज्ञायते नोत्पत्तिः दृष्टायां साधनत्वं च प्रधानमुत्पत्तिवाक्यप्रकाशितत्वनिमित्तः स्वरः
सामरूपमात्रसंस्पर्शी उत्पत्तिवाक्यस्य रूपमात्रप्रकाशनत्वादित्यर्थः ॥ इयदामननात् ॥
पुनरुक्तिमाशंक्याह गुहामिति ॥ सर्वत्र प्रतिपाद्यब्रह्मप्रत्यभिज्ञानाद्धि यैवाऽसौ दहरविद्यासु पसं
हार उक्तः ॥ इह तु प्रतिपाद्यभेदाद्विद्याभेद इत्याह नानेति ॥ भिन्नोऽपि प्रपंच्यत इत्युक्तं ॥ तमेव
प्रपंचप्रकारमाह न नु सर्वत्रेति ॥ यथा सर्वत्र रूपदधातीति स्र एव सप्त मंत्रवेदकासमुच्चत्वेऽप्य
यासविसाम्यं हि परो भवति । एवं पिबत्यदोपि पिबदपि बतरद्धत्यर्थः ॥ सत्पत्रधिकरणं गुलांप्र
ति साधिकरणेनोक्तं ॥ नन्वयः सेतुरिज्ञानानां मत्वारे ब्रह्मयपरमितिवाक्यशेषेपर

का० १।३।१
५८

मात्मप्रतिपादनार्थस्यैव जीवबुद्धितीयत्वात् भोक्तृत्वाच्च पिबंताविति तत्र भोक्त्रभोक्त्रौ प्रतिपद्येते त
था च छत्रिन्यायेन पिबंताविति तल्लोकाद्यौगिकमिति नेत्याह न तन्नवाकारो बालकेरोधादिति ॥ नन्व
न्यत्र धर्मादिति प्रकरणात् पिबंताविति तत्र जीवबुद्धितीयः परमात्मा प्रतीयत इति नेत्याह प्र
करणस्येति ॥ उत्पत्तौ प्रथमप्रतीतेर्वक्तृप्रतीत्यनंतरं प्रतीतेर्हि न संख्यापावनैव कस्य म
कं तस्मादिति ॥ न वयं नाकार्मकोषा वा केवला प्रकरणादपि बंताविति स्यल्लादौ लिंकलेक्ष्म
मः ॥ किंतु भाभांतपाच नंदेशे स्यैव वा कुर्त्वावगमात् जीवपरमात्मपरत्वात् पाचेतत्कार्य
पतितेपि बंताविल्येतद्विलाद्वागौणिकमित्याह समानेपत्रसोपसंहारेति ॥ उपांशुयाजादिवत्
रणे स मन्वपस्त्तेऽनुक्तौ तपिबदपिबतोर्यत्ल महितत्परं केवलेल ह्वाणीयमित्यपि ॥
पिबच्छब्दो पिपिबदपिबतोः समूहेल द्वापनितच्छ कोचासमक्षहिनाविति त्रिपीति ॥ मु
ण्डककठवल्लीश्वेताश्वतरेषु ॥ अंतरानः ॥ बृहदारण्यके पंचमोऽध्याये सप्तहे नेयाज्ञवल्क्य
मुषस्तश्चाक्रायणः पप्रच्छ यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेति

चाक्र:

उपक्रमस्मेकं ब्राह्मणं । अथ हैनं कहोलः कौषीतकेयः पप्रच्छ यदेव साक्षादित्यादि परं उपक्रम इति नामतः च
क्रस्यापत्यं चाक्रस्यापत्यं चक्रस्य पुत्रो चाक्रायणः कहोल इत्यपि नामतः । कुषीतकस्यापत्यं कौषीतकः ।
तस्यापत्यं कुषीतकस्य पुत्रो कौषीतकेयः । यदाह दीनोहि रत्तिकर्मतेनापरोक्षं तत्र ब्रह्म तत्साक्षात्स्व
तएवापरोक्षात् परोक्षमित्यर्थः ॥ तदेव ब्रह्मस्वरूपगत्येत्याह प्रश्न केतिसर्व सर्वान्तरः ब्रह्मणो
सि अस्य सर्वान्तरस्यात्मनिर्दिष्टादवधानि स्थितस्य चापरोक्षं तत्स्व ब्रह्मणोर्द्विर्तीना तु भयोरेक
त्वमुद्दीवृत ॥ कान्याभ्यासान्सर्वान्तरत्वप्रत्यभिज्ञानाच्च संशयमाह किमसस्मिन्भेद इति ॥
पूर्वं त्वपि अत्वाविरुत्स्य तत्त्वाद्दर्शितत्वमस्य पादपमंत्रद्वये पि भोक्त्रा भोक्तृपरतेनापि स्यात् विषये कर
मुक्तं ॥ इह तच्चैव कोपि न विषयेकत्वमभ्यासादिति पूर्वपक्षमाह भेद एवेति ॥ न चेह तथा स्त्री
त्ति ॥ पूर्वं स साक्षादित्येवकारो नयत्साक्षादपरोक्षादेव न कदाचिदपि परोक्षमित्येवं यो अत
इति मन्त्रभेदोक्ति रूढं तेनत्वव्यवहितानन्यपरसंगान्वेयं सा धीयोजनेति प्रश्नोत्तस्यैवान्तरत्व
पि एवकार इत्युक्तं भाष्येनन्तपरोक्षत्वादिरूपविषयेकत्वप्रत्यभिज्ञानेकर्षविषयाभेदः तत्रा

क्रा॰

५८

हतेनेति॥ उपक्रमवाक्ये लोकापेक्षरणविरहः प्रतिपाद्यः प्राप्नोति न प्राप्नोतीत्यादिना निर्दिष्टा लोके लक्ष्य
लेशानामपि विरहः॥ अपेक्षाभावसिद्ध्युपासनभेदनिर्वाहकं तु साधितं स्मरिदाहीनास्मि वेदवतादः॥
प्रश्नप्रतिवचनालोचनेनेति॥ नन्वेव्यावर्त्येति हि प्रश्नस्याज्ञातवस्तुजिज्ञासया प्रवृत्तिरूपत्वम्
ते प्रतिवचनस्य च न दृष्टदृष्टार्थपरकत्वेऽपि इत्यविषयवस्तुप्रतिपादनपरत्वं दृश्यते न तु पाक्षिपर
त्वमिति॥ ननु सिद्धवस्तुप्रतिपादनपरत्वेऽप्युपासनेऽप्यपेक्षस्य कागतिरिति परचोद्यं परिहरति
मत इत्यादिना स्तम्भितोपजतीत्यादौ विधेः प्रवृत्त्युत्पादकत्वात ज्ञाते च स्वत एव प्रवृत्ते विधिवै
यर्थ्यात् ज्ञातवस्तुज्ञाप्यं सिद्धवस्तुज्ञापनं तु वाक्ये प्यर्थोऽनुरोदनार्थं पुनः पुनः कृतमपि
प्रसिद्ध्यतिशयफलत्वाददुष्टमित्यर्थः॥ पितृभ्यो मातापितृभ्यां॥ ननु पुष्यादिभिर्न्यायिकरणे
भ्यामाद्विघामेदरूतिपूर्वः पक्षः॥ तद्वितरामतानाविशेषादितिसिद्धान्ते हेतुर्न वक्तव्यः॥ अर्थैकस्था
भ्यामसाध्यकत्वेन पूर्वपक्षानुत्पादतस्माहेतुभाष्यामपीति॥ प्रथमे सूत्रे पूर्वपक्षे कादे
शिमतनिरासार्थं साक्षात्पूर्वपक्षसिद्धान्तौ नोक्तौ भाष्यटीकाभ्यामवगंतव्यमित्यर्थः॥ तथा

पूर्वपक्षस्तु भाष्येति ... टीकायां

चपूर्वपक्षभाष्यमध्यासस्तामर्षादित्यादि ॥ एवमस्य स्वरूपे लक्षितेत्यादिकावश्यिक्षेतटीका तत्र वस्तुस्वरू
पं लित्यादिनाऽध्यासहेतोरन्यथासिद्धिरुक्ता ॥ ननु सर्वथाप्येनं तस्मिन्नित्यादिनाऽध्यासएवासि
क्षेऽर्थे सादित्युक्तोऽनन्वेकविषये पितत्वमसीति वस्तुनः प्रत्युपवस्तेः द्वितीयस्य तत्र गतांशंकाभाग
स्यानुस्थानमित्याशंक्याह स्यात्विति ॥ अपएव मा भगवन्निह्नायपंक्तितिवाक्यानंतत्र विषये कं नात्र
तादिति पूर्वपक्षाभिप्रायो हर्षितइत्यर्थः ॥ देहेव सा द्वा दित्येवकारादर्शापि विषये कस्मिन्नितिभ
वता भाष्यकारेणाऽभ्युपगतपादितेन स्फुटमस्मिन्निति न व्याख्या पतइत्याह स्फुगम मन्यादिति ॥ व्यति
हारेवत ॥ पूर्वत्र विषयेऽप्यध्यासस्त्वार्ह नापि इत्युक्ते अयमपि तथेत्यास्मिंश्चापपूर्वपक्षमाह
उत्कृष्टस्येति ॥ ननु वचनवशादुभयत्रोभयत्रापि तेनाऽप्यपत्स्ये एकत्वे दृष्टीकारः ॥ पूर्वपक्षो
न मिमात्रस्त्वयापी एः स्याद्देहे आत्मान्वयारिपामिति पश्चात्स्यतीतस्मिन्नर्थः ॥ जीवतादात्म्यस्याने
नप्रकारेणानुचिंत्यमानत्वादिति भाष्यं तस्यार्थः ॥ जीवतादात्म्यस्यै [redacted] स्येवरेशास्त्राहारे
प्योपास्यत्वानेश्वरस्योपासिनिवर्त्तिरिति ॥ जैव हि स्वत्यादयः ॥ पूर्वत्रजीवब्रह्मणोर्भेदितरेत

ब्र.सू.
६०

रात्मत्वनिर्देशभेदाद्भिन्नरूपा व्यक्तिः कर्त्तव्येत्युक्तं ॥ एवमिहापि जापतीमात्क्लोकान्होपापृश्नानम्मेति च
फलनिर्देशभेदाद्भिन्नमेव इति प्रत्यवस्थानात्संगतिः ॥ कात्पविषोधनामाद्दहरोपासनं वि
धायेत्पापयर्पतो विषयप्रदर्शकं भाष्यं स्मृत्युदाहरणे नव्याचष्टे तद्धेतद् इत्यादिना ॥ पूर्वोक्तस्येति ॥
वाजसनेयकं एवैष प्रजापतिर्यद्धृदयमेतद्ब्रह्मेत्यादिनाप्रोक्तस्य तत्पर्थः ॥ हृदयाख्य
ब्रह्मैकेन तदात्मभेदेन यकामरातिः ॥ वेकारस्योपरि तनेन चाद्वितीयेन तद्भेदेन यत्तस्य ब्रह्मल
एकत्वेदेत अन्तरे हृदय मित्यादिना हृदयनामाद्दहरोपासनादिः प्रकार उक्तः समपि परामृश्य
तीतिद्रष्टव्यं तदेतद्ध्याचष्टे अग्रे इति ॥ प्रथमजे भौतिकानां मध्ये प्रथमजाते ॥ यथा प्रजापति लो
कानजनय देवमुपास्यकोपीतीत्यर्थाद्यर्थः ॥ तथ्यत्पदम्याक्षिति एकस्यात्सदृदस्थय च्छेदेन
सहसंगतिरुक्ताद्वितीयस्तच्छब्द स्तत्रशब्द समानार्थः ॥ तत्रैवं सदृपात्मत्वब्रह्मलः सिद्धं
त्यर्थः ॥ अन्तर्बं धामेदे पिप्रात्वयामेदेपि स्वर्गकामो यजेतेत्यादावज्ञी वंयजेतेति शास्त्रप्रोक्ति
त्यकाम्यविषययोः साध्यभेदेन यथाभेदः एवमुपास्यैकेपि तत्वविषययोः फलभेदेन भेद इत्य

र्थः॥ उपास्यैक्याद्विध्यैक्यकर्मैक्यात्कर्मजिकं तावदाह॥ कैवेति॥ फलभेदस्यपवादकमाशंक्याह न च फल
भेद इति॥ किंजयतीमांल्लोकान्नित्यनेन फलोक्तेरेषां न प्रधानोपासनविधुद्देशे फलवतिकं
ज्ञाते हंतिपाप्मानमिति गुणभाता हरहं नामोपनिषदुक्तस्य फलस्य निर्देशस्य विद्याभेदकत्वमुच्य
ते उत प्रधानतदंगानामपि वादोक्तन्यायेन फलकल्पनामाश्रित्यप्रपमंप्रपाहतस्येति॥
अंगानां प्रधानान्वयद्वारेण फलसंबंधासिद्धेरर्थवादगतानि गुणफलानि प्रयाजादिफल
वदुपेक्ष्यं तदुत्तरर्थः॥ द्वितीयेपि फलभेदस्य न विद्याभेदकत्वमित्याह यदि पुनरिति॥ एवं
काम्यपदाभावेन उरुवस्यकर्मण्यैश्वर्यरूपाधिकानाम्रवणादित्यर्थः॥ अमुके फलं प्रधा
नस्येत्यप्रत्यमाणविशेषत्वाद्वा कोशगतसर्वफलकामस्याधिकारकल्पनेत्यर्थः॥ संवलि
तो मिलितः॥ एतदुक्तं भवति॥ विहितानां फलानां तु॥ विशेषार्थवादो फलकल्पनाऽविशे
षाद्वयार्त्तिविरर्थवादगतं फलेन तत्सर्वमेतीदरण्यगुणविशिष्टगुणोनः फलत्वेन कल्पनीय
मिति॥ वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवतीत्यादिप्रत्यावेनं ब्रह्मलव

कल्प.

६१

वेकेन पुनातीति जातेष्टेः पुत्रजन्मनिमित्तपुत्रपूतत्वादिरूंवालितोऽविकारोदष्टांतितः॥ अधि
करणं त्वत्र तच्छ्रुतौ पस्तत्रेऽनुक्रांतं॥ उपास्याभेदादिति॥ अहरित्यादि प्रगतत्वमुकासुपुरुषस्याभे
दः॥ अनुबंधाभेदेप्यपीति॥ अहमित्यादित्यपुरुषविषयोपासनरूपविद्याद्वयष्टेरकानुबंधाभेदेपीत्य
र्थः॥ काध्याभेदादिति॥ कर्मसमृद्धिलोकजयादिफलभेदादित्यर्थः॥ आलेतैर्न दृष्टिर्भेदेपूर्वपक्ष
एव दूषणत्वेन योजित इति॥ कामादिष्वः॥ पूर्वत्र तावत्तत्त्वमसीति प्रकृतवाक्यशेषत्वेन रूपाभेदाद्गु
णोपसंहार उक्तः॥ इह तु क्वचिदाकाशस्योपास्यत्वे क्वचित्तदाश्रितस्य द्रष्टव्यत्वमिति रूपभेदाद्गु
णानुपसंहारः॥ अधिकरणानारंभमाशंकते छांदोग्येति॥ ओंकारविद्यायोगितयाहामिति॥ सो
परिहरति तथापीति॥ सति हि दृष्टेन द्वारेण गुणस्य क्रतौ निवेशे सगुणविद्यासु ध्येयत्वेनोक्तानां
मपि गुणानां निर्गुणविद्यायामनुपपन्नमुपसंहरतित्वेनान्वयस्थेतोर्हि निर्गुणविद्यागतवशित्वादी
नां सगुणविद्यास्वपकर्षण्वयस्तं संप्रकारमाह सगुणेष्वपोवेति ध्येयत्वेन पूर्वविद्यौ संपत्त्र
वशित्वादयः अपंते न तत्रैषां ध्येयत्वेन विधानमित्यन्यत्रगतानामपि न ध्येयत्वमस्तु त्वपर्ष

त्वेतुस्यात्तदपि न शब्दतएषां तत्र नयनमपेक्षते सत्यकामत्वादिसामर्थ्यादेवसर्वेश्वरत्वादिसिद्धेः॥ अ
तोंतर्भावमात्रमुपसंहारइत्यर्थः॥ यत्तु सर्वापि विद्या सगुणेति मन्यमान इत साक्षाद्गुणोपसंहार
माह तस्य नस्यानतोपीत्यधिकरणं व्याचष्टे नतएकत्रेति यएषोंतर्हृदय आकाश तस्मिन्नेते इ
त्यत्राकाशाधारत्वस्य श्रवणादित्यर्थः॥ आकाराक्षाधारो यस्य तस्य भावस्तत्वं॥ अपरत्रेति॥ दह
रोस्मिन्नंतराकाश इत्यत्र गुणानां आकाशात्मत्वस्य श्रवणादित्यर्थः॥ छांदोग्ये आत्मेनाकाशात्मक
त्वेनोक्तः बृहदारण्यके तु हृदयपुंडरीकांतर्वर्तिर्भौतिकदहराकाशाश्रितः आत्मा वशित्वादिगुण
कउक्त इति न रूपभेदइत्याह आकाशशब्देनेति॥ नन्वात्मैच्यतां सगुणनिर्गुणत्वेन तु भेद
तुपेयगुणोपसंहार इति तत्राधिकरणांतरमवतारयन्नावसरो रूपदिहारं संचारयति॥ आद
रादलोपः॥ उपास्तिलोपेपि तस्त्वापत्तेन गुणानांलोपवत्प्रवेति किमित्यादिसूत्रस्तुपपत्य
पिभोजनलोपेपि प्राणाग्निहोत्रालोप इत्यवांतर संगतिः पादसंगतिमाह आनीति॥ पूर्वभो
जनमिति॥ तथ्यद्भक्तं प्रथममिति वाक्यविहितं प्राणाग्निहोत्रमित्यर्थः॥ पदं भनेत॥ ए

श्रल·
६२

७

कहोपत्न्याञ्जलीएतातीति प्रकृतस्यायतेः षट्पदान्यनुव्रतिः क्रामति सप्तमे पदे अञ्जलिनाग्रहणोत्तियाहि
हविर्धाने प्राचीप्रवर्त्तये पुरुषाः ९ तेनाहुः मुपांत्याहिति सोमक्रयण्यार्थं नीयमानायाः एककहोपत्न्याः
षट्पदान्यनुगच्छेदध्वर्युः सप्तमपदगतं पांसुमंजलिनाग्रहीत्वा पाकृहीत्वा स्यापपेत्पुनर्यस्मिं दिव
सेह विद्धीने शकटे ह्यास्युरवेप्रवर्त्तये पुरुषाः रुतेन पांसुनाऽऽह्वरमस्यां जयेतल्लुं येदि त्यर्थः॥
तत्र संशयः॥ यदेतद्दात्मं जनेन सप्तमपदसाध्यं तदपिसर्व्वेककहोपत्नीनयनप्रमत स्वतेनापि
प्रयुज्यते। उतक्रियार्थमेव तत स्वतेनैवम पुरुषस्य इति तत्र यथोर्द्धयेककहोपत्नीनयनसाध्य
त्वात्तस्य चिद्दपिवापतो विशेषसंबंधानवगमात सन्निध्यविशेषाच्चोभयार्थतेयाप्यते तत्पर्यं
प्सिकांतितं॥ यद्यपि क्रियनयनपोर्न्नसाक्षात्स्विनिवाक्यतः संबंधः तथाप्येककहोपत्नीद्वारावि
धोतेस्पष्टित्तीयया क्रयार्थावसीयते यदपात्रसातदपिमेव तत्संस्कारार्पिनयनमित्युक्तित्रायन
यनयोर्विशेषसंबंधः॥ नैवमस्ति पदेकर्मणानयनस्य विशेषसंबंध सत्याक्रयार्थमेव नय
नमिति॥ तदिदमाह यथेत्यादिना। सोमक्रयण्या एकहायनी समानीयमाना नाम वेतकहोपनीचतस्याः स

प्रमपद्दपोस्ते गृहएव मित्यर्थः॥ तावच्छब्दे नापिपरं तपर्वपहरस्य नोच्यते इत्याह तावच्छब्द इति॥ स्वामि
भोजनस्यऋत्विग्भिर्भोजनस्यद्रुत्तरंकालः तेकालमतीत्यप्राप्त्वोले प्राग्निहोत्रस्यापवर्गेण्टे ज
नलोपेप्राग्निहोत्रेकर्तव्यतासुवगम्यते इत्याह जाबालाहीति॥ नत्वत्राशनमात्रस्यभोज
नकालादपकर्षः प्रतीयते न प्राग्निहोत्रस्येत्यत आह अयज्ञीयादिति चेति॥ अग्निहो
त्रमुपक्रम्यतदिति वचनादतिपितृरूपमेतानि भ्रतीत उपजीव्यमग्निहोत्रे प्रतंतन्वेस्मतिश्रुति पि
भोजनंरूपाग्निहोत्रात्स्रागुच्यमानमशनमप्याग्निहोत्रमेवाग्निहोत्रेऽशनमभिव्याहारा
देकवाक्यत्वप्रतीतेरित्यर्थः॥ एवंविधिबलात्स्वाग्निहोत्रस्य भोजनकालादपनयने
प्रयद्यपादरादितिम्नत्रमन्त्र्यचितंनान्यत्रेषमेतस्याप्यपस्यतावकेदर्शपतितदेवेमत्तीति॥
ननुश्राद्धभोजनमपदात्स्वाग्निहोत्रादर्वाकेन प्रतीयते तत्राह स्वामिनः प्राग्निहो
त्रमुग्रिता। ऋत्विग्भिः प्राग्निहोत्रात्पर्वणि स्वी [redacted] ~~दितादेनमीभूतेत्रैमोह~~ यप्रा
गग्निहोत्रेकुर्यादितरपार्वणे मतिथिभ्योभोजनदानेस्वाग्निहोत्राहोमेनपरान्निहोत्रेको

ग्ला.

६२

रण्ग्नि वायुको र्हतं स्यादित्याद्दरः स्वामीयदा भुंक्ते तदैवा। तथा च वपं भोजनतलोपे प्राणाहुत्याप
श्चित्तिरिति शेषः तेनान्वाद्वियतामिति कर्तृर्थयं प्रयोगः। ऋतिस्यि भोजनतस्य पुरस्ताद्धि हितं चाग्निभोज
नमित्यपाहारः। दूषणपरभाष्यस्याभिप्रायमाह यथा हीत्यिः। कौंडपायने प्युपसद्याद्धिध
र्मोस्तीग्निद्रव्य देवताकल्पेत्युक्तं। याग्गस्य कल्पंदुव्या देवतोत एव धर्मोतरं कल्पधर्मीतरे प्रकर
णांतराधिकरणं धर्माति देशाधिकरणं च प्रपन्नस्त्रत्रेऽनुक्तं तं। न नु विधीयतां भक्तोद्रव्यकता
तथापि भक्तो भावे ग्निहोत्रे लुप्येतेति नेत्याह न चैतावतेति। अत्र हेतुमाह उक्तमिति। प्रा
णाग्नोजनमात्रस्याविधानात्ग्रो जनप्रयुक्तत्वे प्राणाग्निहोत्रस्य भोजनाप्यभक्तो वद्दैरेवद्रव्या
श्रितत्वाद्भोजनप्रयुक्तत्वे किं न स्यादत आह न चैतद्दैशेति। मध्यात्सर्वे हविषो हविषो वप
त्पुनरोदाक्षास्विष्टकृते समवद्यतीति अप ते स्विष्टकृन्नाम देवता विशेषः तन्नाम्नायागश्च
म जीयते तत्र स्विष्टकृतं मुक्तना र्द्युक्तेजनायोः प्रयोजनः किं वाग्न्यादि प्रयुक्तेतो पुरुषोपा
जीवाति तं देहे ऋग्न्याद्यपस्यहविषोदेवतां तरावर द्ववात्स्विष्टकृद्यमन्यद्यविः कृता

वधेति प्राप्ते राद्धांतः ॥ कस्योत्तरार्द्धादिति नापेक्षत्वात्स्वचाक्ये वचनेन द्व्यनिर्देशादग्न्यादिप्रयुक्तस्यच
हविषः प्रकृतत्वात्तस्योत्तरार्द्धादित्यवगमादप्रयोजकः स्विष्टकृदन्यर्थस्यापिहविषो वचनादन्या
पित्वमविरुद्धमिति ॥ तद्वदप्रयोजकत्वे साग्न्यग्निहोत्रस्यतत्तस्य भोजनप्रयुक्तत्वमित्येतन्ना
स्तीत्यत्राहेतुमात एकदेशद्रव्यसाधनस्यापि इति एकदेशो द्रव्येसाधनेयस्ययागस्यतस्या
पि द्रव्यं प्रतिप्रयोजकत्वं स्यादित्यर्थः ॥ तत्रोदाहरणमाह पत्न्येति ॥ दर्शपूर्णमासयोराम्नायते
जाघन्यापत्नीः संयाजयंतीति ॥ पत्न्यो नाम देवताविशेषाः ॥ जघनः प्रदेशस्तद्वदन्तो मांस
खंडो जाघनी तत्रैकदेशद्रव्यत्वात्परप्रयुक्तकृतप्रयोजनाग्नीषोमीयपशुजाघनी प्रति
पत्निकर्मत्वात्पत्नीसंयाजानां प्रकरणोत्कर्षमाशंक्यास्तिदूषितिते दोषबलद्वारेणतं प्रकारमाह
नहिनामेति ॥ उक्तमग्निहोत्रसाधनेभक्ते भोजनेनागभक्ते ज्ञानेविनापि जाघनीवत्
ज्ञातुं शक्यमित्यर्थः ॥ दृष्टांतं साधयति ॥ तस्मादिति ॥ जाघन्यपेक्षेतावन्मात्रं अपेक्षते ननु प
शोरिति तस्मात्प्राणिमात्रस्य जाघनी पशुज्ञानेविनापिज्ञातुंशक्येत्यर्थः ॥ आग्नीषोमीयपा

कल्प
६४

न स पुत्रवत्वात्स्वरसपुत्रः प्रसुरग्नीषोमीयः तदुपजीवनं चेतरेषां जाघनी ज्ञाना तत्साध्य दर्शपौर्ण-
मासिकपत्नीसंयाजेष्वाज्येन सहजाघनीविकल्पस्तेन न तत्कृष्यते इत्यर्थः॥ हिंसायिन कार्यं स्याह
रवे ३ । ३ इति॥ मन्त्रोत एवेप्तदीति॥ तद्भोमीयमिति तच्छब्दार्थानभिज्ञत्वात् मन्यते ग्रहणं॥ न त्वेवं भक्ष-
स्यैव भोजनवर्हिर्मेतस्य स भवेत्कपर्मद्रिति प्रतिनिधिर्भोष्य ३ ज्ञोत स्वाहा द्विरिति॥ अग्नि-
होत्रादिनित्यकर्मसु श्रुतद्रव्यालाभे कर्मोत्सर्गे प्राप्ते नित्यानामनित्यानां च प्रारब्धानां
मवश्यकर्तव्यत्वाद्वगमात् श्रुतद्रव्यैः प्रतिनिहितैः श्रुतिप्रमाणस्य प्रयोगस्य विशिष्टत्वेन प्र
त्यभिज्ञानात्प्रतिनिधापापि कर्मकर्तव्यमिति विचक्षसि ङ्कृतितं॥ भाष्योदाहृतमप्यधिकरणं लि-
ख्यते संतप्यग्न्याधानेपवमानेष्टयः॥ अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपे-
दित्याद्याः तासु प्रकृते दर्शपूर्णमासादग्निहोत्रवत्तं हविर्विधिनिर्वपेदिति विहितो हविर्निर्वा-
पो निर्देशेन प्राप्नोति॥ आधानकाले चाग्निहोत्रस्याभावान्नाग्निहोत्रहवणीतत्वस्य हविष्ट्वेन
श्रतनिर्वापस्य यदन्त लोपप्राप्तौ दर्शनेष्टिसंकृतितं॥ गुणलोपे च मुख्यस्य विकल्पो हि कार्यस्तानप

लोप स्य

दार्थः प्राप्नुवंतीति तेन हविःसंस्कारार्थो निर्वापः प्रथमं प्राप्तः ॥ तद्द्वारेण च तदंगमग्निहोत्रहवण्यादावप्य
प्नोतीति ततो निरपेक्षा प्राप्तिः प्रधानभूतस्य निर्वापोंगत्वेपि कर्तव्य इति गुणलोपेपि मुख्यस्य प्रयोगः ॥
भक्त्येवेति भोजनांगमित्यर्थः ॥ ननु तथाप्युक्तमिति वाक्योक्तभक्तस्य तद्धोमीयमित्यत्र तद्धवे
नपरामर्शेपि न भोजनांगभक्तपरामर्शसिद्धिः ॥ तदुक्तमिति वाक्यस्यान्यार्थत्वादित्युक्तमन्यद्
निरस्यति पचेत्युक्तमित्यादिना ॥ विष्णुदेशगतस्येति विध्येकवाक्यतापन्नो ह्यग्निहोत्रशब्दो गौणः
सन्नकर्तव्यसादृश्यं पूर्वत्कं शक्नोः कर्तव्यापिविशेषणपरत्वादपिवादगतस्तु सिद्धमर्थं विशिंषन्नसिद्धमे
वसादृश्यं वक्तीत्यर्थः ॥ चरुस्थालवत्वाविति ॥ प्राजापत्यं चरुं निर्वपेच्छतकृष्णलमायुःकाम इति कृष्ण
ते कृष्णलो नाम परिमाणविशेषवान्सुवर्णसमहितः ॥ तत्रातिदेशप्राप्ताऽवघातादपोद्धारा भावेपि पा
नव कर्तव्याः ॥ अचरौ च चरुशब्दस्याग्निहोत्रशब्दवद्धर्मातिदेशकत्वादिति ग्राप्यं दशमे सिद्धांतितं ॥ वच
स्थालीपूपं येहितिस्त्रोतः पाको ह्यारभावेपि कर्तव्यः ॥ अत एव चरुशब्दोपि पाकयोगाद्भक्त्या लक्षसिद्ध
सादृश्यपरः ॥ सत्यां गतौ विधौ गौणत्वायोगात्तस्मान्नावघातादिप्राप्तिरिति ॥ सोयमतिदेशप्राप्ता

भास

कात्य.
६५

वघातादिना योगत्वभावात्स्वीक्रियते प्रवृत्ते भोजनार्थभक्तानुवादादग्निगतिरित्यर्थः॥ कामिन्यासि
द्धपुत्रुचवदनादितद्रस्तताचक्रवाकादिरूपेणसंपाद्यते रूप्यतइत्यर्थः॥ यदा चैवं भोजनार्थभक्ता
श्रितत्वं प्राणाग्निहोत्रस्य तच्छ्रद्धास्ति द्धृतादापूर्वीतिथिभ्योऽश्नीयादित्याद्यादरदर्शनं न भोजनका
लादपकृष्यकालांतरेऽग्निहोत्रविधिपरं किंतु यदा स्वामी भुंक्ते तदा भोजनस्यस्वकालादपकर्षेणतद्
श्रितप्राणाग्निहोत्रस्यापकर्षकमित्याह तद्भोजनपक्षइति यदा च प्रायस्यात्मकोधर्मः स तेषु भो
जने विहितस्तदाधर्मार्थापि प्राणाग्निहोत्रस्यत्वेव भोजनेस्यात्तथाचयाऽऽशक्तिर्द्धर्मलोपेनसहते सा
नतरोधर्मलोपंसहेतेत्येतन्निरस्तं॥ अनित्यत्वेपितदुपपन्नेरित्याह यत्किंत्वपक्षइति॥ ननु स्वामि
भोजनस्यस्वकालादपकर्षेण वनपुत्रः शास्त्रांतरविरोधादतः प्राणाग्निहोत्रस्यैव भोजनकालादप
कर्षइत्याशंक्यपरिहरति नन्वित्यादिना॥ तन्नि[illegible]करणफले॥ अनित्यभोजनाश्रितप्राणाग्नि
होत्रवन्नित्यकर्मांगाश्रितोपासनानांनित्यत्वमितिपूर्वपक्षमाहयथेत्यादिना॥ कर्मांगाश्रितस्या
पि गोदोहनवदनित्यत्वमाशंक्यानारभ्याधीतत्वादुपासनानां वाक्यात्तत्रुक्तंबंधाएवमित्याशंकिनपत्त

अनित्याश्रितस्यानित्यवर॥

संबंध इति वक्तुं पर्णमयीतामुदाहरति यस्येति ॥ ननु साक्षात्फलत्वसंभवे किमिति क्रतुप्रवेशात्फ-
लवत्त्वमत आह सिद्धवर्त्तमानेति ॥ रात्रिसत्रे त्वगत्या विपरिणाम इत्युक्तिः कर्मगतत्वं गतिरित्यर्थः ॥
समस्तकामावाप्तृत्वलक्षणेति आपयिता ह वै कामानां भवतीत्येतदित्यर्थः। पूर्वपक्षे प्रयोजनमुपा-
सनानां नित्यत्वमित्याह एवं चेति। चतुर्थपक्षे पठितं ॥ द्रव्यसंस्कारेति। यस्य पर्णमयी जुहूर्भवति न स पा-
पं श्लोकं शृणोति इत्यानारभ्याधीतं निदुव्ये फलमध्यापते। ज्योतिष्टोमप्रकरणे तु संस्कारे फलश्रुतिः यदं-
क्ते अञ्जनं करोतीति चक्षुरेव भ्रातृव्यस्य वृंक्ते इति। कर्मणि च फले श्रूयते यथा प्रयाजानुयाजा इज्यन्ते वर्म
वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य भ्रातृव्याभिभूत्यै इति तत्र संशयः किमिमे फलविधयः उत त-
त्प्रकारकत्वेन व्यवहितादिषु फलार्थवाद इति। तत्र खादिरं वीर्यकामस्य यूपं कुर्यादित्यादिवत्फलविधयः
त्प्रकारकत्वेनाव्यवहितफलोपादानाच्चरम व्यवहितस्यापि फलस्य साध्यत्वविपरिणाम इति फल-
विधित्वे मासेनाग्नितः परीतो दाहहरणमाश्रित्य चार्थेन प्रवृत्तेषु कं परीताग्निमित्यादिना ॥ तत्रैतावत्
सर्वोदाहरणशेषत्वेन च कर्तव्यं रात्रिसत्रेणागत्या विपरिणामस्त्वाश्रितः। इह तु नैतत्प्रकारस्यासंभ-

कल्प.

३६

त्वान्नविपरिणामइति ॥ पर्णताकिंसाक्षात्फलसाधनमुतक्रियाद्वारमाश्रित्यनापइत्याहनहीति ॥ उत्पत्ति
मत इति ॥ साक्षादनुत्पत्तिः क्रियापाइति ॥ क्रियात इत्यर्थः ॥ यत्तु पूर्वपक्ष उक्तं खादिरतावत्पर्णतायाः फले विधि
रिति तन्निरस्यन्नाह तीयं प्रत्याहनापीति खादिरतायां यथा प्रदत्तकत्वं तु संबंधाबाधकरूपः आश्रय एवं तदाश्र २
यत्नस्याः पर्णतायाः आश्रयः प्रकृतो नास्ति तस्मादनारभ्याधीतत्वादित्यर्थः ॥ खादिरतायाः प्रत्य
क्षविधिश्रवणात्साक्षात्कामपदप्रयुक्तफलश्रवणं च युक्तः फले विधिरित्यपि द्रष्टव्यं ॥ अन्ये त्वव्यभि
चारात्क्रियाणां फलसाधनत्वेन प्रधानकर्मत्वमुक्तं तद्व्याप्तिपतिनन्विति ॥ अंतारस्येत्युक्तमि
ति व्याप्तेश्च समंजसमित्यत्रेत्यर्थः ॥ न चानुपयोगमीप्सितमिति ॥ अन्यार्थे विनियुक्तं द्रव्यं फल
वत्त्वादीप्सितं न संस्कार्यं न तेन कारकमनुपयुक्तत्वादित्यर्थः ॥ यात्तु कर्मांगे ष्वपि द्वितीया लोके पुपं न
विध्वंसामेपाप्सीतेत्यादा ॥ सासमन्वयेत्यादितादिमतय इत्यत्र वक्ष्यते ॥ अत्र भाष्यं ॥ न चेदं फलश्र
वणमर्थवादमात्रं युक्तं प्रतिपत्तुं तथा हि गुणवादश्चापद्येत फलोपदेशेषु मुख्यवादोपपत्तिरितीत
नुपपन्नमिव ॥ वर्तमानापदेशत्वेनोपासनफलेषु साध्यत्वविपरिणामात्फलेलक्षणाश्रयणादित

कल्प.

४८ इहतु मनस्त्रिंददीनां कर्मांगत्वे नैव प्रयोगत्वमाशंकते लिंगविरोधे दुर्बलेन प्रकरणेन पर्वोपस्था
नुपपानमाशंस्याहतत्रय प्यपीत्यादिना स्वातंत्र्येण प्रमाणांतरानपेक्षया मनस्त्रिंदादीनां न स्वातं
त्र्यमापकालीत्यर्थः॥ ननु स्वातंत्र्येण प्रयोगस्य विनियोजकं लिंगं यथा शब्दार्थयोः सामर्थ्यमित्य
प्राकप्रकृतालिंगस्यतंतो वेषम्पन्नित्याह नचेत्यादिना॥ लिंगं हि द्विविधं सामर्थ्यरूपम पि.अर्थवाद गं
न्यापिदर्शनं चेति॥ सामर्थ्यं द्विविधं शब्दगतमर्थगतं च शब्दगतमुदाहरति यथा प्रथेति प्रथो हे
देनपन्प्रथेत्यादि मंत्रः॥ अर्थगतमुदाहरति यथा चेति॥ तयेत्यत्र गंधछेदः॥ विरोधं दि वि
रोधकंदिशिस्रितिवाक्यास्यो मदर्णविरोधमाशंक्याह न चेते हेत इत्यादिना॥ पूर्वते त्रयस्त्रिंशन्मान
स्य महाधिकरणमुदाहरति ऽस्याह इत्यादिना॥ वोंस मुद्ध मनयारसया पृथिव्या पात्रेण समा
पतिदेवताकं मन्त्रोऽग्नेहे ध्यानमस्य परमात्मा पाप्यगन्हाभीत्यर्थः॥ निर्दुत्तानिति निरतंशमहालिता
निष्क्रांत एव गतेरसाविरसबत्तापारक्कसहकाश्मिन्त्वेन द्वाहशाहस्यन्त्रयमाणत्वादित्यर्थः॥
पत्नीसंयाजांतान्यहानि संतिष्ठंत इति वचनाद्द्वादशाहांतर्गतानामहां पत्नीसंयाजांतत्वं॥

योगे याज्यानुवाक्या त्वविरोधादित्याह याज्यानुवाक्याव्यात्यासेति ॥ अध्वर्युरेण यजेतेति प्रैषे देवता प्रयुज्य
माना ऋग्याज्यानुवाक्या जुहोति प्रैषानंतरं प्रयुज्यमानानुवाक्यायाज्ये काहि अस्यामि प्रयोगे युगपद्वहनं कुर्वं
तित द्विधा पतेः सर्वेषामभिगमयन्नवद्यतीति तत्र हेतुरछे वषट्कारमिति ॥ अव्यापित्वापेत्यर्थः एकार्थस्य
वत्वे शेषोपागानहि स्याद्युगपत्त्ववीपिम व दानेनत्वग्यपि त्वेस्यादिति ॥ तथा विधस्यैवेति वात्यस्तयाज्या
नुवाक्याकस्य प्रयोगभेदे मंत्रदेरणानुपपद्यमानस्यापि विहितत्वादित्यर्थः ॥ प्राणपादिति ॥ प्राणेन प्राणे
ऽपान्यादपानेन प्राणे प्राणेत्स्प्राणापानादिनिरोधं कुर्यादित्यर्थः । महात्मनोग्न्यादीन्महात्मन
इतिविहितीपाबहुवचनं चतुरः चत्वारः संख्यानग्निसूर्यौ दक्वं दूशन न्योगाश्रु नीक्षुद्दुः श्रोत्रमनोत्व
हेणनर्पानकः प्रजापतिः प्राणात्मकः सजगारंगीरीवान्नतेनव्रतेनउ इत्यर्थेनिपातोऽप्यर्थः ॥
स च स्वायुज्यं सलोकतामपीत्युपरि संबध्यते ॥ एतस्यैर तस्मा देवतायास्सायुज्यं समानदेहतां स
लोकं समानलोकतां च जयति प्राप्नोतीत्यर्थः ॥ सायुज्यमुत्कृष्टोपास्तिफलं सालोक्यं मंदोपा
सनायाः ॥ लिंगमयस्त्वादपि ॥ एवं त्रेत्वप्रयोगासंभवात्सायुज्यमाल्लोप प्रयोगभेदेनध्ये पानित्यत्त्वं

वाजसनेयके प्याख्ति एकमेवव्रतं चरेद्दिति । तयोपक्रमोपसंहारेति ॥ अपेममेव नाम्नोन्नरतु
र्यपमध्यमः प्राण इत्युपक्रम्य प्राणाद्वा एष उदेतीत्युपसंहार इति । यदुक्तं मध्यात्मादिविभा
गस्योत्पन्नशिष्टत्वान्न विद्याभेदकत्वमिति सत्वं न विद्याभेदकृत्त्वमः । किं त्वेकस्या एव विद्यायाः ध्येयमे
दात्प्रयोगभेदं यथाग्निहोत्रभेदप्युत्पन्नशिष्टैर्दध्यादिभिः क्रियमाणः प्रयोगा भिद्यंते एवमि
हेत्याहाग्निहोत्रवदेवेति ॥ अग्निहोत्रस्य दध्यादिवद्ध्यानस्यद्वतेज आध्यानार्थमयं दृष्टा
गुपदेशाद्गुणतयोजना । इवकारोऽधर्मिण उपमार्थो । वकारोऽधर्मस्य ॥ यथोर्यथापि परिच्छिन्नत्वं
तथाप्यग्न्यादीनपेक्ष्याऽपरिच्छिन्नत्वमाकाशकारणत्वेन ततोऽपि बहुकालव्यापित्वात् ॥ अतो
ध्येयत्वं वा ध्यानेत्पमुपपन्नमित्याह वायुः खल्विति ॥ संवर्ग एते संहरति । देवता को आध्यात्मिकरण
स्यप्रदानभेदविषयस्यपूर्वपक्षं सिद्धान्ते चाहस्मिलिता नामित्यादिना । त्रिपुरोडाशो होहि
प्रथमपुरोडाशप्रदाने याज्या सा पुनः प्रयोजेनुवाक्या या च पूर्वमनुवाक्या पश्चाद्याज्या
भवतीति व्यत्यासमत्वाहेत्यनेनाभिहितं तत्प्रयोगभेदे घटते एकस्याश्च एतस्मिन्न

एतत्प्रसङ्गमध्ये करणं

इवः सूत्रार्थः

आह ॥ अर्थवादमात्रत्व इति वर्त्तमानापदेशाद्धि परिणाममंतरेण फलासिद्धौ विरोधमाह ॥ अन्यत्रैवं ॥ प्रको
त्कर्षी नाम फलत्वं यत्स्वरूपमेकोउपारोप्येनोक्तं तदिहापि स्वीकृतं तत्र वर्त्तमानापदेशस्य फलपरत्वे सति नफलं
निर्वाहमिति भावः ॥ तेनोंकारेण मानसिकर्मकुर्वतः पश्चैतदक्षरस्यैव मात्रादिगुणकं वेदपश्चन वेद
हेहि हरीतकी भक्षयतीत्यादिवत्तदेतरयोर्विरेचनफलमिति पूर्वपक्षेपित्वासिद्धोनमाह नाना
त्विति ॥ वाक्यैरोंकारमात्रज्ञानादारभ्यादिमहोंकारविज्ञानेनानेवान्यैर्ततोऽन्याधिक्यात्फ
लाधिक्यं पुरुषेछेहि मतिविज्ञप्येवगणेन शाबरयोक्ता नाज्ञानवतः फलभेदः ॥ तस्माद्यदेव कर्म
विद्यायोऽङ्गीपादिविषयपास्य ऋचाज्ञिकाभुध्याउपनिषदा तत्तदेवताध्यानेनकरोतितदेव कर्म
वीर्यवत्तरं भवति ॥ प्रदानवदेव तदुक्तं ॥ पूर्वत्र फलभेदात्कर्मीग्यानात्तदूपासनानां च
नित्यानित्यत्वरूपः प्रयोगभेदउक्तो इहतु वायुप्राणयोस्तत्वाभेदात्तत्वाभिलाषणफले कार्ते
पासनप्रयोगैक्यमित्यभिप्रेत्य पूर्वपक्षमाह तदिति ॥ उत्पन्नेति ॥ उत्पन्नया उपासनया गुण
नां संयोग इत्यर्थः ॥ संवर्गविद्यायां स्थिना वानन्नादो भवति य एवं वेदेति विधिः प्रयुज्यतेत्रिरक्ति ॥

क्वतिरप्य स्तीति प्राप्तिस्त्यादि देशेनापि भवतीत्यर्थः २

नावयुत्य एकदेशे विभज्य देवदत्तस्यांगिनो दीर्घैः केशैः स्तुतिः॥ ननु विसर्गे शब्दस्य समाप्ति एव वनता
तपसंगत्वबोधकत्वमतआह कृतइति॥ अत्यंतं बले नेत्रप्रदर्शनापि मेततएतच्छ्रुतिबलेनापि भा
व्यमुपपन्नं॥ दशरात्रस्य द्वादशाहविकृतित्वाज्ञमेणाह धर्मेषु अतिदेशप्राप्तेषु दशरात्रगतद्वमासात्वपि
द्वादशाहोतवीर्हिदशमाहदेगायस्य प्राप्तेरिति॥ विविधानि वाक्यानि यत्र नसंतिमानसत्वात्दविवाक्य
मितिनामपिः॥ वचनानि विविति॥ ज्योतिष्टोमप्रकरणाभिधानादिप्रत्रानुक्रांतं॥ ननु फलार्थस्यापि क्रत्वंगा
सा श्रितत्वादेवप्रयोगत्वे दृष्टमित्याशंक्याह नैमित्ति॥ मनेनोक्तत्वेषुग्निवदर्शविधेरित्यर्थः॥ पञ्चत्रिंशत्स
हस्राएणात्मनो वृत्तीरग्नीन परपन्नान इति हि स्मृति स्थिति॥ ननु निपातानां चादीनामन्यतः प्रा
मार्ण्याद्योतकत्वं दृष्टस्ते एवमेव कारणस्यापीत्याशंक्याह नवैवमिति॥ क्रियानुप्रवेशमात्रमर्थं प्रति
रो विवक्षितं तन्त्र चहूक्षितं सत्यपि विकल्पे ब्रूयात् नाहि सदूष्यत इत्याह तदन्तुल्यकार्यत्वेनेति॥ दृष्ट
श्चेति सोत्र पदस्त्वेचित द्वितीयगतमेवष्टाधिकरणमनुक्रामति अस्मीत्यादिना॥ बार्हस्प
त्यंचरुं माग्नेयैंद्रपुरोडाशयोर्मध्ये निधायेत्यर्थः॥ यदि ब्राह्मणस्याद्यपत्त्रपोऽप्यवेष्ठ्यामन्यतःप्रा

कल्प
६८

अप्राप्तौ तु तत्कल्पा ॥ टी० अप्रसिद्धप्रकारमाह अर्थवदित्यादिना । यदि ह्यत्र राज्यकर्तृत्वं तर्हि त्रैवर्णिकानां
मास्तु हि त्रयाणां वर्णानां राज्यकर्तृत्वाद्राजसूये चाप्राप्तत्वेन तदंगावेष्ट्यावपि प्राप्तेर्निमित्तार्थत्वं य
दि व्यालक्षण इत्यादेरित्यर्थः ॥ अप्रसिद्धप्रकारमाहापूर्वेति ॥ पिकनेमेति ॥ येषां शब्दानामार्येषु न प्रसि
द्धोऽर्थः पिकनेमतामरसादीनां तेषां किं निगमादिभ्योऽर्थः कल्पनीय उत म्लेच्छप्रसिद्ध एव ग्राह्य इति संदेहे
शास्त्रस्थत्वान्निगमादिप्रसिद्ध एव ग्राह्यो म्लेच्छप्रसिद्धेरप्रामाण्यमप्रतिपन्नो विकल्पवत्प्रसंगादि
ति प्राप्ते समुदायप्रसिद्धेरवयवप्रसिद्धितो बलवत्त्वात् पिकादीनि पदानि यद्रूपाण्येव वेदे दृश्यंते
तद्रूपाण्येव तेषां म्लेच्छैरर्थविशेषेषु प्रयुज्यमानत्वात् संबंधे च पदानां बाधाभावा
द्विस्तुतिशंकानुत्पानान्म्लेच्छप्रसिद्ध एवार्थो ग्राह्यः । पिकः कोकिलः नेमोऽर्द्धः तामरसं पद्ममि
ति प्रमाणलक्षणे स्थितम् । एवं च म्लेच्छप्रसिद्धेः पिकादिशब्दार्थावधारणे कारणं एवमांध्राणां
म्लेच्छानामेव क्षत्रियजातौ राजशब्दप्रसिद्धिः राजशब्दार्थावधारणे कारणमित्यर्थः ॥ एवं सं
देहे मध्यस्थपक्षमाह नैमित्तिको नीत्यादिना ॥ राज्यकर्तृमात्रे राजशब्दं म्लेच्छैरप्रयु
ज्यते इत्यविवादे राज्यमकुर्वति क्षत्रियजातिमात्रे आर्यैः राजशब्दं न प्रयुज्यते म्लेच्छैस्तु प्रयु
राज्यकर्तृत्वाद्राजसूये चाप्राप्तत्वात् तदंगावेष्ट्यामपि प्राप्तेर्निमित्तार्थत्वं ॥ १

पिकं कोकिलं नेमर्द्धं तामरस
मा पद्मकाभावः

वि
त्तत इति प्रतिपत्तिः तत्राविप्रतिपत्तिस्थले विरोधाभावात् राज्यस्य कर्त्ता राजेति त्रैवर्णिकानां राजत्वादेवेष्टो
प्राप्तिः ॥ प्राप्ते च सत्यां निमित्तार्पितं यदि ब्राह्मणएइत्यादेः स्यादित्याह राज्यस्य कर्त्तेत्यारभ्य तेनाविप्रतिपत्तेरि
त्यंतेन । यान्तु ह्यातिरिक्तक्षत्रियमात्रे राजशब्दप्रयोगे म्लेच्छानामार्यैः सह विप्रतिपत्तिः तत्र शास्त्रस्थं
स्मृतास्यर्थप्रसिध्यात तद्विहीनम्लेच्छप्रसिद्धित्वान्न जातिमात्रे राजशब्दार्थः किंतु राज्यकर्त्तैवात
तस्य निमित्तार्पितत्वं स्यस्यामित्याह विप्रतिपत्ताविति ॥ यववराहवदिति । एवमयमत्र भवति वा
राहीउपानहावित्यत्र यववराहशब्दयोर्म्लेच्छैः प्रियंगुवायसयोः प्रयोगाद् दीर्घशूककरयोः वैद्य
प्रयोगादुभयोरप्रयोगयोरनादित्वेन तुल्यबलत्वात् विकल्पेनाभिधानं प्राप्तं । तदुक्तं प्र
माणलक्षणे समाविप्रतिपत्तिस्यादिति अभिधानविप्रतिपत्तिस्तुल्ये तर्थे ॥ सिद्धांतस्तु शा
स्त्रस्थावात तन्निमित्तत्वात् । एवमयमत्यस्य हित्वा अशेषे पद्मानाउषधयो म्लायंत्यथैते मो
दमाना इवातिष्ठंतीति श्रूयते यवाश्च न्योषधिम्लानौ मोदते न प्रियंगवः ॥ उक्तं हि ॥ फाल्गुनेन्यौ
षधीनां हि जायते पत्रशातनं । मोदमाना स्तु तिष्ठंति यवाः कणिशशालिनः ॥ प्रियंगवः शरत्प

कल्प.
८.

लाः तावदुञ्छन्ति हि द्वयं।। यदा वर्षास्तु मोदंते ते सम्प्रजाताः प्रियंगवः तदा नान्यौषधिम्लानिः सर्वासा
मेव मोदनादिति।। वाराही उपानहौ इत्यस्य च वाक्यशेषे वराहं गावोनुधावंतीति श्रूयते स्तद्वर
च गावोनुधावंतीति न काके तस्माद्यव वलवराहयोर्दीर्घशूककरावर्षाविति।। ननु म्लेछप्रसिद्धिमा शूक
त्रेण क्षत्रियजातौ राजशब्दार्थ इति न भ्रमः। किं तु गुणवचनब्राह्मणादिभ्यः कर्मणि चेति पाणि
निना गुणवचनेभ्यः शुक्लादिशब्देभ्यो ब्राह्मणादिशब्देभ्यश्च ष्यञ्प्रत्ययस्मरणाद्राज्ञः कर्म रा
ज्यमिति सिद्धमिति ततश्च क्षत्रियो राजेत्यप्राप्तिब्राह्मणादीनां राजत्वस्येति सिद्धांतिमतमा
शंक्याह पूर्ववादी बलवदार्येति।। प्रयोगमूला हि पाणिनिस्मृतिरार्यप्रयोगविरोधे चात
न्मूला म्लेछप्रयोगमूला स्यात्।। अतो मूलवाध्येन वाध्येत्यर्थः।। नखवन्नकुलादिवदिति खं
न भवतीति इति नखं कुलं न भवतीति नकुलमित्यत्र रूढावेवशब्दे यथाव्युत्पाद्येते।। एवं राज
शब्द इत्यर्थः। पाणिनिर्हि नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्र
नाकेषु प्रकृत्येति नखादिशब्दानां नञ्समासमंगीकृत्य नलोपाभावसिद्ध्यर्थमकारि

भावं सस्मार॥ यदुक्तं यववराहादिशब्देष्विव राजशब्देपि क्षत्रियमात्रविषयत्वं गौरवान्म्लेच्छप्रसिद्धिर्नार्यप्रसिद्ध्या
बाध्येति॥ तत्राह रूपत इति॥ अनादिरूढ्यव्यवहाररूढत्वादर्यम्लेच्छप्रयोगयोः स्वरूपतस्तावन्न विशेषोस्ति
यवादिशब्देषु वैदिकवाक्यशेषानुगृहीतार्यप्रसिद्धेर्बलवत्त्वमुक्तं राजशब्दे त्वार्यप्रसिद्धेः नास्ति वेदानु
ग्रह इति द्वयोः प्रसिद्ध्योरविशेष इत्यर्थः॥ एवमविशेषमुक्त्वा म्लेच्छप्रसिद्धेः राजशब्दविषये विशेषमा
ह वैदिकवाक्यशेषवदिति प्रयोगो हि नानादेशेषु नानापुरुषैर्विरच्यते इति कथं भवद्भिर्लव॥ स्मृतिस्तु
शिष्टपरिगृहीता व्यवस्थिता इ तस्मात्तदनुगृहीतम्लेच्छप्रयोगस्यार्यप्रयोगात् बलीयानित्यर्थः॥ उक्तं हि॥ स्मा
चारयोर्विरोधेन त्वंदेहे सति निर्णयः॥ सन्निबंधनया स्मृत्या बलीयस्त्वाद्बाध्यते इति॥ अनादीति॥ बाध्यते
मूलत्वेत्यर्थः॥ गोगाव्यादीति॥ गावीशब्दो विशक्त्या प्रयुक्तो न गोशब्दस्य गोणत्वमापादयत्येवं इहापी
त्यर्थः॥ तर्हि राज्यकर्तरि राजशब्दप्रयोगः सर्वथा त्याज्यः नेत्याह तस्मादिति॥ तदेवं यथा क्षत्रियकर्तृ
के राजसूये ब्राह्मणादेरनधिकारादवेष्टेः प्रकरणादुत्कर्षः एवं मनुष्यादीनामपि क्रियाप्रकरणे
ल्लिंगादिभिरुत्कर्ष इत्याह क्षत्रियस्यैवाधिकारादिति॥ ननु ब्राह्मणादिवाक्यानामसमासबालिंगादि

यजेताभिघारयेच्चेत

माधकत्वे यदि शब्दविरोध उक्त इति ॥ तत्राह ॥ अन्वयानुरोधीति ॥ अन्वयः प्राप्तिः । यदिशब्दो हि निपातः नि
पातास्त्वोपसर्गाः प्राप्तिमपेक्षन्ते । अप्राप्ते चार्थे वाक्याउम्यमानेयदिशब्दो मे जनीयइत्यर्थः । तद्धेतुः श्र
द्धा वार्थः । यदिशब्दपरित्यागे उच्यध्याहारकल्पना । व्यवधानेन संबंधो हेतुहेतुमतो र्लिङि उपसर्गाः
ति हेतुः । यदि शेचयेत फलं मे स्यादिति । तर्हि ब्राह्मणो यजेतेतिरच्यध्याहारकल्पनात्न विधित्व
हानिरित्यर्थः । व्यवधानेन संबंध इति ॥ यदि वा हिंस्यत्यमध्येनिष्पाद्यहुतिमाहुतिं हुत्वाभिघार
येदभिघारयितुमिच्छेदितिकाम प्रवदने लिङ् । अपीत्नुविधिरेकस्मिन्वाक्ये विधिद्वयायोगात्त न विध्यौ
र्हि ब्राह्मणो यजेतेति विधिरेवेत्यर्थः । हेतुहेतुमतोरिति यदि ब्राह्मणो यजमानआहुत्यभिघारणे
हेतुस्तदाहुत्यभिघारणमेवं कर्तव्यमित्यर्थः ॥ अत्रैको लिङ् हेतुमत्येकः परो विध्यौ । तत्राप्येकस्य
विधिरन्याद परस्यास्त्रौ तदिति । नन्विदमधिकरणमनारंभणीयं फलाभावात् अवेष्टि प्रक
त्ये तयान्नाद्यकामं याजयेदिति एषगत्यधिकारश्रवणात्त्रयाणां वर्णानामवेष्ट्यधिकारस्मिन्नो
यदि ब्राह्मणइत्यादेर्निमित्तार्थता यादृशी रत्वादतआह इयं चेति ॥ ननु राजा राजसूयेन स्वा

राज्यकामो यजेतेति वाक्ये राजपदं कर्तृसमर्पकं। स्वाराज्यकाम इत्यादौ स्वपदेन तस्यावर्तकत्वेनाप्यभेदप्रसंगात्त
पा च प्रकृतयागमात्रे राजविधेरत्राप्यकामाधिकारेपि राजपदानुवर्त्तेनैव क्षत्रियादीनामप्राप्तत्वेन निमि
त्तापि वा संभवात्कथं कृत्वा चिंतास्थिता नैतत्कर्मण्यधिकारवाक्यांतरगतं राजपदमधिकारवाक्यांतरे राजा
नं विधातुं समर्थमुच्येत राजकर्तृकमध्वरस्याप्याम्नानावदवशेषे राजकर्तृकत्वासिद्धमेव सत्वेत्यपास्यामे
वेः परमपूर्वेनिष्फले विधानादधिकारांतरेपि राजकर्तृकत्वोपिल्लाभ इति तदपि न। उत्पन्नमात्रे हि कर्म
फले विधेयं तेनांगविशिष्टं अंगविशिष्टस्य फलसंबंधेंगानां फलवदंगभावाभावप्रसंगात्। तस्मा
त्स्मृतेरेकत्वाच्चिंतेति ॥ ननु भाष्यकारैरेकादशेगतमधिकरणमुदाहृतं ॥ टीकाकृता हु तौ यंतत्र को
ऽभिप्रायस्तत्त्वबद्ध्या मन्यन्ते धर्मैकादशाधिकरणमनुक्रमेपि तोऽत्र बहवो लेखकैस्तं ओस्या ॥ लिंगदर्शना
त्॥ राजसूये वैश्यराजापते आग्नेयोष्टाकपालो हिरण्यं दक्षिणा बार्हस्पत्यश्चरुः शितिपृष्ठो
म्यूतरक्षत्र म् दक्षिणेति तत्राग्नेय्यादिहविषामंगानां तत्रेणप्रयोग उत्कर्षेणेति संशयः। तत्र बार्हस्पत्यं मध्ये नि
धायेति लिंगदर्शनात्प्रयोगभेदे च मध्यनिधानासंभवादेतत्याप्यकामस्मितेषकवचना

ए तपात जमतयमव
धातुपद

कौ॰
७२

द्वैकं तत्र्यं ॥ एकस्मिन्प्रयोगे गानानां तंत्रेणाभावः सकृदनुष्ठानमिति पूर्वपक्षे कल्पनाराद्धांतितं अन्वयकामप्र
योगेऽवेक्षरिदं लिंगं दृष्टं मनसादिनं नाक्तवृद्यप्रयोगे तस्य तु दृष्टिद्योपाये दोहे द इत्यंगा वृत्तिरेव तत्र कौत्वर्षा
याम वे षेो इदं लिंगं दर्शनादिक मि त्याशंको निरासार्थं ऋत्वर्थीयामिति चेदिति सत्रे कामप्रायां प्रदिश्या
सा एतद्दुत्पादिना वर्णमात्र संयोगमात्रस्यैव मध्यानिधानादिप्रतीतेर्नरार्थमात्र कार्त्वर्थकौत्वर्थ्ये त
त्प्रासिद्धित्वर्थः ॥ तत्र वर्णसंयोगादिहेतोः कौत्वर्थ्यवपि गतत्वेन विरुद्धमांश्चतत्संहितारार्थी
द्भुवतीयाधिकरणानुक्रमणमिति ॥ एकप्रयोगत्वलिंगस्य कौत्वर्थ्यवपिगतत्वेन विरुद्धमा
शंकातत्संहितारार्थीद्भुतीयाधिकरणानुक्रमणमिति ॥ एकप्रयोगत्वलिंगस्य कौत्वर्थ्येपि भावसंभ
वे काम्येप्येव संभवेव दर्शनातेन सत्त्रेण काम्येऽपि कौत्वर्थ्ये वैलक्षण्यपक्षे च न हि एकत्र धात्वर्थ
दृष्टो त्वर्षौ पिगमितइति भाष्यकारस्येव तत्रोदाहरणं नासंगतं ॥ पुरुषायुषस्याहानि षट्
त्रिंशत्सहस्राणि तेर वर्त्तिरान्नामनो वत्सरः प्रत्याहोरात्रमेकैका भत्वा षट्त्रिंशत्सहस्राणि भ
वंति ॥ तावत्संख्याकेष्टकासमयाग्नित्वेन संपाद्यंते षट्त्रिंशतं सहस्राणीत्यादिनाऽऽम्नानं

एवात्मनः संवेद्यमानता नग्नी नर्की न्वर्ग्यव्यत्यये ना च्यो न्यत्र्यान परस्परद्रितत्यर्थः । मनसा चीयंत इति मनसि चि
तः सुखवाक्प्रत्ययरूपः । एवं वागादिरूपा वागादिभिश्चीयमानत्वात् वागादिचितः प्राणश्चादेन घ्राणमुक्त
मिंद्रियाधिकारात् कर्मशब्देन वा गतिरिक्ता निकर्मेंद्रियाणि प्रतीद्धि पत्रर्त्ते सैवैकमग्निचयनं संपाद्यमा
एव भाष्यं प्रपणग्नीनिति तेषामेवाग्नीनामेव साक्षतिः पत्वांकत्वमात्रमित्यर्थः । ग्रहणसादने ता
दि भाष्यं तत्र ग्रहणं सोमस्य मात्रे उपादनं । आसादनं स्थापनं हवनानंतरं हुतशेषोपादनमाहर
णं प्रस्तावः लिङ्गोभक्षणार्थमन्योन्यमनुज्ञा करणमुपहूानं ते अग्नयो मनसैव आधीयंत आहि
ताः अचीयंत चिताः । एषामग्निषु ग्रहा अमहं वितो गृहीताः आस्तुवतास्तो त्रं कत वेत उक्तवारः । अशं
सत् शंसनं कृतवंतो होतारः ॥ किं बहुना याकं चित यज्ञे कर्मक्रियते आरादुपकारकं यज्ञ यज्ञीयं
ज्ञानिष्यत्वर्थ त्वेन यज्ञार्थं हिंसन्निपत्योपकारकमित्यर्थः । तन्मनसैव क्रियते तत्तस्मित्यर्थः । यो
ग्निश्चितः । सोयमेव लोक इति चितेग्नेः पृथिवीदृष्टिर्विधीयते ॥ एको भावात ॥ प्रमाणलक्षणोप
योगितयेति ॥ यद्वा प्रधीयजमानः स्वर्गल्लोके याती ति वा स्मस्ये देहातिरिक्तात्मा भावात् प्रामाण्यमा

तत्व.
६४

त्रौतत्वपरिहारेण प्रथमाध्यायोपयोगितयेत्यर्थः। अत एवेति भाष्यगतातः शब्दे प्रसरयतिपत इहेति॥ व
हूयतीति भविष्यत्प्रयोगः पूर्वकाण्डापेक्षः इतः पूर्वकाण्डेन यन्नमपकर्षितस्योद्धारेण निवृत्तिः इत्यर्थः।
मनस्विदादीनां पुरुषार्थत्वमनुपपन्नं देहव्यतिरिक्तस्यात्मनोऽभावादित्याक्षेपलक्षण
पूर्वाधिकरणसंगतिः मत्वा माहेत्याह पूर्वाधिकरणेति॥ ननु न भूतानामेवैकस्य चैतन्यमुप
लभ्यते घटादेरशब्दनात नापि मिलितानां बहुत्वेन भक्त्वाऽप्रसिद्धेति वायुसमाध्यातेषु मिलि
तानां एकं भूतहितेषु भूतचतुष्टयमेलनेऽपि चैतन्यानुपलम्भात् तेषु भूतसंघाते शरीरेऽपि चैतन्य
संभावनाऽतः पूर्वपक्षाभाव इत्याशंक्याह यद्यपि समस्तेति॥ देहो न चेतनः भूतत्वाद्घटवदित्यनु
मानस्य च प्रत्यक्षबाध्यं वस्तु त्वहमिति चानुभव इत्यादिना। अत एवाबाधितविषये पक्षेतरस्या
प्युपाधित्वाद्देहत्वमुपाधिरन्नीयत इत्यर्थः॥ तथाविधोदाहरणेन प्रतिवंदीलक्षणेन प्रतिकू
लतर्कपराहतिं चानुमानस्य दर्शयति। न हीति॥ किं एवं नाम मदिराकारणभवद्व्यविशेषः॥
परिसमस्तव्यक्तविकलेन देहस्य चैतन्यमपहूयेत तर्हि मदिरायां मदकरणत्वमनुतं स्यादि

त्पर्यः॥ नन्वहमिति प्रत्यये देहाश्रितत्वमात्माभासते ततः कथं देहाचेतनस्यत्वेनुमानस्य प्रत्यक्षे
बाधकत्वादाह नत्विति॥ स देहोधिष्ठानमात्रेयो यस्मात्तदधिष्ठानः कुंडइवरक्षीतिवैधर्म्य
दृष्टांतः॥ यथा कुंडे दध्याद्याश्रितं तद्व्यतिरिक्तं प्रतीयते नैवमात्मा देहाश्रितोहमिति प्रतीयत इ
त्यर्थः॥ अत्र हेतुमाह अत एवेति॥ यत एव देहव्यतिरिक्तत्वात्माहमनुभवेन प्रतीयतेऽत एव
वाहमर्थस्य देहधर्मैः स्थौल्यादिभिरहं स्थूलो गच्छामीत्यादि रूपेण सामानाधिकरण्यप्र
तीतिः॥ न ह्याश्रितस्य वस्तुन आश्रयधर्मैः सामानाधिकरण्यं संभवति॥ तस्माद्देहधर्मैः सामानाधिकरण्यानुभ
वादहं प्रत्ययविषयस्यात्मनो देह एवात्मेत्यर्थः॥ यद्वा देहव्यतिरिक्तत्वमवादिनोच्यते देहाश्रि
तात्मगता एव ज्ञानादयस्त्वात्मनि भात देहतादात्म्येन प्रतीयते हं पश्यामीत्यादिव्यवहारस्त
म यद्दिति तदयुक्तमित्याह न जात्विति॥ यथा दध्यादि सामानाधिकरण्यानिर्द्धा तादात्म्य
प्रतीतियोग्यानि रोताकेनिर्द्ध्याश्रितकुंडेकाधिकरण्यं तादात्म्यं नानुभवति एवमात्मा
श्रिताः ज्ञानादयो न देहतादात्म्येन प्रतीयेरन् यदि देहस्थात्मानं प्रत्याश्रयः प्रतीयते च

क

७४

तस्मात्तद्देहस्यात्माश्रयः किं त्वात्मैवेत्यर्थः॥ अयमत्र प्रयोगः। ज्ञानं देहधर्मो न तादात्म्येनोप
लब्धत्वाद्देहरूपवदिति॥ एवं देहव्यतिरिक्तात्मानुमानस्य बाधमुपाधिं सत्प्रतिपक्षतां चोत्
थोक्तितव्यभिचारत्वमाह। न बाधस्तदतामित्यादिना॥ अप्रत्यक्षस्यात्मत्वं प्रत्यक्षाविषय
इत्यर्थः॥ न खल्वप्रत्यक्षमिति प्रत्यक्षातिरिक्तमित्यर्थः॥ देशकालादीति॥ भावानामग्न्या
दीनामनुमानेन धूमादिलिंगेन प्रसिद्धिरपि दुर्लभा कुतो देशकालावस्थादिस्वरूपाणां भे
देन वस्तुशक्तिषु भिन्नानुस्तत्वेषु व्याप्तिग्रहणं देशादावग्नेर्धूमजननशक्तिरासीद
नुमानदेशादौ सा नास्तीति देशकालगतेर्धूमजनकत्वाभावस्यापि संभवेन धूमस्याग्नि
व्यभिचाराशंकोत्थानादित्यर्थः॥ नाभावेऽनुमानाद्देहातिरिक्तात्मसिद्धिरागमादेरप्यप्र
माणत्वादिति नेत्याह परस्येवेत्यादिना॥ उपलब्ध्या साहचर्याकाररूपा प्रामाध्यः प्रमेयो न तदीयप्र
भावः॥ नांतरेण व्यापकं लिंगं भवतीत्येवं भावो व्याप्यत्वं यस्य तल्लिंगं तत्पोक्तितस्य पर
हयंगतिर्व्यभिचारशंकाकातराकैवकथा तत्त्वीनस्येत्यर्थः॥ अनुत्सत्येहक्तिर्यथा देश

दस्य दृष्टव्यभिचारत्वं॥ कार्योपत्तेः पारंपर्यादतः परो हार्यजोवरत्वेन दृष्टव्याप्तेर्लिंगाद्वै धर्म्मसृतं
जो सदृशं गवयं दृष्ट्वा गौरनेन सदृशीत्युपमानं प्रवर्त्तते॥ तत्सर्वात्मना सादृश्ये प्रवर्त्तते कदे
शेन वा॥ नाद्य इत्याह सर्वसारूप्य इति॥ तस्मात्तस्यैव तेन सर्वसारूप्याद्भेदेकस्य विरहपि वैसादृ
श्यस्य भावान्नोपमानसंभव इत्यर्थः॥ न द्वितीय इत्याह एकदेशेति॥ अत्र प्रतिज्ञैव हेतुर्गमोए
कदेह व्यतिरिक्तस्यात्मनोऽभावं मन्यंते इत्युक्तेरात्मनिरूपलंभक प्रमाणाभावादभा
व प्रमाणस्यैवात्माभावसाधकत्वमित्यर्थः॥ एवं गतेरिति स्वेन व्याख्यातं॥ शरीरे भावादित्य प्र
त्यो हेतुः स्वभाष्यकृद्भिर्व्याख्यात इत्याह सोत्रेति॥ प्राणे चेष्टेत्यादि भाष्यं सोत्र हेतुविवरण
परं तत्र चेष्टेति॥ क्रियामात्रं देहस्यात्मत्वसाधकेन भवतीय टादावपि तद्भावादित्याशंक्य व्याचे
ष्टेहिताहितेति॥ अंतः शरीरकाश्रया इति देहाभ्यंतरप्रदेशस्य परिणामा इत्यर्थः॥ नन्वंतः शरी
रप्रदेशाश्रितत्वमिष्टादीनामप्रत्यक्षमपि यथा कल्प्यत एवमात्माश्रितत्वमपि कल्प्यतामत आ
ह शरीरांतरिति किमस्यानीति॥ अत्र तं तं प्रमितात्माश्रितत्वेकल्पना दूरं प्रमितदेहस्याभ्यंतर

क
८५

प्रेक्षावद्भ्यः संतीति वृत्त्या व्यमित्यर्थः॥ अनुमानादिप्रमाणानामसिद्धिमुक्तां तां वत्परिहर
ति नाप्रत्यक्षमित्यादिना॥ अनुमानादीनां प्रामाण्यं प्रत्यक्षेणावगम्यते॥ अनुमा
नादिभिर्वा नाप्यह इत्याह प्रत्यक्षे हीति॥ इदं प्रत्यक्षमिप्यतो लिंगस्वरूपतत्र्याप्त्यादित
द्प्रामाण्यादिपरिच्छेदात तर्केर्न समर्थमित्यर्थः॥ द्वितीये व्याघात इत्याह तस्मादिति॥ प्रमाण
तरान्युपगमे तदप्रामाण्ये किं व्याहतेत्यर्थः॥ व्याघातांतरमाह अपि चेति॥ प्रतिपन्नः संप्रति
पत्तिमान् पुमान् तं विहायाप्रतिपत्तिविप्रतिपत्तिमंतं देहवंतः पुमांसः प्रेक्षावद्भिः प्रतिपाद्यते
कृत्वा घेत इत्यर्थः॥ इत्थंभावोऽप्रतिपत्तिमत्त्वादयः॥ एवं प्रतिज्ञाव्याघातं कथा प्रवृत्तिव्या
घातं चोक्त्वा लोकयात्राविरोधमाह अपि च पशवोपीत्यादिना॥ प्राचं बालतरणं। आस्तामनमी
षपृथुः॥ इष्टानिष्टसाधनमधिकृत्य न पशोरपि प्रवृत्तिरित्यर्थः॥ अनुमानगोचरस्यानो प्रवृ
त्तिनिवृत्तिगोचरस्येष्टानिष्टसाधनत्वं तत्र प्रत्यक्षेण नहि प्रभवतीति योजना॥ अपमोद
नः दुःखनिवर्तकओदनत्वात् प्राक् भुक्तौदनवदित्याद्यनुमानाद्धि इष्टानिष्टसाधनत्वावगमः॥

१८०६

ततः प्रवृत्तिरनिष्टसाधनत्वानुमानाच्च निवृत्तिरिति ॥ एवं विप्रहे व्याघातरेऽनुमाप-
पानुमानसामान्यस्वीकारितं शब्दप्रामाण्यमपि विषये स्वीकारयति ॥ न च प्रत्यक्षाद-
नापेति ॥ मूकत्वे नास्ति कस्य शब्दप्रामाण्यं निश्चेतराप्रजं ॥ प्रवृत्तिनिवृत्तिविरहोनुमा-
नसामान्यविरहादापन्न इति विभागः ॥ मतत्केन मद्दष्टव्याप्तिकार्योपपत्तिरस्तु त-
पक्षे द्वारापि विषयत्वात् प्रमाणमिति तत्राह अत्यंतेति ॥ यद्यपि न व्याप्तिदर्शनम-
स्ति तथापि तस्य प्रत्येकतपरोक्षत्वात् तत्पाद्यपापाद्युपपद्यमानस्फोटादिकार्यरूपार्थाप-
त्याद्युपपत्तिः प्रत्यक्षादिविषयोऽस्यतीति भावः ॥ यत्र सर्वसादृश्यं किंचित्सादृश्य-
मनुपमानं दूषणमप्रामाणिकतानिराकरोति प्रयत्यः सामान्ये गौ न सर्वो सनासादृश्य-
ज्ञानमुपमानसामग्री नापि किंचित्सादृश्यज्ञानमपि तु बहुतरसामान्य-
योगज्ञानं तच्च गोगवयादेरेवेति नातिप्रसंगमहूस्पर्धः ॥ प्रत्यक्षं प्रत्यक्षमेवास्या-
न जागत्स्वप्नदेहयोर्योगव्याघ्रमनुष्यदेहयोरभेदप्रत्यक्षमानमहंप्रत्ययात्

वनेशरीरादिष्वकर्त्तृतात्पर्यः।। इत्युक्तं प्रथमसूत्रे इत्यर्थः।। एवमनुमानादिप्रमाणेभ्यश्चा
मान्यतः सम्मर्थ्य भयसंमतप्रत्यक्षेण च देहव्यतिरिक्तमात्मानमुक्तोऽनुमानादपि
व्यतिरेकं सूत्रव्याख्याने न दर्शयति सूत्रयोजनाविताऽदिना इह हि सूत्रकारेणो द
मुक्तं यस्य ज्ञानं धर्मः स तावदात्मा देहस्य च न ज्ञानं धर्मः देहमात्रेऽपि मृताव
स्थायां ज्ञानाभावादिति तदुक्तं मया वै देहमात्रे विनोऽपि संयोगादेर्देहधर्मत्वे ना
नैकान्तादत आह चैतन्यादयोऽपि चैतन्यं हि स्वाश्रयसाद्दश्यव्याप्यत्वात्रैकान्ता
मान्यवत्ताद्विशेषगुणश्चैतन्यं ततः किं जातमत आह तथा चेद्धलदोणे तदेष
दोक्तयुक्तिनिष्ठीतुनामसहमपि देहात्मप्रत्ययवद्व्यवहारं गलादभ्युपैयते।। अत्र
स्य विशेषगुणश्चैतन्यं ततः किं जातमत आह तथा चेति।। यदनित्यस्यात्मनश्चै
तन्यमनित्यं विशेषगुणमनादानैकान्तिकत्वमाशंक्य तद्विशेषगुणा इत्यु
क्तेसिद्धे तत्प्रत्ययतः करणव्यक्तिप्रतिबिंबितचैतन्यस्याविंबभूतात्मन्यध्यासात्

नतदाश्रितत्वात् विशेषगुणत्वव्यवहारेन काचित्क्षतिः स्यादेतत्स्यापि त्वाद्यावदाकाशाभावित्वमिष
तएवेतिनतेनापिव्यभिचारइतितदसंप्रकोगः ज्ञानेनदेहविशेषगुणः अयावद्देहभावित्वात् घ
टादिवदिति॥ नत्वेवमपिप्राणत्वेष्टादौनोविशेषगुणत्वाभावेनायावद्देहभाविनामपिदेहध
र्मत्वसंभवात्कथं देहव्यतिरिक्तात्मगमकत्वमतआहैवमितिप्राणादयोनस्वकार्यमवाप्यित्वेना
त्मानेकत्वयंतिकिंतुनिमित्तत्वेनेत्यर्थः॥ तस्यापिदेहाश्रयत्वानुपपत्तेरित्यादृश्यमपिहिविशे
षगुणः तत्रदेहस्यतर्हिज्ञातविशेषगुणत्वाद्यावदाश्रयमनुवर्तेतेतिमृतावस्थायामपि
भावान्नप्राणाभावोपपादकस्यादित्यर्थः॥ विमताः नदेवदत्तदेहविशेषगुणाः गुणत्वे
सतिदेवदत्तेतरप्रत्यक्षत्वरहितत्वात्॥ घटवदित्यनुमानमाहस्वपरेत्याहोति॥ यद्य ४२
पिघटादयः परप्रत्यक्षास्तथापिगुणत्वेसतीतिनपरप्रत्यक्षत्वेनगुणत्वाभावाद्विशे
षणाभावेपिविशिष्टाभावादितिनसाध्यविकलतादेहगततत्तुल्यादौपरप्रत्यक्षत्वेऽस्तीत्यनै
तिकत्वप्रतिलासर्पिप्रतिकार्यविशेषग्रहणं॥ यथाश्रुततस्तुगंधेनघटतएवइच्छादयोन

को॰त्रि॰वि
७७

देहविशेषगुणाः स्वपराऽप्रत्यक्षत्वादित्युक्ते इच्छाद्यव्याप्तिनिर्के स्वपराऽप्रत्यक्षत्वपहार्थं स्वप
रेषामस्मिन्धत्वेन दृष्टान्ताभावात् वैधर्म्यमात्रस्य चव्याप्तिरहितस्यासाधकत्वादिति॥ यदु
क्तं पूर्वपक्षिणा भूतेषु यावद्भूतभाव्यपि चैतन्यं देहाकारपरिणतेषु स्यान्मदशक्तिवदि
ति तदपि न क्षिपत्यति॥ चैतन्यस्य भूतविशेषगुणत्वेन यावद्देहभावित्वानुमानवद्या
वद्भूतभावित्वानुमानान्न दृशः तेऽस्य विशेषगुणत्वाभावेन दृष्टान्तवैधर्म्यादित्याह त
त्रयप्यपीति॥ परात्मप्रत्यक्षत्वेन हि चैतन्यस्य भूतविशेषगुणत्वं यन्नेतरमेव प्रतिषिद्धं॥ तद
भ्युपेत्य दृष्टान्तवैधर्म्यमुक्तं॥ इदानीं मदशक्तिवच्चैतन्यस्य परिणामधर्मत्वमभ्युपेत्यापा
हत्यापि च मदशक्तिरिति गमात्रयाऽवदेशेन॥ यथा विहंगमाहन्तम्मात्रमपि देशमनुपाति
तु मतिकामितेनोत्साहेतत्वं नान्यत्वे तनाधिष्ठिते शरीरमपि नैकिंचित्कार्यमुत्सहेतेति त्व
र्यः॥ किमात्मकमिति भाष्यप्रश्नो नेरूक्ते मते देहधर्मत्वेन चैतन्यस्य तत्र भूते प्रक्षिप्तद्वत्ता
न्तापाद्येपः देहधर्मत्वनिरासेन तस्यापि जातत्वादित्याह दूषणान्तरमिति॥ एवं हि

दृष्टांताभावादित्य
र्थः॥

देहधर्मत्वाद्देहस्याभावित्वनस्याच्चैतन्यं रूपादिवद्यावद्देहभावे चैतन्यमेव न स्यादित्यर्थः ॥ १ ॥

देहभावेप्यभावान्न देहधर्मश्चैतन्यमित्युक्तमिदानीं देहधर्मस्य रूपादिवद्देहमात्रोपलब्धिर्न त्वायोग्य
चैतन्यात्मकत्वमेवानुपपन्नमिति दूषणान्तरमभिधानेऽप्रसक्तेऽनावृतलोकायतिकस्य चतुष्टया
त्मिके चैतन्यं नास्तीत्याक्षेपः क्रियते इत्यर्थः ॥ भाएवेत्यादेर्हेतोरित्यर्थः ॥ देवदत्ते चैतन्यं न देव
दत्तदेहधर्मस्तद्रूपवत्त्वात् चैतन्यवदित्यनुमाने ॥ कालातीतत्वं देहधर्मग्राहिलो
नुमानस्याह उपलब्धिग्राहि एवेति ॥ उपलब्धेरात्मवृत्तित्वमुपपादितं क्रियते तत्रोपलब्धे
र्हि स्वाभाविकौपाधिकोवानाप इत्याह आत नइति ॥ स्वभावत इत्यर्थः ॥ नहि ता
प इत्याह नचेति ॥ अध्यासमाध्येपुपलब्धिव्यतिरेके विषयानां प्रकाशेन संभवतीत्यु
क्तं ततस्य विषयाएव न संतिकेनूपाधिनोपलब्धिर्भिद्येते त्यर्थः ॥ विषयाणां परस्परं भे
च दाभावादपि न तदुपाधिक उपलब्धिभेद इत्याह नेति विषयभेदग्राहिप्रमाणमस्तीत्युपलब्धि
व्यतिरिक्तविषयस्य सद्भावे प्रमाणाभावाद्विषयस्वरूपं दुर्लभं विषयाणामन्योन्यं भेदग्रा
हि प्रमाणाभावात् तद्भेदोपि दुर्लभ इत्यर्थः ॥ प्रत्यक्षत्वमसिद्धमित्याशयेन क्षितिटीकायां प्रत्येकं

उपपादनं कंदे
पक्षाह

भ्रमरतत्त्वमामीच्छामो॥

७८ वस्तुसत्तामेवबोधयति न भेदं विवेः अस्मदाद्यापारामोगात्॥ न च मानांतराद्भेदसिद्धिः प्र
तियोगिभेदसिद्धेः परास्मरात्मनत्वाद्दित्वासिद्धेः॥ नतु विषयाभावे उपलब्धेः न उपलब्धेस्त
ब्र॰त्रि॰त्रि॰ मपि तस्मादात्मनोदेहव्यतिरेकं संगतमाह तेनेति॥ भाष्ये हस्तदुक्तं इति स्पष्टे कारावस्तुन्तो
पा उपलब्धेः प्रत्यभिज्ञैकत्वं समर्थयते न तु रूपादयः इत्याह तत्राविषयादृशाद्याभिति॥ नतु
निश्चेदेष्वपि देहे तन्निन्नसते वेस्वप्ने उपलब्धिर्दर्शनादनुपयोग्यवर्णने भाष्ये ऽनुपल
भिता शंकाह यो हीति तस्मादित्य ननरसुखायोपि संहारो न क्रियते तस्मात् व्याप्तकत्वादि
त्याह भ्रकृतमिति॥ अंगावबद्धास्तु॥ उद्गीथादीनां सर्वशाखास्वेकत्वात्कर्म उपासनव्य
वस्थाशंकानेऽत आह स्वरादीति॥ उद्गीथादिकं तेषु लीनत्वात्स्वरास्य मानानुविषयत्वे
न शाकेरन्वेकविशेषाकांक्षत्वात्संशयमाह यस्मिन्निति॥ यथा शरीरात्मनोर्भेदादा
त्मधर्मो लिंगशरीरेण संभवत्येवमेकशाखागतोद्गीथधर्मा ऽगानामिन्नान्यशाखागतोऽ
पादौ प्राप्तिः॥ अथवा विद्याभितो देवत्वे वक्तार स्वरत्वेन नाविहोता होतिनां क्रियायां संकरः अन्य

तदे स्वरादि

मत्वर्तो ङीपादिसामान्यस्याऽतेः प्रकरणोपनीतविशेषणकांद्रत्वेनवोधकत्वादुपात्तीनो व्यवस्थेतिसंग
तिः॥ एपमभिप्रेत्य पूर्वपक्षमाह ओमितिदोरभित्यादिना॥ नातु सामान्यश्रुतिवाधेन कप्रसंनिधेः
स्यानात्स्वश्रुत्यागतविशेषउपादानन्निपक्ष इत्याशंक्याह नवैवमिति॥ उङीपमुपासीते सङ्गे
ङीपश्रुतेरु ङीप सामान्यं वाच्यमुङीपव्यक्तित्वे द्रपा स्वश्रुत्यागतो ङीपव्यक्त्युपादाने च सामा
न्यस्य प्राप्तिव्यक्तिसमाप्तेः सामान्यविशेषयोः एवं पि स्वश्रुत्या श्रुत्यपेक्ष्य ग्रहीतो वव्रकपं स्रा
प्ति वाध्य इत्यर्थः॥ श्रुतिसमर्पितमर्थं वाध्येतेति सन्निधिरितिशेषः॥ स्वश्रुत्यावैतरीपास्वीका
रेपि स्वश्रुत्यागतयोरुभयोः स्वीकरणादितियोजना॥ सहोक्तिमाह। पचाद्युक्तरीति॥ पटुं उक्तोमा
नपेतीह प्रयोगे पटुपदेन श्रुतपटत्वजातिर्लिङ्गितो च उक्तपट व्यक्तिग्रहीत्वा रुडादिप
टव्यक्तिरंतरपरिस्वेच्छामक्तत्रतदावाश्रुतिरस्वार्थः प्राप्ततेनवाध्यत्वार्थः॥ दृष्टान्तेपटत्व
तिसामान्यस्यश्रुतेः संकोचोनसन्निधिमात्रादपितुरुक्तिलामितिसन्निहितविशेषश्रुतिवले
नरहस्तोकेतदुपादानविध्यादुङीयादिसन्निधिमात्रेण तु स्वरादिभिन्नमस्तु कमङीप

का.ति.टि.
७५

प्रप्रसीतेति विशेषविषमाश्रितिर्विध्यतेइ तत्र दुर्बलं सन्निकर्षे धिमपबाध्य सामान्य
श्रुतोसर्वस्यानवाक्यपासनोपसंहारइत्यस्मिंस्तमाहपुनःमित्यादिना॥ ननु वाक्यस्य श्रु
तेर्बलीयस्त्वाच्छुत्या श्रुतिबलाद्वाक्योक्तिर्घ्नुत्या व्यक्तिः प्रतीयतोपरशब्दाद्उपरमात्रं किमि
ति सामान्यश्रुतेः संकोचस्तत्राह विशिष्टार्थप्रत्ययनेति॥ व्यवहारार्थं वाक्यप्रयोगः
व्यवहारस्य विशिष्टार्थविषयः न पदार्थमात्रविषयत्त्वस्मृतिसत्वेन प्रवृत्त्युपयोगयत्वात्
अतो विशिष्टार्थप्रत्ययः प्रयोगस्य प्रयोजनमित्यर्थः॥ यद्येवं किमर्थं तर्हि पदैः पदार्था
स्मार्यंते अत आह न चस्वार्थमिति॥ इतरपदार्थस्मरणे वाक्यार्थबोधनायेत्यर्थः॥ यदि स्व
प्रयोजकं स्वोद्देश्यं वाक्यप्रत्ययमपबाध्येत पदार्थस्मरणं तर्हि स्वयमेव नस्याद्धे
त्वध्वप्रसंगादित्याह मा च बाधीति॥ मा बाधि चेदन्वयः॥ बाधितं च प्रसज्येतेतत्सूत्रमारं
दप्रक्रमित्यर्थः॥ तदेव मानन्यपरा प्रतिहता नो विपरीतं बलाबलमितिन्यायेन वाक्य
वेन वर्णित्वमेवं विध्यस्थले श्रुती नात्र विशिष्टार्थप्रत्ययायसन्निहितविशेषश्रु

तिवशात्सामान्यश्रुतेः संकोच इत्युक्तं भवति एवं दृष्टांते सामान्यश्रुतेः संकोचमुपपाद्य दा
र्ष्टांतिके तदभावमाह इहत्वित्यादिना ॥ अमुत्र मुक्तोऽपि मुपासीतेत्यस्य श्रवणे उक्तोऽपि मामनवि
शिष्टोपासनकर्तव्यतावाक्यापिः स चोऽपि पदेन सामान्यमात्रपर्यवसितेनापि न संकुच्य
मानत इति न श्रुतिसंकोच इत्यर्थः ॥ अपवादाभिप्रायमर्हतीति श्रुतिमिति शेषः ॥ यदुक्तं स
न्निहितवस्तूपादाने पि न सामान्यश्रुतेः पीडेति तत्राह श्रुतिसामान्येति ॥ एकशाखा
गतस्यापि उपासनस्यान्यशाखागतोऽपसंबंधे संनिधिविरोधप्रसंगी वक्तव्यस्तस्मात
संनिधिर्बाध्य इत्यर्थः इदानीं विरोधमेव नास्त्यन्यत्रापि दर्शनादित्याह विरुद्धमिती
ति लोकेषु पृथिव्यादिषु लोकशब्दो लोका लोकेषु लाक्षणिकः पृथिव्यादिदृष्ट्या पंच
विधं सामोपासीतेत्यर्थः ॥ पृथिवी हिंकारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्र
तिहारो द्यौर्निधनमिति ॥ उक्थं कर्मांगभूतं शस्त्रमिति पदस्य जावदतीति तदिदमे
वपेरयं पृथिवीत्युक्तमे पृथिवीदृष्टिविधिः । अपामाहेमंतशिशिरयोर्वानीकदर्शनेन पंच

८० संख्यासूत्रवदेवं तत्रैक संवत्सरं स्याद्वैष्णवे तु सामान्यात्समानत्वेनैकत्रे होतव्याः छागादेर्हो
माषिमन्नवाक्यं पठेद्धोतरित्याध्वर्यवे पृ॰ ॥ यो जात एवेत्यालेख एवसन्नस्य मो गुणोः श्रेष्ठ
कौ॰ स्रात॰ मनस्वान विवेकवान्नकर्जनास्याद्धूतिप्राप्तः ॥ तनोऽस्यदर्शने जनाद्यर्थः ॥ भेर्याभि
रेवहि सत्यादपद्यत्तत्र तत्र यज्ञानि त्वात्मामितित [illegible] न प्रकृत परामर्शादिदिष्टे [illegible] मन्त्रेऽत्र म
त्रं तच्छन्दभेदे हेलेभावात्प्रगल्भत्वं ॥ पूर्वं जो जप्यादि सन्निधिं वाध्य पित्वोजाप्य पुरा
णीनां सर्वेशाखास्थं संहार उक्तः ॥ एवं मन्त्रापि व्याख्योपासन संविधि स्मृतेः फलश्रुते
श्च सम्यक्ज्ञोपासनं सन्निध्यान माह स्तुत्यर्थ फलं वाधित्वा विध्येयफलमित्याह । तत्रादिवमेवे
ति ॥ उभयथा पुराणान्तं व्यमिति शेषः ॥ व्यक्तोपासनफ[illegible] अर्थवत् स्यात्सम ले
स्त्योपासनं स्तुत्यर्थफलेनान्यथासिद्धिर्नाशंक्याह नचेत्यादिना नचेत्यस्यैव मन्त्रापि
न चेभवितुमर्हतीति वक्ष्यमाणेन संबन्धः ॥ यथा वैश्वानरीयेष्टाविति ॥ वैश्वान
रं द्वादशकपालं निर्वपेत्पुत्रे जाते इत्युपक्रम्य यदष्टाकपालो भवति यस्मिन्जा

ते एतास्मिन्निर्वपति प्रत्येकमेते तस्मीतादि समासमन्ते ॥ तत्रैव प्रवृत्ति द्वादशकपालेऽष्टत्वादीनां वस्तुतो
तेऽभीवस्तुप्राप्तिनपरिच्छेदकत्वे तस्मात्प्राप्तत्वादिन्येतदेवशात्रकपालत्वादिगुणविधानमिति
साप्रयत्ना कृतितेस्मात् एतत्कल्पेऽतथाविशिष्टद्वादशत्वावरोधात्तेमहतत्वेऽर्यष्टत्वादिगुण
विधिः ॥ अपि च पुत्रे जाते द्वादशकपालमितिपदेवोपन्नं तं तदेवाष्टत्वादीनामनेनोपसंहि
तेयद्वादशकपालो भवति यस्मिन्जात एतामिष्टिमिति तेन केवलं द्वादशकपालविधिप
रमष्टत्वादीनामनुवस्तुतः प्रशंसार्थमेतेनस्तुत्यर्थमिति त्वेष विधिः तावत्कत्वेनवर्त्तमाना
पदेशानामेकवाक्यत्वेच संभवति न वाक्यभेदेन विधिकल्पनेति तस्मादष्टत्वादीनां
स्तुत्यर्थत्वमित्याह अत्रेति ॥ वैश्वानरेष्टौ हि द्वादशकपालविधेः प्रशस्तत्वाय पर
शकपालो भवतीत्यादीनां वर्त्तमानापदेशानां च स्तुत्यर्थत्वे पुत्रे वैश्वानरोपास
नेतु समस्त [illegible] च विधेः कल्पनीयत्वादेवं कामसरस्य काम्यप्रयत्न [illegible]
नापाखा विशेषाणां [illegible] विधिकल्पनमित्याह इहलिङ्गेति ॥ तासिमन्द्रीते कापतिष्प

का॰ त॰ त॰
८१

इत्यादिव्यस्तोपासननिंदा किमर्थाः तत्राह निंदार्थाख्येति॥ येन हि पावकश्चैवं समस्तोपा
सनेन संकल्प्य पूर्वं वर्त्तुं प्रारब्धं तत्साति पाविव्यसमस्तोपासनप्रारंभे व्यस्तोपासन
निंदोपपत्तिरित्यर्थः॥ अत्रोदाहरणमाह स्पष्टमिति॥ स्पष्टमाम्नायमाहुतिमश्याव्यवहर
तितस्य योनुदिते जुहोति सबलस्याग्न्याहुतिर्मम्यवहरति य उदिते जुहोति इति उदित
नुदितहोमयोर्निंदार्थमपि वाक्यं तदेकतरयोर्विहितत्वादुदितहोमप्रारंभे नुदितहो
मनिंदा एवमनुदितहोमप्रारंभे तत्त्यागेनोदितहोमनिंदा तदाहार्थवादः॥ अभ्युपेत्य का
लभेदे दोषवचनतादिति कालभेदे कालान्तरत्वकरणादित्यर्थः॥ उपक्रमोपसंहारयो
रेकविद्याविषयत्वे न कवाक्यत्वावगमान्न व्यस्तोपासनविधिरिति सिद्धान्तयति स
मस्तोपासनस्यैवेत्यादिना॥ उपक्रममाह वैश्वानरविद्यानिर्णायेति॥ व्यस्तो
पास्यानुज्ञानामेव समस्तविषयत्वे जितासादर्शनादुपक्रमस्य समस्तोपास्तिपरत्व
मिरतयपि उपसंहारमाह तत्रवैकेत्यपहेति॥ नानाशब्दादिभेदात्॥ नान्वहेवं विद्यानां

भेदनिरूपणे साक्षाद्धर्मिके गुल्ले पसंहारवितनसंभवतमित्याशंक्याह सिद्धेश्चेति॥ अधिकरणा
नारंभमाशंकमानो रूपभेदाद्विद्याभेद इति सदृष्टांतमाह ननु पयेत्यादिना॥ आप्रवर्काधनं उ
बमवच्छिरप्रवीभावनो धात्वर्थपीनेति॥ प्रजेतेत्यादेः प्रत्यर्थीभूतभावनामधात्वर्थपानकादिना
निरूप्यमाणत्वादित्यर्थः॥ कार्यरूपाणां साध्यरूपाणां भेदेनापि सर्वविद्यास्वभेदादित्यत्र
य॥ नवेहेतुगुणानां गुणिनमत्रूलतः सिद्धत्वादुद्धवनस्यमीद्दरुसमानधर्मादिवस्तु
निष्ठत्वप्रयुक्तानि तर्हि त्वदुक्तभेदेवद्रूपणे भवेन्नत्वं वस्तुनिष्ठानीति शेषः॥ तद्विषयो नतु
विषयो। उपासनाभावनानुष्ठानं। उपासनप्रवृत्तेरुपासनाधीनत्वे निरूपणात्वेष्यभेदमा
शंक्यते यद्यपि चेति॥ अन्योन्यसाध्वरादेः कस्याश्चिदपि षोडशकलादेः कदाचिदुपासिसमये
केनचित्सत्यकामत्वादिसंमृश्यत्वादिना च रूपेणोपासनविषयभावे इत्यर्थः॥ ननु
सत्यकामत्वादिगुणानामुपास्यत्वेन काण्डीरूपत्वाज्ञकोरेदोषणत्वादिभ्यो वैषम्ये वि
न विद्याभेदकत्वं गुणिन एकत्वात् गुणानां चोपसर्जनत्वादित्याह ननु चेतद्गुणतयेति॥ न

पृ. ८२

ततोपेयमिति तंभावे ततद्गुणवत्वरूपेणोपास्योपासनानि विहितानि तानि गुणभेदान्नामेथं
ते इति नाऽपि तु भिद्यते एव छन्दोगामस्रादिगुणभेदेन तज्जोपासीनो भेददर्शनादित्यर्थः॥
ननु गुणभेदेऽपि कर्मैक्यवदुपासनैक्यं किं न स्यादित्यत आह न चाग्निहोत्रमिवेति॥ इवका
केद्रव्यभेदेऽप्यग्नीषोमीयवत्कालेन गुणसार्थः॥ अग्निहोत्रे द्रव्यादिदर्शद्व्याप्यसमुल्लासशिष्टत्वान्न
कर्मभेदकत्वमुपासनानां तु तत्तच्छिष्टगुणभेदे इतरेषां भिन्नत्वाज्ज्ञानभेदादिवत्कर्म
भेदइत्यर्थः॥ ज्ञानार्थत्वे सर्वोपासनानैक्यमित्याह न वस्तु मस्त्वेति॥ केचित्त्वल्गु
णा इति॥ सत्यकामत्वादयो दहरविद्यायां शाण्डिल्यविद्यायां च समा इति॥ एवंरूपभेदा न
दनुरूपेरकोपासनावाक्यानामभावनानिधाविधिवद्भेदरूपाणां पोनरुक्त्यादन्येषु
विद्याभेददर्शितः॥ अन्यदपि प्राणाग्निमयवाक्ये नैमित्तिकं लभन्ते सर्वे प्राणस्य मनस्त्वात्
दंन्द्रव्यव्यंतरं तं सस्ते शव्दादिभेदादिति॥ विकल्पोऽविशिष्टफलत्वादिति॥ विद्याभेद
दिनिताववंतरं॥ अहे ममह प्रतीकोगावदयोपासनाना मनुष्य चमकारो नियनरणेयेण

निरूप्यतेऽग्निहोत्रं हे स्त्रह्रेयाज्ञीनां यथाकाममनुष्ठानमिति पर्वपक्षयिष्यन्नसमु ज्ञपनियमेनन्वि
मित्तिनपूर्वपक्षः त्रिमते भि ज्ञाधिकारत्वमपि दर्शहीतोक्त मुञ्च मनियमः दर्शनादित्याका
ज्ञातेनाऽग्निहोत्रेति पयगधिकारत्वमपि सक्रज्ञपोनियमवान्पूर्वः यथाग्निहोत्रं दर्श
दे त्रिसर्पः ॥ प क्रिहरक्रि ते षोनित्यत्वादित्यादितु ॥ यस्माऽदुसाह्ना स्याऽ उपास्येनन्त
विचिकित्सा संशयो ह्रि ज्ञामु यामहं फलं न वेतितस्य बहुसाधि यं वोऽदर्पः ॥ स्ववाज्ञो
त्वारेतोऽहोपास्यदेवो मत्वादेवानयो ति सा नोऽपि ॥ कामवान्ना ॥ सतीको यामीना मु
पासितोऽहं गृहे पास्तिव ह्रिके त्वानि यम मात्रं वाक्याहं मुख्याह्रा त्वाकारसाधनत्व
मुपाधिमाहयाज्ञित्वाति ॥ योनापुंदि श्रीव स्त्रे वेदत्र नित्यमविपुनेव त्वोपास नान्वे
पुत्रकोऽद नेऽपुत्रनिमित्तकोऽदनेन कोऽति जीवन्मुक्तोऽभवतीत्यर्थः ॥ अगेपु च ॥ नन्वत्र
नित्यहीरत्वानियमऽलत्रो गावब्रह्मोपासनानां नापक फलत्वादनित्यत्वमुक्तेतत्र
यमिदानी मात्रयवन्नित्यत्व मांसनतेऽतत्माह उचोस्ना न्वित्यादिना ॥ नन्व

कत:

७२

ङ्गं अहेतो प्रयोगविधिः॥ कास्य फलसाधनत्वे चोपाकृतानां मनेगत्वात्क्रयेतास्य प्रयोगस्य च
न पृथिव्यं ह स्त्र आह यथ्यापि कामस्य इति॥ तेन तत्फलो देहशेनेति। कास्य स्यानपफलो देहशेने
त्यपि॥ ननु अत्वस्याश्रितोपासनाः फलेविधीयंते ए ताव तावता पंता स्तां समक्षे स्यासि
द्धि र तत्राह एव वेति॥ सांगं प्रधानं युगपत्कर्त्तुं व्यमित्यापयाणं अतत्वंगानां समक्षे
यतेयमः प्रयोगवचनेनेत्र कृतः तान्नियमे नाश्रितानामुपासनानां समक्षे य
नियमो युक्तः। कुतः। आश्रयतंत्रत्वादाश्रितानामिति योजना॥ न तु फलकामनतो य
मत्यामुपासनानामनुष्ठीयेते कपमानां कोलेवैः। नित्येष्वनुष्ठिते त्यानुष्ठाने नित्य
नित्यकर्मप्रयोगविरोधादतत्राह स च प्रयोगवचनेन इति उपासनानां तं गसमक्ष
प्रासस्य प्रवर्त्यकलकामनानामपि प्रयोगविधिरेवाचे ष्याव यतीत्यर्थः। कामनाप्रयोग
विधेयत्वान्न प्रयोगविधि प्रयोज्यत्वमिति वह्व्यमाणमस्मिन्सेत्सामन्यान सो दृष्टं
प्रयोगविधिः फलेकामनानामव संभावमा द्विपतीत्येतद् पदि यथ्यापि विहितेति॥

णः प्रहार्योपयोपाविहितः यस्य पदार्थो यपोपरिहः स्मि कृवकृहीतः तदनुरोधात्प्रयोगवचनोन्यपदार्थ
स्वभावं नित्यत्वानित्यत्वादिकमन्यथाकरोति किं त्वन्यतः प्रसिद्धपदार्थस्वभावमनुसर
रतीत्यर्थः॥ ततः किंनाम मत्वर्थे हितत्रेति॥ क्रत्वर्थो नाम अङ्गीपारेनाक्षयन्त्या नित्यफलपर
मर्शमंगरेणाम्नायते तद्वत् स्नानादि इत्यर्थः॥ ननु विश्वजिदादौ फलाश्रवणेऽपि फलं
कल्प्यते तत् कुतः किं न स्यादत आह तपाभावप्रसंगेति फलवत्संनिधावफलं तत्फलवत्त्व
त्वानुपपत्तेः फलाभावस्य संभवादेतानुष्ठापादिनियमेन समर्थितो नोत्र प्रयोगवचन
इत्यर्थः॥ ननु विध्युपाधित्वोद्देशेऽपि समन्वयेन समवर्त्ततानेनोहमानोतरोनुमानाति
सिद्धवदनूह्य ह्युद्देशस्य फलत्वोपमानान्तरप्रमितोद्देश्यफलत्वव्याघातादित्यर्थः॥ उपसंह
रति तस्मात्कामानामिति॥ क्रत्वन्तूपासनानामपार्थानित्यत्वे उपासनानां कामसंबन्धीना ६
मानित्यफलमिति प्राप्तिज्ञानत्वस्याहे तु नित्यानित्यसंयोगविरोधादिति॥ उक्तोपपादितेनोहि हि
ताः क्रतुसंयोगः उपासनानामनित्यः फलसंयोगः एतौ चैतरेतरविरुद्धौ उक्तोपपादितेनाच

८४

बो.

नित्यत्वानित्यत्वे इतरेतरविरुद्धौ धर्मौ वा पादद्वयाइत्यर्थः ॥ नन्वाश्रमनेत्रत्वादाश्रितोपा
मनेनित्यत्वमुक्तं तत आश्रमसमुच्चयपानियमे उपासनीनां प्रयोगविध्यादिर्नेतरेपेक्षामानां
नित्यत्वमप्यास्तु प्रमितितत्रातः इदमेवचेति ॥ यथाश्रमस्याग्नितंत्रत्वेपि नयाचहस्म
नुवृत्तिः किंतु सत्वेवागत्वेभवनमेवं सत्वेवाश्रयेभवनंततश्चेताद्वेतश्च नित्यानां
मप्याश्रमवतेत्रत्वोपपन्नेनेतस्मिन्धर्मेपि कामानां नित्यत्वेन प्रयोगविधिनाहि प्राप्ति
त्यर्थः ॥ एवमधिकरणं स्मार्तमनुष्ठानं प्रयोजनं कुर्वीति ॥ अपि भिन्ने कर्मइत्यादिना
भिन्नकर्मत्वमभिनमेन दर्शयति द्वनौ तमप्याति ॥ एवं हि योजिते यथाप्रश्नोस्मादि
कर्मत्वप्राहोतत्पदनाद्पातियोजितेद्वति ॥ वेदान्तरोदितप्रणवः स्ववेदेचोद्यतेय
रेतत्वज्ञानमप्यस्वल्पं उद्गीथः स प्रणवोयः प्रणवः स उद्गीथ इत्युपासनेनेत्वा
मप्यर्थे उद्गीतास्य च न मे पउद्गीथेनेयत्वतेस्व [illegible] दादजमादरुपं जातंतत्कोल र तत्सम
कृशांत्रिधां सन्नेहे [illegible] रत्वा समादधाति ॥ [illegible] प्रणवस्य सर्ववेदगतोद्गी

यस्य तेन चिंतितत्वादित्येतत्सर्वं हेतत्परत्वान्नैवाप्तत्वादिश्रुतेरीशयति वेदांतसोद्धितेत्यादि
नाद्रुतश्रीतमेव व्याचष्टे वेदांतसोद्धिते चेति स्पष्टेरादेरूपायास्सामृवेदो वेदांतरे ॥ एवं नाके
यो नेपित्वा तस्मिन्न स्मत्तदालिंगदर्शनत्वघटकं भाष्यमवतारयति ॥ एवं बुवन्नितीति श्र
न्वयमुखेनेति ॥ आश्रमसाधारण्येनाश्रितसाधारण्यमन्वयः ॥ श्री अयस्साधारण्यभा
वेनाश्रितसाधारण्याभावरूपव्यतिरेकव्यारव्यायामाश्रेदहीतत्तदृष्टं ॥ चतुर्थं वो
न्तीमोधत्वस्तोत्रकरणपिसुपाकरोतिपेषेति ॥ एवं विदितिरहेदादि विहितांगलो
पेव्याहृतिहोमप्रायाश्चित्तादिन्तत्वे ब्रह्मलएवं विचित्वं ॥ इति श्रीमत्परमहंसपरिव्राज
काचार्य श्रीमदनुभवानंदपादशिष्य भगवदमलानंदविरचिते वेदांतकल्पत
रौ तृतीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥ श्री ॥ श्री ॥ ॥ श्री श्री ॥ श्री श्री

क.
८५

वेदान्त कल्पतरौ

इति

तृतीयाध्यस्य तृतीयः पादः

२६

॥श्रीगणेशाय नमः॥ ॥श्रीपरमात्मने सच्चिदानंदाय नमः॥ ॥पूर्वं परापर
ब्रह्मविद्यानां गुणोपसंहारनिरूपणेन परिमाणमवधारितं। इदानीं तासां कर्म
निरपेक्षाणामेव पुरुषार्थसाधनत्वं निरूप्यते॥ तत्र कर्मानपेक्षाणाममूषां का
नुनामेतिकर्त्तव्यता। न हि तामंतरेण करणत्वं इत्याकांक्षायां यज्ञादयः शमा
दयः श्रवणादयश्च विद्योत्पत्त्युपयोगिन इति कर्त्तव्यताश्च निरूप्यंते। ननु फ
लभेदावंतरेण न विद्याभेदाभेदौ। न च तावंतरेण गुणोपसंहारानुपसंहा
रौ ततः प्रागेव विद्यानां पुरुषार्थसाधनत्वस्य सिद्धत्वात् किं पुनरारंभेणेत
आह स्थितं कृत्वेति। फलभेदेन हि विद्याभेदमुपपाद्य तत्सिद्धिप्रकारो यः स उ
पपादनीय इत्यर्थः। अत एव संगतिश्चापरा दर्शिता। औपनिषदात्मज्ञानस्या
पवर्गार्थत्वक्रत्वर्थत्वे पूर्वपक्षसिद्धांतयोः फले उक्ते तदुपलक्षणे। उपासे स
नावाक्यानां पूर्वपक्षे कर्मापेक्षितकर्तृसंस्कारकत्वं सिद्धांते तु स्वगुणैश्वर्यफलोपा

सन्नाविधायकर्तृत्वमित्यपि द्रष्टव्यं। ननूपनिषत्सु कर्तृत्वोक्तत्वातिरिक्तमपि ब्रह्मा-
त्मत्वमात्मन उपदिश्यते तद्विषयज्ञानस्य कथं कर्मोपयोगस्तत्राह यद्यपि चेत्या-
दिना। यावन्मात्रं कर्तृत्वापेक्षितं कर्तृत्वमामुष्मिकफलोपभोक्तृत्वं चेतस्यातो नित्यत्व-
मयीसनेन संबध्यमानस्य तावन्मात्रमुपनिषत्सु विवक्षितमित्युपरितनेना-
न्वयः। ननु कर्तृत्वभोक्तृत्वे देहस्यापि घटेते अतो न नित्यत्वापेक्षान्तरं देहव्य-
तिरिक्तात्मज्ञानापेक्षा तत्राह न चेत्यादिति। केषांचित्पूर्वपक्षबीजानामित्युक्ते-
तान्येवाह। तत्र यद्यपीत्यादिना। तत्र सिद्धांतीय इदं तिन प्रकरणात्मज्ञा-
नं कर्माङ्गमिति तदनुवदति प्रोक्षणादिवदिति। यच्चन वाक्यादात्मज्ञानं कर्तृत्व-
गमिति वदति तदप्यनुवदति यद्यपि च कर्तृत्वमात्रमिति। येन कर्तृमात्रेणात्म-
ज्ञानमव्याप्तिचरितक्रतुसंसंबंधं तद्द्वारेण पूर्णं तावद्वाक्येनैव क्रतुसंबंधमा-
पद्येत तत्कर्तृमात्रेनाव्याप्तिचरितक्रतुसंबंधमिति योजना। एवं सिद्धान्तसि- २

न्याः

प्रायमनूद्य पूर्ववादी दूषयति तथापीतिंरिक्तात्मनो वैदिकैः कर्मभिरव्यभिचार
सिद्ध्यर्थं लौकिककर्मस्वनुपयोगमाह नतावदिति । वैदिकैः कर्मभिस्तस्य हेतुत्वे
न संबंधमाह ॥ आमुष्मिकफलानामिति । यथाहमोभिमव्यभिचारादनुस्मारयति
एवमौपनिषदः पुरुषोपि कर्मभिरव्यभिचारात्तान्यनुस्मारयतीत्यर्थः ॥ यद्यपि हेतौ
सति कार्येनवल्येवेतिरेकविज्ञानमनुस्मारितेषु वदेहातिरिक्तात्मना कर्मस्वालाभ
ष्टव्य इति वाक्येनात्मज्ञाने फलश्रुतिर्नफल्गु क्रतुशेषत्वं नीयत इत्याह वाक्येनेवेति
ननु फलवतो ज्ञानस्य कथं क्रत्वर्थत्वमत आहार्थवाद इति ॥ आत्मज्ञानफलश्रुति
र्नफलपरा परार्थफलश्रुतित्वात् अंजनादिफलश्रुतिवदित्यनुमानं । अदृष्टद्वारे
णात्मज्ञानस्य कर्मांगत्वमाह औपनिषदात्मज्ञानेति आचाराद्यन्यार्थदर्शनं प्रा
पकत्वापेक्षत्वान्नास्वतंत्रमित्याह । एतदुपोद्बलनार्थमिति । तच्छ्रुतेरित्यादीनि सू
त्राणि लिंगपराणि व्याचष्टे न केवलमित्यादिना विद्यायाः कर्मभिः सहकर्तृत्वेनुग

नव्याप्तिस्तथापि व्यतिरिक्तात्मनि ज्ञाते पारलौकिकबलाधिकारस्य कादाचित्कत्वं भवतीवेति व्याप्यंव्याप्ति ६

मस्य सर्हम्प्राधान्येपि संनवात प्रकृतकर्मशेषत्व प्रतिज्ञया सहासंगतिमाह। त
त्रैव यद्यपीति॥ उक्तयुक्तेस्त्वेति॥ आत्मज्ञानस्य दृष्टार्थत्वद्वारेण कर्मसंप्रयोगेनैव
र्थः। शुद्धबुद्धाद्युपेतवेदांतप्रतिपाद्यं न कर्त्रादि। तत्र विनिगमकमाह। अनधिगतार्थे
ति। शब्दस्यप्रमाण्यं तदसिद्धावनुवादेनानधिगतार्थबोधनस्वरसतास्सिद्धे
त्तियोजना। परार्थफलश्रुतित्वादिति पूर्वोक्तहेतोर्विशेषणासिद्धिमाह। तयोपनि
षदात्मज्ञानस्येति। तदस्मिन्विचारस्तत्क्रतुशेषत्वेति यदेतत्तन्न। किमंगस्या
न्नस्यादेवेत्यर्थः। यदि परमात्मतत्त्वमेवोपनिषदामर्थस्तद्विप्रियादिसंसृष्टचित
जीवस्य द्रष्टव्यत्वं किमित्युपक्षिप्यते तत्राहात एवेति॥ नोक्तुर्द्रष्टव्यो लोपदेशे ३
नाऽसंसारिब्रह्मणा दर्शनार्हेण तस्यात्यंताभेदः प्रतिपाद्यते तथा च व्याख्यातं
आवस्थितेरिति काशकृत्स्नस्तत्र। एवं तावद्ब्रह्मणो ज्ञानं न कर्मांगं फलवत्त्वाद्
ज्योतिष्टोमवदिति प्रतिपाद्य वाक्यकृतकर्मसंबंधो वारितः। आचारादिलिंगदर्शे २

नानोप्रतिलिंगमुपन्यस्तं सूत्रकारेण तस्य दर्शनमित्यतु शब्देना कर्माङ्गत्वलिंगद
र्शनस्य प्राबल्यं विशेषउक्तः तं दर्शयति तत्र कर्माङ्गत्वेति। अन्यथासिद्धिरुक्तेतिय
क्ष्यमाणो ह वै भगवंतो ऽहमस्मि इत्येतल्लिंगदर्शनं वैश्वानरविद्याविषयमित्याद्
नात्मेति शेषः। यदेव विद्यया करोतीति श्रुत्या विद्यायाः कर्माङ्गत्वमाशंकिते पू
र्वपक्षितस्यास्य पुरुषार्थविद्याविषयत्वेनान्यथासिद्धिरुक्ता। असार्वत्रिकीति सू
त्रेण। तत्रास्याः श्रुतेः सर्वविषयत्वशंकास्योक्तां परिहरति व्याप्तेरपीति। असं
सायांत्वप्रतिपादनस्य सूत्रद्वयेप्यविशेषात्पुनरुक्तिमाशंक्याह अधिकोप
देशादित्यनेनेति॥ ॥ वैदेहो विदेहदेशानां राजा बहुदक्षिणेन विश्वजिदादि
ना ईजेष्टवान् ह भगवंतो यक्ष्यमाणो यागं करिष्यन् अस्मि तत्र वसंतु भगवंत
इति। वैश्वानरविद्यां गृहीतुमागतानुद्दालकादीन्प्रति अश्वपतिराजवचनं॥
गुरोः कर्मातिशेषेण गुरुशुश्रूषावशिष्टकालेन यथाविधि वेदमधीत्याचार्यकु

स्याद्दनिसमावर्त्तकुटुंबेगार्हस्थ्येतिष्ठन्वेदमधीयानो ब्रह्मलोकमाप्नोतीति शेषः
शतंसमाः यावदायुर्जिजीविषेत् जीवितुमिच्छेत् तत्कुर्वन्नेव कर्माणि वर्त्तेत। एवं व
र्त्तमाने त्वयि नरे नराभिमानिनि इज्जे कर्माशुभं न लिप्यते कर्मणा त्वं न लिप्यस इत्य
र्थः। इतः प्रकारादन्यथा प्रकारान्तरं नास्ति यतो न कर्मलेपः स्यादित्यर्थः। येषां नो
यम परो लोक आत्मा अयं लोकः प्रत्यक्षफलं ते वयं प्रजया करिष्याम इति निश्चि
त्याग्निहोत्रं न जुहुवांचक्रुरित्यर्थः॥ ॥ परामर्शो हि। पूर्वाधिकरणोत्तरसू
त्रेणाक्षेपलक्षणां संगतिमाह सिद्ध इति। अपि चापवृक्तिरितिभाष्यव्याख्या
नार्थोनिदिक्षेपवद्यन्यासः। पूर्ववत्तु निं इति हि प्रसक्ताश्रुतिरित्यादिः सूत्रव्याख्या
नार्थ इति निर्देशः। नवत्त्वन्यार्थ इति उकार एवेदं सर्वमिति प्रणवाख्यस्य ब्रह्म
णः प्रस्तुतत्वात्तत्संस्थत्वप्रशंसार्थो नवलुनाम त्रयो धर्मस्कंधा इत्यादिः पर
मशब्द इत्यर्थः॥ निवीतमिति एतज्जौतिर्ष्टुप्राना दित्यत्रानुक्रांतं एवं तावद्नु

वादत्वमंगीकृत्यानुवादसामर्थ्याच्छास्त्रांतरं परिकल्प्यते तस्मादाघारमांतरस्यमिति रू
पपादितः इदानीमनुवादत्वं किं तदर्थं पूर्वार्थप्रतीतेरत्रैव वा को विधिः कल्प्यत इत्या स्प
ह भगवान् सूत्रकारः अविधिर्वेति ॥ तत्र वाक्यभेदप्रसंगात्तदनुपपत्तिमाशंक्या
ह यद्यपीत्यादिना विधेयार्थैक्येऽप्यनुवादस्य विधिस्तुत्यर्थत्वेनैकवाक्यत्वं तत्र त्व
स्व प्राप्तार्थद्वयप्रतिपादनाद्विधेयभेदे सति नैकवाक्यत्वसंभव इत्यर्थः ॥ ॥ अधस्ता [illegible]
दित्यादि महापितृयज्ञे दिष्टगताग्निहोत्रे च श्रूयते तत्रोपरिष्टाद्देवेभ्य आघारय
तीत्येषोऽनुवादो वर्त्तमानापदेशत्वात् दिशाब्रह्मा चारा ह्यपरिसमिधः प्राप्त
हविषां स्वस्य हितत इत्यत आत प्रश्नादनं येन केनचिल्लाप्नोति तत्रस्तु कंडेस
मिधमुपसंगृह्यानुद्रवतीवाक्यांतरप्राप्तासमिल्लियम्यते तस्मादनुवाद इ
ति प्राप्तेन समिद्धविः प्रश्नादनेन समेत्य प्राप्ता स्रुग्दंड इति च हविषः प्राग्देशे
धारणं प्राप्तं न हविष उपरि। तस्माद्प्राप्तेर्न कापि शब्दप्रेत्य मनःकारस्व

मा

कारेण विधिरित्ति शेषलक्षणो सिद्धांतितं एवं तावच्चतुर्णा आश्रमाणामितरनुवादः

तस्मात्सामर्थ्यादन्यत्र विधिरि है ववाविधिरितिपक्षद्वयमुक्तं दानींवाक्यांतरस्था

नाश्रमांतराणामनुवादेन ब्रह्मसंस्थतास्तूयते स्तुतिसामर्थ्याच्चसेवविधीयत

इतिपक्षांतरे तेमारुसंप्रतीतिब्रह्मसंस्थताविधावपिनपारिव्राड्यसिद्धिरन्याणा

मपिगृहस्थादीनांब्रह्मसंस्थवसेनवादित्तिप्रकृतासंगतिमाशंक्याहान्नावांतर

इति।सन्निधिकशौचं चतुर्गुणं।अस्थानेग्रासानां सम्हो ऽष्टग्रासी।ननुनवतुयो

गिकंब्रह्मसंस्थपदंयोगस्तुपरिव्राड्येवेत्याशंक्याहनगृहस्थादेरिति।स्यादेतत्तत्र

योधर्मस्कंधाइत्युपक्रमात्सर्वएतइत्यत्रतएवचत्रयएतत्छब्देनपरामृश्यंते।तत्र

ज त्रयः शब्देनपरिव्राजकस्यापिग्रहणेचत्वारआश्रमाअमध्येउक्ताइतित्रित्वेनोपक्रम

स्तत्परामर्शोऽनुघटेतातआह।तपसाचेति।नन्वेतेपुण्यलोकाइतिपुण्यलोक

ताजोबहुवचनेननिर्दिष्टात्ब्रह्मसंस्थोऽमृतत्वमेतीत्यमृतत्वभाजएकवचनेन ध

श्रा

निर्दिष्टास्तत्रय आश्रमिणः पुण्यलोकत्वाज्जघन्य तुर्य आश्रमी ब्रह्मसंस्थ इति गम्यते तत्क
थं चतुर्णां ब्रह्मसंस्थत्वमत आह ॥ एते च त्रय इति। परिव्राजोऽपि वनस्थांतर्भावमुक्
मत्विप्रेसत्त्रय इति निर्देशः। न तु पुण्यलोकत्वाज्जामेवामृतत्वं नात्मं विरुद्धमित्याशं
क्याह न च येषामिति। ब्रह्मणि संस्थानिष्ठास्येति हि समासः सर्वनामार्थे वर्त्तते स
र्वनाम च प्रकृतगामीति प्रकृतः सर्व एव ब्रह्मसंस्थोऽस्म सन्देह गम्यते तव लप्रक
तः परिव्राट् ब्रह्मसंस्थस्त्त्वस्थावसमासांत वेर्हि सर्वनामश्रुतिविरोध इत्यर्थः ॥
यथाग्नेय्येति ॥ ॥ ज्योतिष्टोमे प्रथममाग्नेयाद्यो मंत्रा अग्न आयाहि वीतय इत्येव
मादयो विशेषत आम्नाताः स्तोत्रादिसाधनत्वेन विनियुक्ताः पुनराग्नेय्याग्नीध्रमुप
तिष्ठत इति सामान्येनाग्नेयीमात्रमाग्नीध्रोपस्थाने विनियुज्यते तत्र संशयः कि
म प्रकृतैवाग्नेयी नियुज्यते। उताविशेषेण या काचिदग्निलिंगवती प्रकृताऽप्र
कृता च उत प्रकृतैवेति। तत्राग्नेय्येति श्रुतेरविशेषात्। सर्वाग्नेयी विनियुज्यते। यद्वा

स्था

विनियुक्तविनियोगानुपपत्तेरप्रकृतैवेति पूर्वपक्षमाशंक्य शेषलक्षणे स्थितं सि
द्धांतमाह अप्रकृतैवेति । अप्रकृताग्नेयीग्रहणे हि तस्या ज्योतिष्टोमेन सामान्यसंबंधः ।
आग्नीध्रेण विशेषसंबंधश्च विधातव्यः । प्रकृतग्रहणे तु तस्या आग्नेय्याः क्रतुना सा
मान्यसंबंधसिद्धेर्विशेषसंबंधमात्रविधाने लाघवं स्यादित्यर्थः । आद्यपूर्वपक्षं नि
षेधति नचविनियुक्तेति । यद्यपि स्तोत्रार्थाग्नेयी प्रकृता तथापि तस्याः पारार्थ्येन
नेन विनियोगेन नगृह्यतेऽनपेक्षितत्वात् आग्नेयीस्वरूपमात्रं त्वपेक्षितत्वात् गृह्य
ते । यदि पुनराग्नेय्यन्तरेणैव वाक्येनोद्दिश्य विधीयते तदा सो परार्थत्वेनैव प्रतीता त
तथैवोद्दिश्यमानान्यत्र चविनियुज्यमाना विनियुक्तविनियोगविरोधमाव
हेत्तत्वेवं विधीयमानत्वादस्यादित्यर्थः । यत्तूक्तं सामान्यश्रुतिविरोध इति तत्रा
ह तावतावेति आग्नेयीशब्दस्य यौगिकत्वात् संनिहितव्यक्तिपरत्वमेव अग्नि
देवताकत्वलक्षणो हि योगो व्यक्तावेवघटते न सामान्यमात्रे तच्छितांतर्वर्त्तस्य ५

शब्दस्य सन्निहितवचनत्वादित्यर्थः ननु यत्नमपे दलेप्याग्नेयीशब्दस्य न प्रकृतव
क्तिग्यदा तु शक्यतेन्यार्थप्रयुक्तत्वेन गतरसत्वादत आह नवयातयामतयेति
वाचस्तोमः क्रतुविशेषः तत्र सर्वा ऋचः सर्वाणि सामानि सर्वाणि यजूंषि वाचस्तो
मे पारिप्लवं शंसतीति विनियोगेपि मंत्राणां प्रात्यात्मिकार्थेषु विनियोगवदिहापि स्या
दित्यर्थः। परिप्लुत्य परिप्लुत्य यदृच्छया मंत्राणां शंसनं पारिप्लवः। आग्नेयीन्यायं
प्रकृते योजयति तथेहापीति। इहद्विवाक्योपक्रमे यज्ञोध्ययनं दानमिति गृह
स्थानामसाधारणो धर्मो विनिर्दिष्टस्तप इति वनस्थानां आचार्यकुलवास इति
ब्रह्मचारिणां। तथा सत्युपसंहारे पि ब्रह्मसंस्थत्वेनैवासाधारणधर्मेण यतीनां
ग्रहणं युक्तं न तपसा तस्य यतिष्वसाधारणत्वाभावादित्याह। यथोपक्रांतमित्य
त्याद्युचितमित्यंतं संग्रहवाक्यं। अपि च तपःशब्देन परिव्राजकग्रहणे त्रय
इति चत्वार आश्रमा इति द्रष्टव्याः। चतुर्ष्वाश्रमिष्वेतेषु त्रित्वमयुक्तमि

त्याद्यपत्यसंख्याकाश्चेति द्रुहमणुच्छितमिश्रेतसंग्रहवाक्यमेव। आद्यसंग्रहं व्य
तिरेकमुखेन विवृणोति असाधारणेत्यादिना। असाधारणेनयज्ञादिना उपक्र
मः साधारणेन तपसा चोपसंहारः तावेतौ नक्षिप्येते नसंगच्छेते इत्यर्थः। त
पसः सन्यासिवनस्थयोः साधारणत्वमंगीकृत्य दूषणमुक्तमिदानीं साधारण्य
ण मेव नास्ति तस्य वनस्थासाधर्म्यात्तथा च तपसा परिव्राजकस्याग्रहणेनैव
प्राप्नोतीत्याह नचतपो नामेति ग्रीष्मे पंचाग्निमध्यवस्थानादि हित योना
ष्ट्रग्रासनियमादि। तथा सति द्वात्रिंशद्ग्रासादिनियमेन गृहस्थादेरपि तपश्वि
त्वप्रसंगादित्यर्थः। यच्चोक्तंसमधिकशौचं तयः इति तत्रोधिकमप्याह। न
शौचेति। एवमाद्यसंग्रहं विनश्यद्वितीयं विनश्यति सिद्धसंख्यानेदेषिति॥
अवस्थाविशेषापेक्षयैकस्यैव पुरुषस्य लोकाम्नतसप्राप्तिमपदेशानेद स्यपू
षा र्वपक्षउपपादितत्वाद्व्याख्यायोगमाशंक्याहत्रय एतइतीत्यादिना त्रय इत्ये ६

तइतिचयदेतावतस्समानाधिकरणेलतच्छयेत्रयइत्युक्तास्तएवैतइतिपरा
मृष्टव्याः। तत्रत्रयइतिलिंगंविलयपदिग्गृहस्थादयउक्तंतेतदावृत्तवंतए
शब्देननिर्दिष्टाः तेवानवेतिपदिगृहस्थतत्तस्वापसेननिर्णासहसर्वेषांमेतइति
शब्देनप्रकृतपरामर्शिनापरामृष्टत्वादेतच्छब्दसमानार्थवृत्तिनात्रयइति
शब्देननिर्देशवर्जंत्रैत्रयोवक्तुमशक्याइत्यर्थः। अथतपःशब्देननिर्दिष्टःसंगृहीते
त्रयइतिशब्देनचनिर्दिष्टसंहितानिर्दिष्टपंतेतत्रागृहीनिर्दिष्टसंग्रहेचेति। तदाहि
ततशब्दपरामृष्टानांत्रयाणांपुण्यलोकत्वोक्तोनिधानात्तन्निर्दिष्टोरपिपुण्यलो
कत्वात्केस्यात्तत्त्वायुक्तं। तस्यब्रह्मसंस्थात्वनियमादित्यर्थः। अथब्रह्मसंस्थस्ये
वपुण्यलोकत्वमात्वमपिस्यात्तत्राहतेननतस्यैवेति। वाक्यवैरूप्यलंवाहविषुचेति
गृहस्थादीनामनित्यत्वात्ब्रह्मसंस्थायायदाब्रह्मसंस्थास्तदामृतत्वंयांति

ति योजनीयं। निष्ठो ऽस्तु निसृष्टात् ब्रह्मसंस्था याः स दा ब्रह्मसंस्थोऽमृत
त्वमेतीति योजनीयं एवं च वाक्यवैरूप्यमित्यर्थः। नाप्यमपि साध्याहारयोजने
ऽन्यदोषं हृदि कृत्य यथाश्रुतार्थोपादाने फलनैर्द्व्यपदेशं हेतुमाहेति व्याख्या
तं न वति। यदि हि केशवो ऽत्तिमामृतत्वपः शब्देन निष्ठोग्रहणं ब्रह्मसंस्थपद
स्य तु प्रकृतमात्रे प्रवृत्तौ को विरोधः निष्ठोऽग्न्यो गार्ह्य विशेषात् ब्रह्मसंस्थ
स्य सतो ऽमृतत्वं न विध्यति। न चोत्तिष्ठोऽर पिनिष्ठा ब्रह्मसंस्था संन्यासात् ब्रह्मणः
स्थानमिति फलतारतम्यानादिति तद्वेत एवापास्तं ब्रह्मदास देति वाक्यवैरूप्यादे
व। न च संन्यासस्योद्देश्य फलं ब्रह्मलोकः काम्यकर्मवत् संन्यासिलब्ध्या द्यात
त्मलोके षष्ठ्या श्रुत्युत्थित स्यापि संन्यासो विधीयते। तस्मात् संन्यासात् ब्रह्मणः
ऽस्यानुषंगिकफलाभिप्रायं प्राप्युक्त तां लोकानिसादिवद्यतो निष्ठो नि ७

त्वाब्रह्मसंस्थेति न वक्तव्यं वैरूप्यमिति सिद्धांतिनापि योगस्येष्टत्वात् तद्रूढिमारोप्य पू
र्वपदत्वाश्रमासक्तं स्मारयतीत्यर्थः। आग्नेयीन्यायेन ब्रह्मसंस्थशब्दस्य प्रकृतसर्वगो
चरत्वस्योक्तत्वात् त्रयाणां ब्रह्मसंस्थत्वासंभवः अत आह। ससमिति। दर्शितत्वा
श्चासंभवइति। वैरूप्यादिनेत्यर्थः। एवं प्रकृतपरामर्शित्वं ब्रह्मसंस्थशब्दस्य युदस्य
यौगिकार्थस्य सिद्धावेवसंभवं नाघ्योक्तमुपपादयति। एषहीत्यादिना। तत्पूर्वेस्ति घ
तिर्हि समाप्तिवचनः। अन्यनिष्टता यं ब्रह्मणि समाप्तिर्नस्यात् अन्यत्रापि व्यासक्तत्वा
दित्यर्थः। स्वाभावेनस्यस्याविरोधाद्वैतोस्तत्व्यवच्छिंदतीति योजना। भास्करस्तु न्यास
एवात्यरेचयदिति तैत्तिरीयके ब्रह्मणि निधीयते न्यासइति ब्रह्मेति निर्वचनात् तथा
च संन्यासे प्रमाणत्वेन तदुपवचनोदाहरणं भाष्यकारस्य न युक्तमिति वदति तं श्रु
तिव्याख्यानेनानुकंपते। सर्वसंगेत्यादिना अत्र हि श्रुतौ सत्यं परं परं इत्यादिना स
त्यादितपांसि प्रक्रम्यते न्यासः परत्वेन संन्यासः श्रूयते तत्र ब्रह्मोपसमालापरउक्तः॥

स्त

संन्यासोपीतरसाधनेभ्यः परं दुर्लभस्मात्तस्मात्संन्यासात्तब्रह्मत्वेन स्थेयतेइत्यर्थः॥ ब्रह्मप
रतयेति। ब्रह्मणि तात्पर्यवानित्यर्थः॥ ब्रह्मज्ञानपरिपाकांगत्वाच्चेति भावः। तदनुपपन्नत्वमि
व। स्वानधिकृतविषयत्वेपि संन्यासस्य तत्फलस्येव विद्यापरिपाकांगत्वसंभवादित्याशंक्या
व्याचष्टे। शब्दजनितस्येति। संन्यासस्य कर्मानधिकृतविषयत्वकल्पने हि स्वप्रयुक्ता
धिकार्यत्वान्नेस्यात् ब्रह्मसाक्षात्कारकामस्य तु तदधिकारिणः सत्वान्नैवं कल्पनीय
मित्यर्थः। यत्तु शिखायज्ञोपवीतत्यागरूपं पारमहंस्यवृत्तिमन्ये ते। तेन पश्यंति
मा प्रत्यक्षां घटिकास्थानेषु पद्मानां थर्वणीं श्रुतिं सशिखं वपनं कृत्वा बहिः सूत्रं त्यजे
द्बुध इति। न चात्र सशिखं शिखासहितं यथा भवति तथेति शिखायाः रक्षणं शंक्यं। सू
त्रमिव शिखा नान्या यस्य ज्ञानमयी शिखा। स शिखीत्युच्यते विद्वान्नेतरे केशधारि
णः। ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः। ज्ञानमेव परं तेषां पवित्रं ज्ञानमु
च्यते इत्यादिवाक्यशेषे बाह्यशिखां त्यावर्त्य ज्ञानस्यैव शिखात्वादिसंपादनात्॥ ८

नचैतत्तत्त्वदृष्टिविनिर्जीवनावशेषसिद्धपुरुषविषयं न साधकविषयमिति सांप्रतमा
त्मानमरणिं कृत्वा प्रणवं चोत्तरारणिं। ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवदिति
वाक्यशेषे ध्यानविधानात्सिद्धं प्रति तद्वैयर्थ्यात् महाभारते यतिधर्मप्रकरणे यमस्मृ
तिरुदाहृता सापि तैर्न दृष्टा एकवासा अवासा वा एकदृष्टिरलोलुपः। एक एव
चरेन्नित्यं वर्षास्वेकत्र संवसेदिति। न च त्रिदंडिनामवासस्त्वसंभवः। परमहंस
स्य तु सर्वत्यागादस्ति संभव इदमपि साधकविषयं वचनं सिद्धं प्रति विधिवैयर्थ्या
दिति। यदपि केशवः प्रललाप बहिःसूत्रमिस्तत्र यामिणो वा ह्योदिरणपगन्तोनि
धीयते नोपवीतं हृदि प्राणा प्रतिष्ठिता इति प्राणप्रक्रमात्तद्वाक्ये च संन्यासवि
धावश्रवणात् परमात्मना चोपवीतकार्यस्य सव्यापसव्यादेरकरणादुपवीतका
र्यस्य तस्मिन्नसिद्धेः प्राणयोगाच्च न तन्निषेधबलादुपवीतत्यागसंभवः। कुशकार्यस्य
विष्टरणकरणे द्विशरमयबर्हिषा तद्बुद्धिरिष्यत इति। तत्र सूत्रसादृश्यरूपगुण

वि

लक्षणाधारे हिरण्यगर्भे सूत्रत्वश्रवद्वृत्तिकस्यानायां गौरवमसंगतसूत्रविका-
रोपवीतलक्षणायां च सन्निकृष्टात्रिवृत्सूत्रं च तद्विदुरिति चोपक्रमगतहृष्टत्वे-
न परामृष्टत्रिसूत्रतासंपादनात्तन्निष्ठावत्त्वेन निसाजयिषितसूत्रैस्यापि त्रिसूत्र-
तावधारणात। धारणं तस्य सूत्रस्य नोच्छिष्टो नाशुचिर्भवेदिति च यज्ञोपवीतसाध्यो-
च्छिष्टाशुचित्वनिवृत्तेरान्तरसूत्रेण संपादनेन सांगस्य सूत्रस्य यज्ञोपवीतत्वावधा-
रणादेतेनातिदेशानुपपत्तिः परास्ता तथोपसंहारेपि ज्ञानयज्ञोपवीतिन इ-
द यज्ञोपवीतं तु परमं यत्परायणं। स विद्वान्यज्ञोपवीती स्यात् स यज्ञः स्तं यज्वानं
विदुरित्यादिनिर्यज्ञोपवीतमेव युध्यते। यत्तु प्राणप्रकरणादिति त न्नात
तोपि प्रागेव सहिरण्यगर्भसमस्तजगत्तदधिष्ठानस्य ब्रह्मणो हृष्टत्वेन प्रक्रांतत्वा-
त्। यज्ञसंन्यासाश्रवणादिति तदपि न वाक्यशेषे विदुःसूत्रं सवेदेति विद्वान्योगमु-
त्तमास्थित इति योगं सम्यग्ज्ञानं कर्तुं प्रवृत्तस्य साधनत्वेन सूत्रस्यागस्यापि विहित ८

त्वात् सर्वश्रुतिस्मृतिषु च संन्यासस्यैव ज्ञानसाधनत्वप्रसिद्धेः त्यागसन्यासब
योश्चैकार्थ्यत्वादिति स्वयं च यज्ञोपवीतादित्यागः परमहंसयतिविशेषविषये
पर्युदासोऽपरमहंसो यज्ञोपवीतादि धारयेदिति। न निषेधः। नित्यविधिप्राप्तिनिवृ
त्तौ प्रत्यवायं कस्यापि त्वा यज्ञोपवीतादिधारणप्रवृत्तेर्विहितत्वात् तत्र कथं निषे
धेन निवृत्तिबोधः क्रियेत। न च प्रवृत्तौ प्रत्यवायं परिकल्प्यैव निषेधो निवर्त्तयतीति
वाच्यं। तथा सति प्रवृत्तेः प्राप्तानिषेधस्यैवानुदये सर्वनाशप्रसंगात्। तस्मात्प
र्युदासः। यद्विमन्येत परमहंसानामपि पराशरेण यज्ञोपवीतादि विहितं तत्र पर
हंसानां नाम त्रिदंडजलपवित्रयज्ञोपवीतशिक्योत्तरवासधारणं इत्यादिना ततश्चन
पर्युदास इति तन्न। अस्य वचनस्य व्यवह्रीयमाणपराशरस्मृतावदर्शनात् क द
ल्पनेवस शिखमित्यादिप्रत्यक्षश्रुतिविरोधे बुद्धादिस्मृतिवत्तबाधात्। नवं ति
स्मृतयः। त्रिदंडं कुंडिकां चैव सूत्रं चाथ कपालिकां जंतूनां वारणं वस्त्रं सर्वं नि द्युःपरि

त्यजेत। कौपीनाच्छादनार्थं तु वासोऽस्य परिग्रहः। कुर्यात्परमहंसस्तु दंडमेकं तथै
व चेति विष्णुः। कात्यायनश्च। तत्र परमहंसा नाम त्रिदंडकमंडलुशिक्यजलपवित्रपा
त्रपादुकासनशिखायज्ञोपवीतकपालानां त्यागिनो न ते बाधमोधमौनसत्यं नापिचा
नंतः सर्वसहाः सर्वसमाः समलोष्टाश्मकांचना यथोपपन्नभैक्षा दारा चातुर्व
र्ण्ये भैक्षचर्यं चरंत आत्मानं मोक्षयंत इति विष्णुः। कात्यायनस्त्वेष शिष्टपरि
गृहीतयोरनाचारप्रणीतत्वं श्रौतकर्मानस्य स्वकीयब्राह्मणालेपना व्यासः स्यात्स
रति स्म भगवान्व्यासः यज्ञोपवीतं कर्मांगं वदंत्युत्तमबुद्धयः। उपकुर्वाणकात्स्न्
र्व्यं यतो लोके न दृश्यते। यावत्कर्माणि कुरुते तावदस्यैव धारणं। तस्मादस्य परि
त्यागः क्रियांते कर्मभिः सह। अग्निहोत्रविनाशे तु स्रुक्स्रुवादीनि यथा त्यजेत। यथा
च मेखलादीनि गृहस्थो ब्रह्मचारिणो या। पत्नीयोक्त्रं यथोत्सृज्यंते सोमांते तु यथागतश्च॥
तद्वत् यज्ञोपवीतस्य त्यागमिच्छंति योगिन इति। महाभारतेपि। एकदंडी त्रिदंडी वा

शिखी मुंडित एव वा। काषाया मात्रवासोपि यतिः प्रज्यो युधिष्ठिर। तथा। जटी जिनधर
श्चान्ये पंकदिग्धा जितेंद्रियाः। मुंडा निस्तंतवश्चापि वसंत्यर्थार्थिनः पृथगिति राजधर्मेष
प्रोक्तसार्थसुत्तमाश्रमपरामष्टाः। लैंगेपि पुराणे निकृत्य सशिखान् केशान् उपवीतं
विसृज्य च। पंच निर्जुहुयादप्सु मंत्रैः स्वाहेति वाचा क्रमादिति। पद्मपुराणेपि। ततो व्रत
नां परमहंसव्रतमनुत्तमं तेभ्यो ददौ दिवौकोभ्यः सतामप्यविरोधयत्। पश्यतियज्ञ
शाखायां महत्येतामदं ब्रह्म तं परं ब्रह्मोदितं तत्तदागमाचारचेष्टितं। ब्रह्माराधनमु
ख्यानां तीव्रतानां तीव्रतेजसां। त्वगुरध्यापयामास वेदोक्तं परमं हितं। एवं व्रतधाराः
सर्वे वसंति स्मामरेश्वराः। हंसव्रतधरास्तत्र ध्यायमानाः परं पदं। हित्वा शिखां सो
पवीतां विधिना परमेण ते। कालेन महता ध्यानादेवं ज्ञानां स्वतां गताः। हंसव्रतिनो
ये चात्र नियताः संयतेंद्रियाः। एवं नित्यं ज्ञानानुज्ञाना ध्यायमानाः परं पदं दंडहस्तास्तु
संजाता नित्यव्रतसमन्विताः। त्यक्त्वा शिखां सोपवीतां दंड एकः करे धृतः। हंसव्र

तं परं प्रोक्तं पुराचीर्णं मया चिरं व्रतानां परमं गुह्यं पवित्रं पापनाशनं। हंसव्रतं द्विषेण्यो
हातं पायेनाछादितो नरः। न समुच्यति पापेन कल्पकोटिशतैरपि। तस्माद्धंसव्रतं ता
नां तु नरः मान्न च दूषयेत्। निंदां परमहंसानां यतीनां यः प्रयच्छति। स विमुक्तः सर्व
पापेभ्यो नासौ दुर्गतिमाप्नुयात्। शिखां यज्ञोपवीतं च त्यक्त्वा चरति यो व्रतं। हंसव्र
ती स विज्ञेयो मोक्षाकामी न वेद्यसः। शिखायज्ञोपवीतेन त्यक्तेनासौ कथं द्विजः। नि
घ्नते देवलोकेषु पूजितो देवदानवैः। दृष्टं शिवं विष्टमथवा हंसव्रतधरं नरं। नम
प्रोदंगमंगेन देवरूपः स वै द्विज इति पराक्रांतं चात्र बहुभिराचार्यैरिति न विस्त
र्यते॥ ॥स्तुतिलाल॥ ॥पूर्वत्रानुष्ठेयसाम्यस्तुतेराश्रमांतरं विधेयमित्युक्तं इद
नुं रसतमत्वादीनामंगानि तद्धेनेयमेवतु हूरित्यादि स्तुति सामान्यात् स्तुत्य
र्थत्वमिति पूर्वःपक्षः। यद्वा रसतमत्वादिनां गनिष्ठमपि स्तुतिः। तदा किमंगवत्त्व
मनंगात्वं धियइति सिद्धांते फलं। ननु रसतमत्वादिभिः किमुद्गीथादिविधिः

स्तूयते उ तत्तदुपास्तिविधिः नाघउद्गीथादिविधेः कर्मप्रकरणस्थत्वेन व्यवधानात्ते
नैकवाक्यत्वानुपपत्तेः। न द्वितीयउपास्यविषयसमर्प्पणे विध्यन्वयसंभवे लक्षणा
यास्तुत्यर्थत्वायोगादित्याशंक्याह। यद्यत्र सामादिनाऽव्यभिचरितविधिसंबंधेनेति
अव्यभिचरितोद्गीथादिविषयविधिना संबंधो यस्य तेनोद्गीथादिनोपस्थापितउ
द्गीथादिविधिः स एष इत्यादिना स्तूयते। यथा जुहूपस्थापितक्रतुना पर्णमयतासं
बध्यत इत्यर्थः। ननु विशेषणविशेष्यभावेन समभिव्याहारात् स्तुतिर्भवति वाक्य
द्वेपि षष्ठादौ नैव्यवधानादिति तत्राह। न हीति। अनुषंगातिदेशेति। चित्पतिस्त्वापु
ति नातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेणेत्यत्रांते श्रुतोऽच्छिद्रेले
त्येषोऽर्थवादः प्रतिमंत्रमनुषज्यते। वैश्वदेवे आग्नेयमष्टाकपालं निर्वपतीत्यादिह
विष्षु श्रुता अथवा वरुणप्रघासादिष्वतिदिश्यंते। एतद्ब्राह्मणानि पंच हवींषि यद्ब्रा
ह्मणानीतराणीति एवमत्र व्यवधानेऽपि श्रुतत्वेनैकवाक्यतास्यादित्यर्थः। संनिहितवि

ध्यानावांगीकारेणाथपदमुपपाद्य द्वितीयं कस्यमवत्स्यं व्यापिपूर्वपदं घटयति।। यदिलिप्सेति
विधिनैवपुरुषप्रवृत्तिसिद्धेःस्तुतिर्व्यर्थेतिशंकितापरिहरतिस्माचार्यःशबरस्वामी। स
त्यं विनापि तेन सिद्ध्येत् प्रामाण्यं अस्ति तु तत्स्तुतिपदमिति। तस्य व्याख्या प्रभाकरगुरुणाकृ
ता। अस्ति तु लिप्सेत ऊर्ध्वमतिरेके विधिव्यतिरेकेण स्तुतिपदसद्भावे परिहार इति एवं च
दतैतत्सूचितं केवलविधिश्रवणे ऽनास्तिस्तुत्यपेक्षा। यथा वसंताय कपिंजलानालभेत
दो इत्यादि स्तुतिपदे तु सत्यस्ति तदपेक्षा यथा लोके पटो न वतीसेलावत्तिवाक्ये ऽस्तिपदं ना
तरायेक्षारक्तः। पट इत्यत्र तु सत्तःपदस्याकांक्षापावाक्यस्याप्याकांक्षा व्याप्यते तद्वदिति।
लदेतदाहुस्यथाहुरिति। नन्वर्थवादाश्रवणेप्यनुषंगादिभिस्तत्समभिव्याहार उक्तः।।
तत्राहातएवेति। यत एव विधेरेव प्रवर्त्तकत्वमत एवातिदेशे तु वचनाद्व्यवहितार्थ
वादसंबंधो न लिप्सेतदस्ति। अनुषंगोप्यर्थवादस्यसाकांक्षत्वात्। अच्छिद्रेण पवित्रेणेत्युत्
नोयुनालिप्सेतस्मिन्नपेक्षादर्शनात्। क्वचित्तु पठितव्यः सन्नेते पठित इति। न लिप्स
सतसत्वादेः प्राइक्षा तरस्योऽजीथादि विध्यपेक्षास्ति उपासनविधिविषयसमर्पकत्वस्यानि १२

तदेवमेव च स्वप्रामाण्यात्तस्मादनुषंगादिदृष्टांतेनार्थवादप्रामाण्याभिधानमसमंजसं वैषम्या
ल दित्यर्थः। केवलं तस्योक्तस्य विधेरनपेक्षत्वमुपपादयति नहीति। कर्मविधेरिति कर्मा
गविधेरिति वक्तव्ये गम्स्तुतिरप्यंगिन एवेति कर्मविधेरित्युक्तं। ननु भाष्योदाहृतन्या
यविस्तरेण पंचविधलक्षणमुक्तमनीति प्रतिभातीति तत्राह युक्तं न हि धात्वर्थे नैकार
कत्वे देवाविधिलक्षणं निषिद्ध तदुत्वाशंक्य तदनभिप्रायं विवरिष्यन् विधिलक्षणं ता
स्म वदाह। भावनायाः खल्विति। ननु विधौ संस्कृतलिङादेरेव न हन्यादित्यादिनिषेधेष्वपि
प्रयोगात् कथं प्रत्ययस्य विधिवाचकत्वनियमस्तत्राह। निषेधश्चेति। निषेधवाक्यग
तेरपि लिङादिप्रत्ययैर्विध्यर्थोऽनूद्य नञा निषिध्यत इति नास्ति व्यभिचार इत्यर्थः। न
नु श्राद्ध एव विधिर्नियोगादिर्वा न स्यादाह। एतच्चेति। एवं विधिलक्षणं व्यवस्थाप्य वार्त्ति
कार्थमुपपादयति क्रियाचेत्यादिना। कृञ्भ्वस्तिश्च कृभ्वस्तयस्तान् कृभ्वस्तीनुदा
हृतवानित्यर्थः। यद्यपि धात्वर्थाः शतशः सन्ति तथापि दुःखकरणेन सत्तायामनुस
वीति त्रय एव धातवो भावनासामान्यवाचित उदाहृताः सर्वत्र व्याप्त्यर्थे एतान्नुगत

कर्त्तव्यमित्यस्य द्रदंतत्वेन द्व्याभिधापि तालद्वं प्रसुपर्ज्ञैसेनन्त भावनाभेद इत्यर्थः।२

प्रत्ययश्च सकलभावनानुगतश्रेयःसाधनत्वरूपविधिरभिधीयते।ननुप्रतिधातुप्रतिप्र
त्ययं च भावनाभेद इत्यर्थः।यद्यपि भवतिरस्तिश्च प्रयोज्यव्यापारवाचिनो भावनाचप्र
योजकव्यापारस्तथाप्यवस्थांतरविशिष्टत्वेन भाव्यत्वादस्ति भावना।तथाच दंडी भवेदित्या
दिना दंडित्वादिरूपेण भाव्यत्वमनंतरमेव वक्ष्यति एवंकरोतिधात्वौ कारकभेदेपि भावनै
क्यमभिधाय भवत्यस्त्योरपि तमाह।एवमिति।अस्तेर्भूरादेशात्तुल्यवदुदाहरणं।अत्रा
पि दंडी भवेदित्याद्वित्तकर्तृका भावनोदाहृता।भवितव्यमिति धात्वर्थोपसर्जनभूता भावना
भूयतेत्यादित्तकर्मिका भावना।एकधात्वर्थविषया इति।एको धात्वर्थो भवत्यर्थोऽस्त्यर्थो
वा विषयो यासां तास्तथा दंडित्वाद्यवस्थांतरस्य यद्भवनं सत्ता वा तद्विषयास्तदवच्छिन्ना भा
वना उदाहर्तव्या इत्यर्थः।विध्युपहिता इति श्रेयःसाधनत्वविशिष्टा इत्यर्थः।ननु भवति
रस्तिश्च पर्यायौ भूसत्तायामस्भुवीति च परस्परं व्याख्यातात्वात् आह भवतिश्चेष इति कश्चि
त्प्राप्त्यर्थोपि भवतिरस्तितदर्थमेष इत्युक्तं।जन्मवचनो भवतिरस्तिस्तु जनिफलभूत १२
परार्थसद्भाववचन इत्यर्थः।एषां भूतानां पृथिवी रसः पृथिव्या आपो अपामोषधय ओषधी

नांपुरुषः पुरुषस्य वाग्वाचऋग्रसऋचः साम साम्नउद्गीथोरसइत्युपक्रम्यश्रूयते। सए
षरसानां पृथिव्यादीनां रसतमः परमः परमात्मप्रतीकत्वात्परस्य ब्रह्मणोऽर्हस्थानंत स्था
द्दृतीतिपरार्द्ध्यः। परब्रह्मवदुपास्यइत्यर्थः। पृथिव्याद्यपेक्षयाष्टमः कोसावुद्गीथः
प्रणवइत्यर्थः॥ ।पारिप्लवलात्। पूर्वं त्रौद्गीथादिस्तुत्यर्थत्वादुपास्यविषयसमर्प्पक
त त्वरसमत्वादेर्या यदुक्तं तर्ह्याख्यानानामपिविद्यास्तुत्यर्थत्वात्सकाशात्परिप्ल
वप्रयोगशेषत्वेस्यायोनुष्ठानपर्यवसानसंभवादितिसंगतिः। ननुयस्याश्विने
शस्यमानेसूर्योनाभ्युदियादपिसर्वादाशालयीरनुब्रूयादितिसर्वासामृचामाश्वि
नग्रहसंशनेसर्वस्युत्वाविनियुक्तानामपिप्रातिस्विकार्थेषुविनियोगादाख्याना
नांपारिप्लवेविद्यायांचविनियोगः किंनस्यादत आह नचसर्वाइति ऐंद्राग्नाहर्णप
समितिप्रातिस्विकविनियोगानांसर्वदाशालयीरितिसमुदायविनियोगस्यच
श्रौतत्वेनतुल्यत्वात्प्रातिस्विकविनियोगसहत्वेसर्वशब्दः। क्वचित्समानस्य

पू. संतप्रवृत्तस्य प्रातिस्विकविनियोगस्यापवादत्वेनाम्नावल्लिंगादिभिर्मंत्रविनियोगावि
घातकत्वमित्यर्थः। अश्वमेधे हि प्रथमेऽहनि मनुर्वैवस्वतो राजेत्याह द्वितीयेऽहनि य
मो वैवस्वत इति तृतीयेऽहनि वरुण आदित्य इत्याख्यानविशेषा वाक्यशेषे विनियु
ज्यंते। तद्बलाद् उपक्रमस्य संकोचमाह नैषामिति। नन्वुपक्रमगतसर्वशंसतीत्य
भिधाय पुनः पारिप्लवमाचक्षीतेति सर्वशब्दानुसारेणोपसंहारगतविशेषस्योपल
क्षणार्थत्वेन व्याख्यायतामत आह तदथेति प्रथमं सर्वाण्याख्यानानि पारिप्लवे शं
सतीत्यभिधाय पुनः पारिप्लवमाचक्षीतेति विधीयते ततो मनुर्वैवस्वत इत्यादि
पद्यते तत्र पुनर्विधानं वाक्यशेषगताख्याननियमार्थमितरथा वैयर्थ्यात् सर्व
शाखेऽपि वाक्यशेषगताख्यानानामपि मध्ये एकमाख्यानमभिधायोपरमं व्यावर्त्तयितु
मितीतरस्यार्थवत्ता। पुनर्विधिस्तु सार्थकश्छेदकतया सर्वश्रुतौ न स्वदर्प्यायानि भंयः
सन्निधिर्विद्यास्वेवोपनिषदां व्याख्यानानि विनियुंजीतेत्याह तथा वेति। अनेन द्वि
तीयस्त्वेयोऽजितेसोरोदीदित्यादीनां विध्येकवाक्यतां यथा विधिसंनिधिस्वग २५

मध्ये देवमाख्यानानां विद्यासंनिधिर्विद्यैकवाक्यतां गमयतीति योजना। अवधीयेत इति
कर्मकर्तरि। तं श्रीपाख्यायिकाकथापरोऽयं ग्रंथः॥ ॥ अतएव चाग्नींधनाद्यनपेक्षा॥ कर्माणी
ति कर्तव्यत्वेनापेक्षते यज्ञेनेति विविदिषायां विनियुक्तयज्ञादीनां विषयसौंदर्येण म्या
यां तस्यामनन्वयादिच्छाविषयज्ञानेन साध्यमोक्षेन्वय इति पूर्वःपक्षः। अग्नींधनेय
ज्ञानस्यादिकरणविनिर्त्किबाधः स्यात्। नहि मोक्षसाधनमिच्छासाधनं भवतीति नवक्ति
तुं ज्ञानेच्छाजनकांतःकरणशुद्धिहेतुत्वेन ज्ञानेच्छाहेतुत्वं साधनसाधनस्यापि साध
नत्वानपायात्। काष्ठैः पचतीत्यत्र पाकसाधनज्वालाजनककाष्ठानां पाकहेतुत्वदर्श
का नात् इति सिद्धांतः। अत्र नाथ्यमत एव विद्यायाः पुरुषार्थहेतुत्वात्कर्माणि विद्यया
स्वार्थसिद्धौ नापेक्षितव्यानीति तदयुक्तं। न हि पुरुषार्थहेतुत्वं कर्मापेक्षाविरोधि
आग्नेयादिषु दर्शनात् अतः पुरुषार्थाधिकरणप्रयोजननिरूपणे केमस्याधिकर
णस्यानयुक्तं इत्याशंक्य नाथं व्याचष्टे। विद्याया इति विद्यायाः फलार्थत्वे स्वार्थः फ

तूपकारः तद्वाचोपक्रियमाणकृतावसत्युपकारजननायोगात् क्रतुरपेक्षितव्य
इत्युत्क्रमो द्वार्थत्वेनापेक्षामाह यद्यपीति । अविद्यास्तमयो मोक्षो नास्ति कर्मापेक्षे
ति भावः । स्वसिद्धौ नापेक्षितव्यानीति नापि लपेक्षितव्यानीत्यर्थः । अधिकृतविवक्षये
ति भाष्यं व्याचष्टे एतदुक्तं भवति । सर्वापेक्षावत ॥ पूर्वत्र ब्रह्मविद्यानस्वफले कर्मापेक्षा प्र
माणाद्य । सम्प्रत्यविद्युक्तं । तर्हि सा स्वोत्पत्तावपि न तदपेक्षा ततएव तत्रादेवेति पूर्व
पक्षमाह यथेति अत्रागमविरोधमाशंकाह । न चेति । अपि वानेन वाक्येनेच्छा विधी
यतइष्यमाणं ज्ञानं वानाद्यः । विषयसौंदर्येण प्राप्तायां तस्यां विध्ययोगात् । न द्वितीय
इत्याह । पिचेत्याद्विना । अत एव न तत्साधनत्वेन यज्ञादिविधानं तत्तु पंचम्यापि प्र
तिपत्तिरपेक्ष्यतामित्याशंक्य फलपर्यवसानान्नेत्याह । नोत्तरीयकं द्वीतियथाविधौ
सुपरस्पिदुग्धादौ धातुदोषाद्वाह । चिः एवं ब्रह्मज्ञानेपि यायादरुचिर्नवेत्तत्र धातुस
म्यार्थमौषधविधिवत् ब्रह्मज्ञाने रोचकयज्ञादिविधिरर्थवानित्ति सिद्धांतयति । उ १५

त्पत्तौ ज्ञानस्येति। ननु कर्मणां ज्ञानोत्पत्त्यर्थत्वे यावत्तज्ज्ञानोत्पत्ति कर्मानुष्ठातव्यं
न ज्ञानार्थः संन्यास इति। अत आह तत्रापीत्यादिना चित्तस्य प्रत्यक्प्रवणताक
र्मफलं दृष्ट्वा कर्मत्याग उपपन्न इत्यर्थः। ग्रंथास्त्वेते प्रथमसूत्रे व्याख्याताः। न
नु ब्रह्मलोकोपादित्स्यतां। तत्र ज्ञानं स्वत एव जायते तत्किं विविदिषयानेत्याह। विवि
ख दिषुः स्वैविति। प्रति सूक्ष्मत्वात्तब्रह्मात्मत्वस्य मनः समाधानाद्यनुष्ठेयं तत्र
रूचोत्सत्यामनुष्ठीयेत नेतरथेत्यर्थः। एवं ज्ञानोत्पत्युपयोगं कर्मणां प्रदर्श्य फ
लेनुपयोगमाह। न चेति विविचिकित्समिति। फलं हि शाब्दज्ञानस्य नाचनातस्या
द्यसाक्षात्कारस्तस्य चापवर्गः। त्रिष्वपि कर्मानपेक्षा शाब्दज्ञाने नैव कर्माधिकार
हेतोर्ब्राह्मणत्वादेर्बाधितत्वात्तदुत्तरकालं कर्मणए वा नावादित्यर्थः। नास्करे
कृमपवदतितस्मादिति। यद्युते नैवोक्तं ज्ञानात्कर्मणो बाधेनिदाटनाद्यपि बाध्ये
तेति तत्राह दृष्टार्थेष्विति। असत्त्वान्नासत्त्वस्य एते च ग्रंथाः प्रथमसूत्र एवो
पपादिता इति। अधिकारनिमित्तेप्यग्रधायां अधःपातः स्यादिति केटाचोक्रमस

धुत्राच्छकृतत्वादस्य ह्यपादइति। अपरमपि माक्करोत्वं निरस्यति। अतश्चेति। न
नुशमादेरपि तन्नोत्पत्तिहेतुत्वात्‌ कर्मवज्ज्ञानानंतरमनुवृत्तिरिति। ब्रह्मवि
दः कोपाद्यापत्तिरत आह। शमादीनां विति। अवस्था सर्वनाम्यादिति। परमशांतब्र
ह्मास्मीति प्रपश्यतः स्वभावादेव शमादिस्यान्नप्रयत्नसाध्यमित्यर्थः॥ ॥सर्वान्ना
नात। यथापूर्वत्र विविदिषंतीति वर्त्तमानापदेशोप्यपूर्वत्वात्पंचमलकारस्वी
कारेण विधिः कल्पितः एवं त्रापि न ह्वा अस्यानन्नं जग्धं न वातीति वर्त्तमानप
देशे पूर्ववद्विधिरिति प्रत्यवस्थानात्संगतिः॥ सर्वेंद्रियाणां प्राणेन सह संवाद
यच्छ्रूयते तद्दर्शयति। एषकिलेति। इंद्रियाणि किल वयम् श्रेष्ठानीत्यमन्यं
त। विवादश्चामनायचप्रजापतिनोक्तानि युष्माकं मध्ये यस्मिन्नुत्क्रांते शरी
रं पतेत तच्छ्रेष्ठमिति ततइंद्रियेष्वेकैकशउत्क्रांतेषु शरीरं नापतत्‌ प्राणोत्क्रां
तौ तु पतत्तदा ततः प्राणः श्रेष्ठ इत्यवधृतेः सतींद्रियाणि तेनावजितानि तानि

ता

प्राणउपास्य इत्यर्थः। यदाहतद्दर्शयति किंमेऽन्नमिति। पराजितैर्दिविज्ञापिनेकराद्दीयते
एवमिद्यापि सर्वप्राणि निरद्यमानमन्नमिंद्रियाणि प्राणाय प्रददुः। अत एव सर्वं वा त
प्राणोऽन्नमित्यर्थः। आख्यायिकाया विवक्षितमर्थमाह तदनेनेति। प्राणविद्यायाः स्य सर्व
मन्नमिति निर्देशात् तथैवोपासनविधिः कल्पनीय इत्यर्थः। एतद्विद्यागततयेति एत
स्याः प्राणविद्यायाः अंगतयेत्यर्थः। तत्र यद्यपीति। यद्यैद्वादिष्य पंचमलकारस्य सना
त्वंगतिरिति तदितउचितं। प्रवृत्तिविशेषकरतालाने प्रयोजने विधिप्रतिपत्तिरि
त्यर्थः॥ उपमंत्रयते स हिंकार इत्यादिना ग्राम्यव्यापारगतचेष्टासु हिंकारादिदृष्टि
विहिता। सा वामदेव्यविद्या। उपमंत्रणं संकेतकरणं अशक्तेरिति सर्वान्तस्य पुंसः
तुमसामर्थ्यादित्यर्थः। अपि च नानन्नवतीत्यन्नवतिमात्रं श्रूयते तत्र नावय
तिः कल्पनीयः कल्पयितावतं विधिरपि कल्प्य इत्याह। कल्पनीयत्वादिति। कल्प
नाच नोपपद्यते कुत सामान्यविषयनिषेधशास्त्रेण बाधात्न्द्रष्टोऽपि विशेषविधिः
सामान्यनिषेधं बाधेत न कल्प्य इत्यभिप्रेत्याह। शास्त्रांतरेति। कस्तर्हि शास्त्रार्थस्तमाह॥

प्राणस्येति। अप्राक्चेरित्येतच्छिवत्वेति न तावदिति। कौलेयकः श्वा। इभो हस्ती। तत्सं
वृटकाष्ठं। करभ उष्ट्रः तद्भक्ष्यौ शमीकरीरौ करीरः कंटकी वृक्षविशेषः यस्य वल्ली
यो न शाखा भवंति। कल्पनीयत्वादित्येतच्चाचष्टेन चात्र लिङ् इति लिङः सका
शाद्यथा विधिप्रतीतिरेवमत्र स्फुटतरा नास्ति। पंचमलकारद्योतकस्याडाद
रश्रवणादित्यर्थः। ननु पर्णमयीत्वादाविव विधिः कल्प्यतामत आह न चकल्पनी
य इति। सर्वमन्नं भवतीत्यस्यापदनीयेऽनुवादत्वाद्दनदनीये त्वशक्यो विध्यर्थो योत
शक्यकलंजादौ निषेधशास्त्रेण वैपरित्यपरिच्छेदादपूर्वार्थत्वाभावादित्यर्थः॥
शास्त्रांतरविरोधइत्येतच्चाचष्टे न च सत्संगतावितिप्रवृत्तस्येति। उत्पत्तावपि
छेत्तुं प्रवृत्तस्येत्यर्थः। यदुक्तं प्रवृत्तिविशेषकरत्वाद्विधिरिति तत्राह शक्यत्वे चे
ति। ननु सूत्रं प्राणविदः सर्वान्नभक्षणं न वारयति न हि प्राणसूये सर्वान्नानुम
९७ तिमात्रेण अन्यत्र तद्धारणं कर्त्तुं शक्यमत आह। प्राणात्ययइति चेति॥ तर्हि श्रौता ९७

दितिसूत्रनागं व्याचष्टे तत्रोपाख्यानाद्धेति। ननूपाख्याने सामान्यशास्त्रबाधकोवि
धिर्न श्रूयतेऽत आह स्फुटतरेति। जीवितात्ययमापन्नो माघं नित्यं ब्राह्मणो वर्जयेत
इत्याद्या स्फुटतरविधिस्मृतिः। ननु तर्हि स्मृत्या जीवितात्यये किं सुरापि न दूषणीया
नेत्याह। सुरावर्ज्जमिति सुरायास्तु ब्राह्मणस्योष्णामासिंचेयुः सुरामिति मरणांतिक
प्रायश्चित्तदर्शनात् मरणप्रसंगेपि सा न नस्येत्यर्थः। उष्णामित्यस्याग्निवर्णामिति
शेषार्थः। प्राणात्ययेपि किंचिद्विषय एव नेत्याह विद्वांसमिति। चाक्रायणोपाख्यानात् ल
विद्वांसं प्रतिधानात्मविधिस्मृते स्वसाधारण्यात् अविद्वांसं प्रत्यपि विधानात्प्राणा
त्यय एव विद्वदविदुषोः सर्वान्नत्वमिति योजना। हस्तिपको हस्तिपालः छांदोग्यश्रु
तिगतमुपाख्यानमर्थतो दर्शयति। सहेति एवमाख्यानमनुवर्ण्य भाष्यस्थां श्रु
तिं व्याचष्टे। मटचीति। मटच्यो नाम रक्तवर्णाः क्षुद्रपक्षिविशेषाः तैर्हतेषु कुरुदे
शसस्येषु अश्मनीपाब्मुक्तयाश्मानिपात इत्यर्थः। मघे नित्यं ब्राह्मण इति वर्जये

इति शेषः॥ ॥विहितत्वादपि यथाशास्त्रं तदर्थविरोधात् सर्वान्नत्ववचनं स्तुति
रेवं यज्ञादीनां नित्यत्वश्रुतिविरोधाद्विध्यर्थत्ववचनं स्तुतिरितिसंगतिमभिप्रेत्य नि
हो पूर्वपक्षमाह नित्यानीत्यादिना। तस्मादेतदध्यवसाय एवेति। अध्यवसायो वा
विविदिषंतीत्यादावस्य स्तुत्यर्थत्वं न वृत्तौ साशयः। ननु वाचनिकविनियोगभेदात्तु
खादिरादेर्वीर्यार्थत्वं क्रत्वर्थत्वं च प्रथमतंत्रे सिद्धं। तद्वदत्रापि किं न स्यादत आह॥
एतेनेति। वास्तवविरोधेन संबंधः। विधिव्यतिरेकेण स्वभावत एव नित्यम
नित्यं वा यज्ञोऽस्तु व्यवस्थास्थितं तदन्यथा कर्तुं न शक्यते यत्तत्सिद्धरूपं विधितः
कर्तव्यमित्यध्यवसायः यथा विधिनिबाधते तस्य रूपं विधित एव ज्ञातव्यं वि
धितश्चाग्निहोत्रादेरावश्यकत्वानावश्यकत्वप्रतीतेर्न विरोध इत्याह सिद्धेति
से ति। निमित्तेन जीवितेन नित्यं सर्वदा संसारिणामीहितदुष्टदुपात्तदुरितक्ष
यः प्रयोजनं यस्य तत्तथोक्तं। अनेन फलवत्त्वेपि नित्यत्वं कर्मणउपपादि

तं विद्योगतयाच्चत्य त्र कर्त्तव्यमित्यनुषंगः। ननु विरक्ताधिकाराया विद्याया नित्य
समीहितफलत्वाभावात् तदंगत्वेनानुष्ठीयमानस्य नित्यत्वं न स्यात् ततश्च विविदि
षार्थत्वेन कर्मानुष्ठितः प्रत्ययपरिहाराय नित्यप्रयोगोपि पृथक् कर्त्तव्यः न चैवं नि
त्यप्रयोगस्यैवानित्यत्वं स्यादिति नैसा रु विद्यायाः कदाचित्कृतयेति यथा स्वर्गार्थी
मिष्टे त्र प्रयोगो नित्यप्रयोगे विकृत प्रयोगस्यो न यत्रा विशेषान्नित्य विधेः प्रयो
जकत्वं बाधित्वा निविशते। यथा बौद्दिराजन्यवैश्यं वार्ययज्ञियेतस्य यदि सोमं न वि य
त्वा न्दत्यपिबेत् न्यग्रोधस्तिभीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्र
यच्छेदिति नैमित्तिकः फलचमसप्रयोगो नित्यसोमप्रयोगविकृत निविशते।
काम्यनैमित्तिकानां नित्यकार्यसिद्धेः। यादृशो नित्यः प्रयोगः कार्थत्वेन विहि
तस्तादृशस्यैतरत्र प्रसक्तिर्ज्ञानान्न पुनः प्रयोगावृत्तिः। नापि नित्यप्रयोगस्या स्या
नित्यतापत्तिरेवमत्रापीत्यर्थः। न्यग्रोधस्कंधादधो विलंबिन्यो जटाः स्तिभिः॥

१८ कार्यैर्यस्येति कर्त्तव्यस्येत्यर्थः॥ सत्सुकर्मस्विति। विद्याकारणत्वेनानुष्ठितेषु
कर्मसुसत्सुउत्पन्ना विद्यैवस्वकार्येऽविद्यानिवृत्तिलक्षणे व्याप्रियतइत्य
र्थः॥ नारंबहूनकालेसत्वमात्रेन तु बाहुकत्वमिति दृष्टांतवार्त्तिकार्थः॥ ऐह
केति। याहकेणप्रयोगविधिनालीयत्वेन स्वीकारपूर्वकत्वादित्यर्थः। याह
कंदर्शयति। विधेश्चेति। अविदितेच ज्ञाने विध्यनावादेव कर्मणां विद्याप्र
संगत्वेन प्रयोगविधिग्रहणानुपपत्तेरित्यर्थः। ननुन्त हि विद्याविधौ यत्नो तां
नेत्याह। चतस्रणमपीति एकादिप्रतिपत्तिः सांगाध्ययनप्रसवाव्याशा
स्व स्वेश्रवणज्ञानध्यानसंरूपाचतुर्थी साक्षात्कृतिः। तासांचतसृणाम
पिब्रह्मविषयप्रतिपत्तीनां विधानानुपपत्तिरित्युक्तमित्यर्थः। ननुयथैव या
जीवमग्निहोत्रंजुहुयादग्निहोत्रंजुहुयात्स्वर्गकामइतिवाक्ययोरेकप्र
करणेश्रवणाद्युक्त एकस्यकर्मणःकाम्यत्वेननित्यत्वेनचद्विविनियोगः॥ १९

स्तसं।

यज्ञादिवाक्यस्य तु भिन्नप्रकरणत्वान्न विनियोगांतरहेतुत्वं किंतु कर्मांतरविधाय
कत्वमेवेति नेत्याह। न हि प्रकरणांतरमिति। यत्र कर्मैव धातुनोपादाय आख्यातेन विधी
यते तत्र कर्मविधायकत्वस्य नावमपरिव्यजनं विधिः कर्मांतरं विदध्याद्विविदिषाया
श्चैतु नायज्ञादिधात्वर्थे विधिः श्रूयते किंतु विविदिषायां यज्ञादयस्त्वन्यत्रैवोत्पन्ना आ
ख्यातापरतंत्रै यज्ञादिशब्दैरनूद्यंते तत्र फलत्वेन विविदिषायां विध्ययोगाद्यं विधि
र्यज्ञादीनां विनियुंजानो न यज्ञादीनुत्पन्नान्निवर्तते इत्यर्थः। यदि प्रदेशांतरोत्पन्नकर्मानु
वादेन विविदिषासंबंधविधिः स्यात्तर्हि कौंडपायिनामयने पि निर्धार्ग्निहोत्रानुवादे
न मासविधिरापद्येत तत्राह। न च तत्रापीति। ननु होमः एव सान्नाय्यविधिः श्रूयते पियदा
हवनीये जुहोतीत्यत्र होमानुवादेनाहवनीयविधिर्दृष्ट एवमत्रापि होमानुवादेनका
लविधिः किं न स्यादत आह। कालस्येति। पुरुषानुष्ठेयविषयो हि विधिर्न नु स्थेयं
कालं न विदधाति किंतु तस्मिन् कर्म विदधीत अत आह। कालस्येति। वनीयस्य तु पादे

यत्वात् युक्तं देशांतरसिद्धकर्मानुवादेन विधानमित्यर्थः। ननु कालोपि विधीयते यु
दाग्नेयोष्टाकपालोऽमावास्यायामित्यादौ तत्राह। कालहीति। तत्राप्यमावास्यादिकालं
कर्मैव वाधियते इत्यर्थः। सायंजुहोतीत्यादौ कालोपि विधीयते होमस्याग्निहोत्रं जु
होतीत्यनेनैव विहितस्यानुवादादेतदुक्तं उत्सर्ग इति। अन्यतः कर्मप्राप्ति हुत्सर्ग
स्यापवादिका। सा च पाक्षमग्निहोत्रमित्यत्र संदिग्धा विशिष्टविधिसंभवात्तथा श्रावी
त्सर्गो नपोदित इत्यर्थः स्मृतिरुक्तेति नाप्य इति शेषः। अंतरा दृष्टेः॥ ॥ आश्रमक
र्मसापेक्षैव विद्याफलप्रदेति वदन्न प्रष्टव्यः किं फले अपेक्षा उतोत्पत्तौ नाद्य इत्या
ह। न खलु विद्येति। द्वितीयमाशंक्य परिहरति। ननु यथेत्यादिना। प्रतिषेधाभाव
मात्रेणार्थिनमधिकरोतीति भाष्यमयुक्तं अप्रतिषिद्धानामपि केषांचित् विघ्ने
यादर्शनादत आह। प्रतिषेधो विघात इति विघातः प्रतिबंधः तदभावादनुष्ठि
तसाधनस्य विद्योत्पद्यत इत्यर्थः। स्मृतौ मैत्र इत्यादि हिंसको ब्राह्मणः ततः आज

पमाचात्तस्य पुमर्थसिद्धिरित्यर्थः। तद्भूतस्य तु सः यदा नाग्निकर्माधिविधासाधनं ल
दा आरूढपतितस्य पूर्वाश्रमप्रस्थितस्य कर्म किमु वक्तव्यमिति संगतिः पूर्वकर्मस्वनु
ष्ठान चिकीर्षयेत्यादिना ष्ठं व्याचष्टे पूर्वधर्मेष्वित्यादिना। ।आरण्यमिति। तस्यस्वा
